Age of MS. – c. First half of 14th cent. V. S.
Extent – Gāthās 210
Size – 13.7 × 2·5 inches
Condition – Good

*

No. 133 (1) Ratnādevīśrāvikādvādaśavratagrahaṇasvarūpaprakaraṇa
(१) रत्नादेवीश्राविकाद्वादशव्रतग्रहणस्वरूपप्रकरण

Folios – 4
Language – Prakrit
Extent – Gāthās 82
Size – 13 × 1·7 inches
Condition – Good

आदिः—

संसारसिंधुत्तमजाणवत्तं वंदित्तु वीरं सिवठाणपत्तं ।
अंगीकरेमी जिणभासियाइं संमत्तजुत्ताइं गिहिव्वयाइं ॥ १ ॥

चोत्तीसबुद्धाइसयप्पहाणो पयत्तजीवाभयदाणताणो ।
पणट्ठअट्ठारसदोसठाणो देवोऽरिहं मज्झ अणंतनाणो ॥ २ ॥

अंतः—

एवं दुवालसविहो सिरिभद्दगुत्तो, सूरीण पायजुयलंमि गिहत्थधम्मो ।
अंगीकओ **रतनदे**विसुसावियाए, मोक्खत्थमेस जिणसासणभावियाए ॥ ८ ॥

सम्मत्तमूलो करुणालवालो वयत्थुडो चारुगुणोरुसालो ।
फलेउ सिक्खादलचक्कवालो मोक्खप्फलेणं गिहिधम्मसालो ॥ छ ॥

कत्थूरिगाकुंकुमचंदणाई पवालमुत्ताहलमाइ सव्वं ।
वज्जेमि फुल्लाणि तहेव अन्नं नेवोचियं जं विहवंगणाणं ॥
तहा जइस्सं दलइल्लयंमि लोहं तु लाभा० नदाव नयाविका ॥ १ ॥
विक्केमि नाहं मणुयं कयावि संवच्छरंतो तिरियाण तीसं ।
मोत्तूण हं बीयगिहाइकज्जं चित्तोवरिं नेव तिले धरिस्सं ॥ २ ॥

रज्जं महामच्चतभारहत्तं एमाइ वज्जेमि खरं तु कम्मं ।
उत्तारयाई नियमेमि पायं वित्तीइ छेए जयणा इमेसु ॥ ३ ॥
दुवालसेसुं चउपन्नएसुं १२५४ गएसु वासाण सएसु माहे ।०
गएसु वासाण दुवालसेसुं सएसु वासट्ठहिएसु १२६२ किन्हे ।०
दुवालसेसुं चउताल १२४४ वासाहियस्सएसुं निवविक्कमाओ ।
किण्हंमि पक्खे वरतेरसीए गुरुंमि वारे सुहकज्जसारे ॥
एसो दुवा०
जा सा चउत्थी वइसाहमासे तीए बुहम्मी अणुराहरिक्खे ।
अंगीकओ सिवसुहाण कए सिरीयादेवीए देवगुरुभत्तिपरायणाए ॥

(2) Chāḍāśrāvakadvādaśavratagrahaṇasvarūpaprakaraṇa

(२) छाडाश्रावकद्वादशव्रतग्रहणस्वरूपप्रकरण

Folios – 5 to 7
Language – Prakrit

Extent – Gāthās 66
Size – 13 × 1·7 inches
Condition – Good

आदिः—

संसारसिंधुत्तमजाणवत्तं वंदित्तु वीरं सिवठाणपत्तं ।
अंगीकरेमी जिणभासियाइं सम्मत्तजुत्ताइं गिहिव्वयाइं ॥ १ ॥
पयासियासेसविसेसजीवो भव्वाण अन्नाणतमप्पईवो ।
सुरासुरेहिं कयपायसेवो देवो जिणिंदो गयसव्वलेवो ॥ २ ॥

अंतः—

दुवालसेसुं निवविक्कमाओ सएसु वासेसु य सोलसेसु १२१६ ।
पक्खे सिए कत्तियमासि पक्खे कल्लाणजोगे दसमीतिहीए ॥ ६४ ॥
पुन्नो पवन्नो सिरिमाणतुंगसूरीण मूलंमि गिहत्थधम्मो ।
छड्डाभिहाणेण सुसावएणं दुक्खक्खयत्थं सिवसोक्खहेऊ ॥ ६५ ॥
सम्मत्तमूलो करुणालवालो वयत्थुडो चारुगुणोरुसालो ।
फलेउ सिक्खादलचक्कवालो मोक्खप्फलेणं गिहिधम्मसालो ॥ ६६ ॥
परिग्रहप्रमाणं समाप्तमिति ॥ मंगलं महाश्रीः ॥ छ ॥

(3) Dvādaśavratagrahaṇasvarūpaprakaraṇa (३) द्वादशव्रतग्रहणस्वरूपप्रकरण

Folios – 8 to 11
Extent – Gāthās 39

Language – Prakrit

Size – 13 × 1·7 inches
Condition – Good

आदि:—

कल्लाणलच्छीण विलासगेहं वंदित्तु वीरं वरनाणदेहं ।
गिन्हामि सम्मं जिणदेसियाइं सम्मत्तजुत्ताइं गिहिव्वयाइं ॥ १ ॥

देवोऽरिहंतो सिवसुक्खकारी गुरू सुसाहू मम बंभयारी ।
जीवाइतत्तं जिणरायवुत्तं सम्मत्तमेयं गहियं पवित्तं ॥ २ ॥

अंत:—

बारसवरिससएसुं० ॥ ३७ ॥

एसो सावगधम्मो पासे सिरि०
पडिवन्नो मुक्खत्थं० सड्ढेणं० ॥ ३८ ॥

सम्मद्दंसणमूलो वयखंधो गुणविसालसाहालो ।
गिहिधम्मकप्परुक्खो सिवसुहफलओ लहुं होउ ॥ ३९ ॥ छ ॥

(4) Dvādaśavratagrahaṇasvarūpaprakaraṇa (४) द्वादशव्रतग्रहणस्वरूपप्रकरण

Folios – 11 to 12
Language – Prakrit

Extent – Gāthās 25
Size – 13 × 1·7 inches
Condition – Good

आदि:—

नमिऊण महावीरं गिन्हे सम्मत्तमणुवयाईयं ।
अरिहं देवो साहू गुरुणो तत्तत्थसद्दहणं ॥ १ ॥

थूलगपाणइवायं कन्नालियपभिइगोयरं अलियं ।
थूलमदत्तादाणं दुविहं तिविहेण वज्जेमि ॥ २ ॥

अंत:—

एगूणसट्ठे वरिसे भद्दवसियचउदसीइ इय धम्मो ।
ससिसूरिगुरुणा दिन्नो अमुगस्स सड्ढस्स ॥ २५ ॥

(5) Yaśomatiśrāvikādvādaśavratagrahaṇasvarūpaprakaraṇa
(५) यशोमतीश्राविकाद्वादशव्रतग्रहणस्वरूपप्रकरण

Folios – 13 to 14
Language – Prakrit

Extent – Gāthās 26
Size – 13 × 1·7 inches
Condition – Good

आदिः—

नमिऊण जिणं सम्मं वीरं पयडियसुसाहुगिहिधम्मं ।
सम्मत्तपुव्वयाइं गिहिव्वयाइं पवज्जामि ॥ १ ॥

अंतः—

रायाभिओगमाई अन्नत्थणाभोगपमुहआगारे ।
मुत्तूण इमे नियमा भंगे नियमाणअं विहियं ॥ २५ ॥

सिरिभद्दबाहुगणहरमूले वाहत्तरंमि इय धम्मो ।
जेट्ठसियपंचमीए जसमइसड्ढीए पडिवन्नो ॥ २६ ॥

(6) Śrāvakadvādaśavratagrahaṇasvarūpaprakaraṇa
(६) श्रावकद्वादशव्रतग्रहणस्वरूपप्रकरण

Folios – 15 to 16
Language – Prakrit

Extent – Gāthās 32
Size – 13 × 1·7 inches
Condition – Good

आदिः—

संसार सिंधु० । १ ॥ देवोऽरिहंतो० ॥ २ ॥

मिच्छं चउद्धा वि न भावणिज्जं संकातिमाई विचिगच्छपुव्वं ।
वंदे जिणिंदे दिवसेऽतिचारं संखेवओ विः प्पणिहाण........ ॥ ३ ॥

(7) Ṛṣabhajina–Vīrajina–Saptatyadhikaśatajinastuti
(७) ऋषभजिन–वीरजिन–सप्तत्यधिकशतजिनस्तुति

Folio – 15th
Language – Sanskrit

Extent – Kāvyas 12
Size – 13 × 1·7 inches
Condition – Good

(8) Caturviṃśatijinastuti (८) चतुर्विंशतिजिनस्तुति

Folio – 16th
Language – Sanskrit
Author – Bhadraguptasūri

Extent – Āryās 25
Size – 13 × 1·7 inches
Condition – Good

आदिः—

हेमाभ ! नाभिनंदन ! मरुदेवात्मज ! वृषांक ! ऋषभ ! जय ।
पंचधनुःशततनुचतुरशीतिलक्षमितपूर्वायुः ॥ १ ॥

अन्तः—

इति वर्ण्णमाननामायुरंकपितृमातृकीर्तनाज्जिनपाः ।
श्रीभद्रगुप्तसूरिभिरभिष्टुताः शिवसुखं दद्युः ॥ २५ ॥
मंगलं महाश्री ॥ छ ॥

(9) Vairāgyakulaka etc. (९) वैराग्यकुलक आदि

Folios – 17 to 19
Language – Prakrit
Size – 13 × 1·7 inches
Condition – Good

आदिः—

ता कइया तं सुदिणं सा सुतिही तं भवे सुनक्खत्तं ।
जम्मि सगुरुपरितंतो चरणभरधुरं धरिस्समहं ॥ १ ॥

अन्तः—

जह जह वंधइ नेहं पियपुत्तकलत्तमित्तवंधूहिं ।
तह तह खुप्पइ बहले संसारे दुक्खघोरंमि ॥ ॥ २९ ॥ छ ॥

(10) Śrāvakadvādaśavratagrahaṇavidhiprakaraṇa
(१०) श्रावकद्वादशव्रतग्रहणविधिप्रकरण

Folios – 20 to 23
Language – Prakrit
General Remarks – Somewhat incomplete.
Extent – upto Gāthā 76
Size – 13 × 1·7 inches
Condition – Good

(11) Śrāvakadvādaśavratagrahaṇavidhiprakaraṇa
(११) श्रावकद्वादशव्रतग्रहणविधिप्रकरण

Folio – 24th
Language – Prakrit
Size – 13 × 1·7 inches
Condition – Good

*

No. 134 (1) Caityavandanavidhi [bhāṣya] prakaraṇa
(१) चैत्यवंदनविधि [भाष्य] प्रकरण

Folios – 143 to 147
Language – Prakrit
Age of MS. – c. First half of 14th cent. V. S.
Extent – Gāthās 40
Size 13 × 1·7 inches
Condition – Fair

आदिः—

वंदिय वीरजिणिंदं भणामि चियवंदणाविहिसरूवं ।
अहिगारमुद्दसंपयसहियं सुत्ताणुसाराओ ॥ १ ॥

अंतः—

इय नाऊण य सम्मं संपुन्नविहाणओ समाहीए ।
चीवंदणा विहेया बुहेहिं सय भव्वसत्तेहिं ॥ ४० ॥

चैत्यवंदनविधिः समाप्तः ॥ छ ॥

(2) Vandanakabhāṣya (२) वंदनकभाष्य

Folios – 147 to 151
Language – Prakrit
Author – Devendrasūri
Age of MS. – c. First half of 14th cent. V. S.
Extent – Gāthās 50
Size – 13 × 1·7 inches
Condition – Fair

आदिः—

नमिऊण महावीरं वाणउयसयं भणामि वंदणए ।
जह सुयहरेहिं भणियं भवियजणअणुग्गहट्ठाए ॥ १ ॥

अन्तः—

वाणउयसयसमेओ आवस्सगविही निदंसिओ एस ।
देविंदमुणिंदेहिं समासओ सुत्तनीईए ॥ ५० ॥

वंदनकभाष्यं समाप्तमिति ॥ छ ॥

(3) [Pratyākhyānabhāṣya] (३) [प्रत्याख्यानभाष्य]

Folios – 151 to 157
Language – Prakrit
Age of MS. – c. First half of 14th cent. V.S.
General Remarks – Incomplete.
Extent – Gāthās 62.
Size – 13 × 1·7 inches
Condition – Fair

आदिः—

नवकार पोरसीए पुरिमड्ढेकासणेयठाणे य ।
आयंबिलऽभत्तट्ठे चरिमे य अभिग्गहे विगई ॥ १ ॥

(4) Abhayapṛcchānāmaprakaraṇa (४) अभयपृच्छानामप्रकरण

Folios – 160 to 161
Language – Sanskrit
Age of MS. – c. First half of 14th cent. V. S.
Extent – Grantha 67.
Size – 13 × 1·7 inches
Condition – Fair
General Remarks – contains only *Ślokas* 55 to 67 of the Prakaraṇa. Incomplete.

अन्तः—

उन्मार्गदेशको यस्तु मिथ्यादृष्टिरसंगतः ।
वर्णवादी च साधूनां मुह्यते तेन कर्मणा ॥ ६५ ॥

एषोऽर्थो यथा दृष्टो जिनेंद्रैर्ज्ञानचक्षुषा ।
तथा मयाऽपि चाख्यातः संसारस्थेषु जंतुषु ॥ ६६ ॥
इदं विचित्रार्थपदोपशोभितं समीक्ष्य बुद्ध्या समुपेत्य संयमं ।
तपोभिनिर्नाशितकर्मसंचयः स सिद्धिमध्यासयते ह्यनुत्तराम् ॥ ६७ ॥

॥ अभयपृच्छानामप्रकरणं समाप्तम् ॥ मंगलं महाश्रीः ॥

(5) Subhāṣitasaṅgraha (५) सुभाषितसंग्रह

Folios – 162 to 167
Language – Sanskrit
Age of MS. – c. First half of 14th cent. V. S.
General Remarks – Folios 168–169 missing.
Extent – Kāvyas 74
Size – 13 × 1·7 inches
Condition – Fair

आदिः—

अमलिनपक्षद्वितयः सुपदन्यासेन मंडयन् भूमिम् ।
हंस इव निर्मलात्मा कस्य न सुजनो मनो हरति ॥ १ ॥

(6) Dharaṇoragendrastotra (६) धरणोरगेन्द्रस्तोत्र

Folios – 171 to 174
Language – Sanskrit
Age of MS. – c. First half of 14th cent. V. S.
Extent – Granthas 36
Size – 13 × 1·7 inches
Condition – Fair

आदिः—

धरणोरगन्द्रसुरपेतिविद्याधरपूजितं जिनं नत्वा ।
क्षुद्रोपद्रवशमनं तस्यैव महास्तवं वक्ष्ये ॥ १ ॥

अन्तः—

भक्तिर्जिनेश्वरे यस्य गंधमाल्यानुलेपने ।
संपूजयति यश्चैनं तस्यैतत्सफलं भवेत् ॥ ३६ ॥

इति पार्श्वनाथफणिपतिधरणेंद्रस्तवनं समाप्तमिति ॥ छ ॥ मंगलं महाश्रीः ॥ छ ॥

(7) Pārśvastava (७) पार्श्वस्तव

Folios – 174 to 176
Language – Sanskrit
Author – Indranandi
Age of MS. – c. First half of 14th cent. V. S.
Extent – Kāvyas 9
Size – 13 × 1·7 inches
Condition – Fair

अन्तः—

झंकारं रांतयुक्तं शिखिपवनपुरःस्थापितं नामगर्भं

पश्यंतं यत्प्रभावाद्विजहति पुरुषं योगिनीमुद्रया द्राक् ।
रों ह्रीं श्रीं हूँ फुट्स्राक्षरजपितजवैस्ताडितं शास्त्रगंधं
शाकिन्यः श्रीन्द्रनंदिः प्रथितगतिरसौ पातु मां पार्श्वनाथः ॥ ९ ॥

पार्श्वनाथस्तवः समाप्तः ॥ छ ॥

(8) Mahādevalakṣaṇa-Mahādevastotra (८) महादेवलक्षण-महादेवस्तोत्र

Folios.– 176 to 179
Language – Sanskrit
Author – Hemacandrācārya
Age of MS. – c. First half of 14th cent. V. S.
Extent – Granthas 33
Size – 13 × 1·7 inches
Condition – Fair

आदिः—प्रशान्तं दर्शनं यस्य सर्वभूताभयप्रदम् ।

(9) Ātmānuśāsana (९) आत्मानुशासन

Folios – 179 to 185
Language – Sanskrit
Author – Pārśvanāga
Age of MS. – c. First half of 14th cent. V. S.
Extent – Granthas 77
Size – 13 × 1·7 inches
Condition – Fair
Date of Composition – 1042 V. S.

(10) Gaṇitagrantha (१०) गणितग्रन्थ

Folios – 186 to 188
Language – Sanskrit
Age of MS. – c. First half of 14th cent. V. S.
General Remarks – Incomplete.
Extent – Ślokas 42
Size – 13 × 1·7 inches
Condition – Fair

आदिः—

मूडस्स य जं मुल्लं कल्सीमुल्ले विसोअया दूणा ।
कुडवस्स य चउहाओ सेइमाणाण सो नाओ ॥ १ ॥
मूटकमूल्यद्रमार्द्धा रूपकाः कल्सीभृतौ ।
तदर्द्धाः कल्सीकार्द्धे तदर्द्धाः कुडवे मताः ॥ २ ॥

(11) Sarpaviṣāpahārauṣadhastotra with commentary
(११) सर्पविषापहारौषधस्तोत्र सटीक

Folios – 189 to 191
Language – Prakrit and Sanskrit
Author & Commentator – Śaṅkuka & Brahmaśambhu
Size – 13 × 1·7 inches
Condition – Fair
Age of MS. – c. First half of 14th cent. V. S.

आदि:—

श्रीब्रह्मशंभुनाचार्येण श्रीशंकुकगारुडशास्त्रोपरि विरचितटीकायां स्थावरजंगम-विषापहारार्थं उद्धरित औषधी अगदानां प्रयोगः ।

नाया वि फणिज्जयसुअरिसणाए मूलेण डुंडुहायंति ।
अरुणोयरवरिसासंभवस्स वालक्कछीरेण ॥ १ ॥

दुंदुभा भवंति, के ते? नागा अपि, केन? फणिज्जकसुदर्शना चक्रांका, तथा अरुणोयरं, तंदुलीयकं वर्षासंभवा वैशाखकः पुनर्नवा स एव कथ्यते। तदेतेषां मूलेन नागा दुंदुभा भवंति। दष्टाश्च पानेन निर्विषा ज्ञातव्याः। तथा बालको मलार्कः क्षीरेण च कृतहस्त-लेपनेन नागा दुंदुभाः दंशस्थानमर्द्दनेन च दष्टाश्च निर्विषा भवंतीत्यर्थः ॥ छ ॥

सामलया गोहाई तिसूलिया मोरचूलिया चलणा ।
पीया नासंति विसं जह वट्टियभुयगडक्काण ॥ २ ॥

अन्तः—

दोवयणचम्ममढिया ढक्का सिहिनलयवाइया कुणइ ।
कीरतरुमूलघडिया णायाणुच्चाडणं सुइरं ॥ छ ॥

कीरतरुः शिरीषवृक्षस्तस्य मूलेन घटिता द्विवदनसर्पचर्मणा मढिता शिखिपिच्छ-नलकवादिता सती ढक्का सर्पाणामुच्चाटनं सुचिरं करोतीत्यर्थः ॥ छ ॥ इत्यगदानि ॥ छ ॥

संखाहुली गिरिनई अंधाहुली नाइ ।
लक्खसहस्सेहि वेढियउ पिउ दिक्खंतह जाइ ॥ छ ॥

*

No. 135 Bhavabhāvanāprakaraṇa भवभावनाप्रकरण

Folios – 101 to 168
Language – Prakrit
Author – Maladhārī Hemacandrasūri
Age of MS. – c. *First half of 14th cent V. S.*
Extent – Gāthās 531
Size – 13·2 × 1·7 inches
Condition – Good

*

No. 136 Śrāvakaprajñapti श्रावकप्रज्ञप्ति

Folios – 75 to 142
Language – Prakrit
Author – Umāswātivācaka
Extent – Gāthās 405
Condition – Good
Age of MS. – c. Beg. of 14th cent. V. S.

*

No. 137 Sādhuśrāvakasāmācārī साधुश्रावकसामाचारी

Folios – 124
Language – Prakrit–Sanskrit
Age of MS. – c. First half of 14th cent. V. S.
Size – 13·5 × 1·7 inches
Condition – Good
General Remarks – Incomplete

आदिः—

॥ ॐ नमो वीतरागाय ॥

नमिऊण तिलोयगुरुं लोयालोयप्पयासयं वीरं ।
विब्भमविणासहेतुं णुट्ठाणविधिं पवक्खामि ॥ १ ॥

तत्थाईए संमत्तारोवणविही भण्णइ । पसत्थे खेत्ते जिणभवणादिए पसत्थेसु तिहिकरणनक्खत्तमुहुत्तचंदबलेसु परिक्खियगुणं सीसं विसिट्ठकयनेवत्थं चंदणकयभालटिक्कयं करधरियखयफलं तिपयाहिणीकयसमोसरणं सूरी अग्गओ काउं खमासमणदाणपुव्वं भणावेइ । संमत्ताइ सामाइयतिगस्स आरोवणत्थं मम वासे खिवेह ।

*

No. 138 (1) Dhyānasvarūpādi (१) ध्यानस्वरूपादि

Folios – 2 to 7
Language – Sanskrit
Age of MS. – c. First half of 13th cent. V. S.
Size – 13·5 × 2 inches
Condition – Good
General Remarks – Folios 1 and 8 are missing.

(2) [Nakṣatraviṃśatikā] (२) [नक्षत्रविंशतिका]

Folios – 8 to 10
Language – Prakrit
Age of MS. – c. First half of 13th cent. V. S.
General Remarks – Folio 8 missing.
Extent – Gāthās 21
Size – 13·5 × 2 inches
Condition – Good

आदिः—

उत्तरतियं च मूलं हत्थो चित्ता य रेवई साई ।
अस्सिणिसहियारिक्खो रविवारे सिद्धिजोगो उ ॥ १ ॥

अन्तः—

हत्थो चित्ता भरणी रोहिणि तह फग्गुणी य असलेसा ।
तियसाढ पुव्वभद्दा सणिवारे असुह नव रिक्खा ॥ २१ ॥

(3) Śakunasaptatriṃśikā (३) शकुनसप्तत्रिंशिका

Folios – 11 to 13
Extent – Gāthās 37

Language – Prakrit
Author – Siddhapaṇḍita
Age of MS. – c. First half of 13th cent. V. S.
Size – 13·5 × 2 inches
Condition – Good

आदिः—

निशांत्यप्रहरस्यार्द्धादर्द्धयामावधिर्भवेत् ।
दग्धा प्रज्वलिता धूम्रा दिगीशान्यादितः क्रमात् ॥ १ ॥

अन्तः—

वसंतराजप्रभृतीन्यशेषाण्यालोक्य शास्त्राणि महोद्यमेन ।
चकार सिद्धः शकुनोत्तमानां विनिर्णयं शिष्टजनस्य तुष्ट्यै ॥ २७ ॥

शकुनसप्तत्रिंशिका समाप्ता ॥ मंगलं महाश्रीः ॥ छ ॥

(4) Tapovidhi (४) तपोविधि

Folios – 13 to 15
Language – Prakrit
Age of MS. – c. First half of 13th cent. V. S.
Size – 13·5 × 2 inches
Condition – Good

(5) Āvaśyakasūtra (५) आवश्यकसूत्र

Folios – 16 to 19
Language – Prakrit
Age of MS. – First half of 13th cent. V. S.
Size – 13·5 × 2 inches
Condition – Good

(6) Lūṇa and Ārātrika Uttāraṇavidhi (६) लूण–आरात्रिक उत्तारण विधि

Folios – 19 to 20
Language – Prakrit
Age of MS. – c. First half of 13th cent. V. S.
Size – 13·5 × 2 inches
Condition – Good

(7) [Bhāvanāprakaraṇa] (७) [भावनाप्रकरण]

Folios – 21 to 24
Language – Prakrit
Age of MS. – c. First half of 13th cent. V. S.
Extent – Gāthās 43
Size – 13·5 × 2 inches
Condition – Good

आदिः—

नमिऊण नेमिनाहं तियसिंदनरिंदवंदियं सिरसा ।
संखेवओ महत्थं भावणसत्थं पवक्खामि ॥ १ ॥

अंतः—

खमह महं भो सुयणा अहियं च जणस्य (ऊणं च) जं मए रइयं ।
तं सोऊण व सव्वे करेह जह सोहणं होइ ॥ ४३ ॥

(8) [Bhāvanākulaka] (८) [भावनाकुलक]

Folios – 25 to 26
Language – Prakrit
Age of MS. – c. First half of 13th cent. V. S.
Extent – 23 Gāthās
Size – 13·5 × 2 inches
Condition – Good

आदिः—

संसारविसमसायरभवजलवडियाण संसरंताणं ।

अन्तः—

खणभंगुरे असारे मणुअभवे अब्भपडलसारिच्छे ।
सारं इत्तियमित्तं जं कीरइ सोहणो धम्मो ॥ २३ ॥ छ ॥

(9) Paccakkhāṇa (९) पच्चक्खाण

Folios – 26 to 28
Language – Prakrit
Age of MS. – c. First half of 13th cent. V. S.
Size – 13·5 × 2 inches
Condition – Good

(10) Caityavandanāsvarūpagāthā (१०) चैत्यवंदनास्वरूपगाथा

Folios – 29 to 31
Language – Prakrit
Age of MS. – c. First half of 13th cent. V. S.
Extent – Gāthās 26
Size – 13·5 × 2 inches
Condition – Good

(11) Pratyākhyānasvarūpagāthā (११) प्रत्याख्यानस्वरूपगाथा

Folios – 31 to 36
Language – Prakrit
Age of MS. – c. First half of 13th cent. V. S.
Extent – Gāthās 51
Size – 13·5 2 inches
Condition – Good

(12) Vandanakasvarūpagāthā (१२) वंदनकस्वरूपगाथा

Folios – 36 to 38
Language – Prakrit
Age of MS. – c. First half of 13th cent. V. S.
Extent – Gāthās 24
Size – 13·5 × 2 inches
Condition – Good

(13) Caturviṃśatijinastotra (१३) चतुर्विंशतिजिनस्तोत्र

Folios – 39 to 44
Language – Prakrit
Age of MS. – c. First half of 13th cent. V. S.
Extent – Kāvyas 24
Size – 13·5 × 2 inches
Condition – Good

(14) Sakalārhatstotra (१४) सकलार्हत्स्तोत्र

Folios – 45 to 47
Language – Sanskrit
Author – Hemacandrācārya
Age of MS. – c. First half of 13th cent. V. S.
Extent – Granthas 26
Size – 13·5 × 2 inches
Condition – Good

(15) Śāntijināṣṭaka (१५) शांतिजिनाष्टक

Folios – 48 to 49
Language – Prakrit
Age of MS. – c. First half of 13th cent. V. S.
Extent – Gāthās 8
Size – 13·5 × 2 inches
Condition – Good

(16) Prabhātakulaka (१६) प्रभातकुलक

Folios – 49 to 50
Language – Sanskrit
Age of MS. – c. First half of 13th cent. V. S.
Extent – Granthas 13
Size – 13·5 × 2 inches
Condition – Good

आदिः—

प्रातरेव समुत्थाय तीर्थनाथ मुखं तव ।
ये पश्यंति प्रणश्यंति तेषां नियतमापदः ॥ १ ॥

अंतः—

एतत् प्रभातकुलकं पुलकं दधानो यस्ते निशांतमुपगम्य निशांत एव ।
स्वामिन् पठेत् त्रिदिवि वासमुपास्य पश्चाच्चन्द्रप्रभामलमुपैति पदं स मुक्तेः ॥ १३ ॥

प्रभातकुलकस्तोत्रम् ॥

*

No. 139 Pañcasaṅgrahadīpaka-Ślokabandha पंचसंग्रहदीपक–श्लोकबंध

Folios – 104
Language – Sanskrit
Author – Bāmideva
Age of MS. – c. First half of 13th cent. V. S.
Extent – Granthas 1175
Size – 9·7 × 2·5 inches
Condition – Good
General Remarks – Folios 102-3 missing.

आदिः—

॥ ॐ नमः सर्वज्ञाय ॥ छ ॥

सिद्धं शुद्धं जिनाधीशं नेमीशं गुणभूषणम् ।
नत्वा ग्रंथं प्रवक्ष्यामि पंचसंग्रहदीपकम् ॥ १ ॥
नेमिचंद्रमुनीन्द्रेण यः कृतः पंचसंग्रह ।
स एव श्लोकबंधेन प्रव्यक्तीक्रियते मया ॥ २ ॥
बंधको बध्यमानं च बंधभेदास्तथेशता ।
हेतवश्चेति पंचानां संग्रहोऽत्र प्रकाश्यते ॥ ३ ॥

यस्तत्र बंधको जीवः सदसत्कर्मणां स्वयम् ।
तत्स्वरूपप्रकाशाय विंशतिः स्युः प्ररूपणाः ॥ ४ ॥

गुणा जीवाश्च पर्याप्तिप्राणसंज्ञाश्च मार्गणाः ।
उपयोगसमायुक्ता भवंत्येता प्ररूपणाः ॥ ५ ॥

मार्गणागुणभेदाभ्यां भवतो द्वे प्ररूपणे ।
मार्गणांतर्गताः शेषाः जीवमुख्याः प्ररूपणाः ॥ ६ ॥ छ ॥

पत्र ६५—

यद्ग्रंथश्रेणिवेणीललितपदगतिप्रोल्लसद्भूरिभाव-
प्रव्यक्ता....र्थसार्थप्रकटितसहजस्फारसार........ ।
तं वंदे योगिवंद्यं जिनपतिवदनांभोजानिर्यद्रहस्यं
सस्यं त्रैलोक्यकीर्त्ति गुणमणिनिचयं येन विज्ञायि ॥

श्रीमानसौ जगति नंदतु भव्यबंधुर्नेमिः कलानिधिरुदारगुणैकधामा ।
यत्कीर्तिनिर्मलकलाव........कः सांको बभूव भुवनेष्विति सुप्रसिद्धम्
॥ ८२५ ॥ छ ॥

इति श्रींद्रवामिदेवविरचिते पुरवाटवंशविशेषकश्रीनेमिदेवस्य यशःप्रकाशके पंचसंग्रहदीपके बंधकस्वरूपप्र[रूपणो नाम] प्रथमोऽधिकारः ॥ छं ॥ * ॥ शुभं भवतु चतुर्विधसंघस्य ॥ छ ॥

पत्र ७७—

इत्युक्तं बध्यमानस्य कर्माष्टकस्य लक्षणम् ।
मूलोत्तरप्रभेदेन यथोक्तं पूर्वसूरिभिः ॥ १४० ॥
यः कर्मप्रकृतिस्थितिव्यतिकरव्याख्यानदीक्षागुरु-
र्यश्चारित्रमहार्णवावधिगतो रत्नत्रयालंकृतः ।
यश्चाशेषतपःप्रभावदिनकृत्तुद्यत्तमोवल्लरी
भ्रश्यत्कामकषायकौशिकभरत्रैलोक्यकीर्ति नुमः ॥
दानं यस्य मनोरथावधि यशो निःशेषलोकावधि-
मैत्री सत्त्वकथावधिः परिणतिस्तत्त्वावबोधावधिः ।
भक्तिः श्रीगुरुपादपंकजनिजाहंकारसारावधि-
र्नेमिर्जोमणनंदनो विजयतामानल्पकल्पावधिः ॥

इतिश्रीठ्ठवामदेवविरचिते पुरवाटवंशविशेषकश्रीनेमिदेवस्य यशःप्रकाशके पंच-संग्रहदीपके

पत्र १०४

तस्मादजायत जिनेन्द्रपदाब्जभृंगः श्रीजोमणस्तदनुजो भुवि लाहिदेवः ।
........कलाविलसैः राज्ञां मनांसि महतामपि रंजितानि ॥ छ ॥ २२० ॥ छ ॥

तत्र श्री...... जोमणस्य दुहिता जाता गुणाग्रेसरा
धर्मारामतरोः प्रवर्द्धनसुधाकुल्यैकपुण्योदका ।
श्रीसर्वज्ञपदारविंदनिरता सद्दानचिंतामणि-
श्चारित्रव्रतदेवतासु विदिता श्रीवाइदे...... ॥ २२१ ॥

ताभ्यामिंदुमुखो विचारवसतिः सौजन्यपुण्याकृति-
र्नानाशास्त्रविनोदमेदुरमना.......... ।
...........कर्णरसायनैर्गुणगणैर्विस्मापितक्ष्मातलः
क्षोणीपीठसुरद्रुमः स्थिरयशाः श्रीनेमि....... ॥ २२२ ॥

प्रातः श्रीजिनपूजनेन विधिना मध्याह्नकालेऽप्ययं
दाननाद्भुतकीर्त्तिनो मुनिजनाशीर्वाद....... ।
....स्य स्वयं
नित्यं पुण्यदिनः स नंदतु चिरं श्रीनेमिदेवः सुधीः ॥ २२३ ॥ छ ॥

तेना...................................... ।
.......................णेनाहं वशीकृतमनोरथः ॥ छ ॥ २२४ ॥

ततो व्यावृत्य निःशेषव्यापा.................. ।
.... ॥ २२५ ॥

ततस्तस्य प्रसादेन वीतचिंताभरादहम् ।
जिनेश्वरपदद्वंद्वस्मरणक्षालिता........... ॥ २२६ ॥

....दरो
नानाशास्त्रविचारकोविदमतिः श्रीवामदेवः कृती ।
चक्रे शास्त्रमिदं विनष्ट.......................
.........................द्दविक्ष्मातलम् ॥ २२७ ॥

यो नित्यं पठति स्वयं गुरुजनाद् ज्ञात्वा परान् पाठयेत्
यो.........................

*

No. 140 Vītarāgastotra वीतरागस्तोत्र

Folios – 70 to 99
Language – Sanskrit
Author – Hemacandrācārya
Size – 12 × 1·7 inches
Condition – Good
Age of MS. – c. End of 13th cent V. S.

*

No. 141 (1) Bṛhatsaṅgrahaṇīprakaraṇa
(१) बृहत्संग्रहणीप्रकरण

Folios – 65
Language – Prakrit
Author – Jinabhadragaṇi Kṣamāśramaṇa
Age of MS. – c. First half of 13th cent. V. S.
Extent – Gāthās 271
Size – 9 × 1·5 inches
Condition – Good

(2) Jambūdvīpakṣetrasamāsaprakaraṇa
(२) जंबूद्वीपक्षेत्रसमासप्रकरण

Folios – 65 to 77
Language – Prakrit
Age of MS. – c. First half of 13th cent. V. S.
Extent – Gāthās 88
Size – 9 × 1·5 inches
Condition – Good

*

No. 142 Jīvasamāsaprakaraṇa with Commentary
जीवसमासप्रकरण सटीक

Folios – 194
Language – Prakrit & Sanskrit
Commentator – Maladhārī Hemacandrasūri
Age of MS. – V. S. 1165
Extent – Granthas 6627
Size – 26 × 2 inches
Condition – Good
General Remarks – Folio 112 missing. Folio 194 contains two nice decorative pictures.

आदिः—

॥ ॐ नमो वीतरागाय ॥

यः स्फारकेवलकरैर्जगतां निहत्य हार्दं तमः प्रकटिताखिलतत्त्ववस्तुः ।
नित्योदितो सुरवरैः स्तुतपादपद्मोऽपूर्वो रविर्विजयते स जिनेन्द्रवीरः ॥ १ ॥
प्रणमामि चरणयुगलं तेषां श्रीगौतमादिसूरीणाम् ।
यैर्जलदैरिव वृष्टं सूत्रजलैर्भव्यवसुधासु ॥ २ ॥
कामधेनुरिवाशेषकामितार्थप्रसाधनी ।
या स्तुता सर्वगीर्वाणैः स्तौमि तां श्रुतदेवताम् ॥ ३ ॥

विशेषतश्च नत्वाऽऽत्मगुरूणां पदपंकजम् ।
वृत्तिं जीवसमासस्य वीतविघ्नः प्रवक्ष्यहम् ॥ ४ ॥

तत्र चायुर्वलमेधादिभिरपचीयमानान् साम्प्रतकालीनजंतून् समवलोक्य तदनुग्रहार्थमन्यत्र विस्तराभिहितान् जीवगुणस्थानादिकान् भावान् संक्षिप्य प्रतिपादयितुं जीवसमाससंज्ञितं प्रकरणं चिकीर्षुराचार्यो निःशेषप्रत्यूहोपशमाय मङ्गलगर्भां प्रेक्षावत्प्रवृत्त्यर्थं सम्बंधाभिधेयप्रयोजनगर्भां च गाथामाह—

दस चोद्दस य जिणवरे चोद्दसगुणजाणए नमंसित्ता ।
चोद्दसजीवसमासे समासओऽणुक्कमिस्सामि ॥

अंतः—

एकैकस्यापि प्रदेशस्यानुगतव्यावृत्तानन्तपर्यायात्मकत्वादिति गाथार्थः ॥ छ ॥ २८७॥ तदेवमन्या अपि प्रक्षेपगाथाः सिद्धान्तानुसारेण व्याख्येयाः। जीवसमासवृत्तिः समाप्ता ॥ * ॥

यद् वृत्ताविह वस्तु प्रायस्तत् समयसागराल्लिखितम् ।
मन्मतिदोषाद् दुष्टं तथापि शोध्यं बुधैः सर्वम् ॥
जीवसमासस्यैतां वृत्तिं कृत्वा मयाऽऽपि यत् पुण्यम् ।
जीवादितत्त्वमधिगम्य तेन शिवमाप्नुवन्तु जनाः ॥

श्रीप्रश्नवाहनकुलाम्बुनिधिप्रसूतः क्षोणीतलप्रथितकीर्तिरुदीर्णशाखः ।
विश्वप्रसाधितविकल्पितवस्तुरुच्चैः० ॥ १ ॥ इत्यादि [क्रमांक ३९]
श्रीहेमचन्द्रसूरिभिरियमनुरचिता प्रकृतवृत्तिः ॥ १० ॥

प्रत्यक्षरगणनया चात्र सर्वग्रन्थाग्रमनुष्टुभां षट् सहस्राणि षट् शताधिकानि सप्तविंशतिः श्लोकाः ॥ ॥ अंकतोऽपि ६६२७ ॥ छ ॥ संवत् ११६५ चैत्र शुदि ५ सोमेऽद्येह श्रीमदणहिलपाटके समस्तराजावलीविराजितमहाराजाधिराजपरमेश्वरश्रीमज्जयसिंहदेवकल्याणविजयराज्ये एवं काले प्रवर्त्तमाने यमनियमस्वाध्यायध्यानानुष्ठानरतपरमनैष्ठिक पण्डित श्वेताम्बराचार्य भट्टारक श्रीहेमचन्द्राचार्येण पुस्तिका लि. लि. ॥

*

No. 143 (1) Tattvārthādhigamaśāstravṛtti

(१) तत्त्वार्थाधिगमशास्त्रवृत्ति

Folios – 340
Language – Sanskrit
Author – Siddhasenasūri
Age of MS. – V. S. 1445

Extent – Granthas 18282
Size – 33·7 × 2·2 inches
Condition – Fair

आदिः—

वीरं प्रणम्य सर्वज्ञं तत्त्वार्थस्य विधीयते ।
टीका संक्षेपतः स्पष्टा मंदबुद्धिविबोधिनी ॥ १ ॥

सम्यगर्हत्प्रवचनमधिगम्य कालसंहननश्रद्धावपुरादेः परिहाणिमवलोक्य सत्त्वानुकंपया समासतो मोक्षमार्गमुपदेष्टुकाम आचार्य इदमाह—

सम्यदर्शनशुद्धं यो ज्ञानं विरतिमेव चाप्नोति ।........
दर्शनशुद्धमिति कतरो विग्रह आस्थीयते ॥

अंतः—

तत्रोक्तं सोऽव्याबाधसुलक्षणमनंतमनुपमं परमार्थं मोक्षमचिरेण प्राप्स्यतीति ॥ ७ ॥

आसीद्दिन्नगणी क्षमाश्रमणतां प्राप क्रमेणैव यो
विद्वत्सु प्रतिभागुणेन जयिना प्रख्यातकीर्तिर्भृशम् ।
वोढा शीलभरस्य सच्छ्रुतनिधिर्मोक्षार्थिनामग्रणीः
जज्वालामलमुच्चकैर्निजतपस्तेजोभिरव्याहतम् ॥ १ ॥

यत्र स्थितं प्रवचनं पुस्तकनिरपेक्षमक्षतं विमलम् ।
शिष्यगणसंप्रदेयं जिनेन्द्रवक्त्राद्विनिष्क्रान्तम् ॥ २ ॥

तस्याऽभूत् परवादिनिर्जयपटुः सैंहीं दधच्छूरतां
नाम्ना व्यज्यत सिंहसूर इति च ज्ञाताखिलार्थागमः ।
शिष्यः शिष्टजनप्रियः प्रियहितव्याहारचेष्टाश्रयाद्
भव्यानां शरणं भवौघपतनक्लेशार्दितानां भुवि ॥ ३ ॥

निर्धूततमःसंहतिरखंडमंडलशशांकसच्छाया ।
अद्यापि यस्य कीर्त्तिर्भ्रमति दिगंतानविश्रांता ॥ ४ ॥

शिष्यस्तस्य बभूव राजकशिरोरत्नप्रभाजालक-
व्यासंगच्छुरितस्फुरन्नखमणिप्रोद्भासिपादद्वयः ।
भास्वामीति विजित्य नाम जगृहे यस्तेजसां संपदा
भास्वंतं भवनिर्जयोद्यतमतिर्विद्वज्जनाग्रेसरः ॥ ५ ॥

क्षमया युक्तोऽतुल्या समस्तशास्त्रार्थविन्महाश्रमणः ।
गच्छाधिपगुणयोगाद्गणाधिपत्यं चकारार्घ्यम् ॥ ६ ॥

तत्पादरजोऽवयवः स्वल्पागमधीमुषीकबहुजाड्यः ।
तत्त्वार्थशास्त्रटीकामिमां व्यधात् सिद्धसेनगणिः ॥ ७ ॥

अष्टादश सहस्राणि द्वे शते च तथाऽपरे ।
अशीतिरधिका द्वाभ्यां टीकाया [ग्रन्थ]संग्रहः ॥ ८ ॥
ग्रंथाग्रं १८२८२ ॥ तत्त्वार्थटीका समाप्ता ॥ छ ॥

(2) Tattvārthādhigamaśāstra

(२) तत्त्वार्थाधिगमशास्त्र—मूल

Folios – 340 to 343
Language – Sanskrit
Author – Umāswāti Vācaka
Age of MS. – V.S. 1445
Size – 33·7 × 2·2 inches
Condition – Fair

आदिः—

सिद्धिः ॥ ॐ नमो वीतरागाय ॥
मोक्षमार्गस्य नेतारं भेत्तारं कर्मभूभृताम् ।
ज्ञातारं विश्वतत्त्वानां वन्दे तद्गुणलब्धये ॥ १
सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः १ ।

अंतः—

क्षेत्रकालगतिलिंगतीर्थचारित्रप्रत्येकबुद्धबुद्धबोधितज्ञानावगाहनान्तरसंख्याल्पबहुत्वतः साध्याः ॥ इति तत्त्वार्थाधिगमे मोक्षशास्त्रे दशमोऽध्यायः ॥ छ ॥

(3) Tattvārthādhigamaśāstra with Svopajña Bhāṣya

(३) तत्त्वार्थाधिगमशास्त्र – स्वोपज्ञभाष्य सहित

Folios – 343 to 383
Language – Sanskrit
Author & Commentator – Umāsvātivācaka
Age of MS. – V.S. 1445
Size – 33·7 × 2·2 inches
Condition – Fair

आदिः—

॥ ॐ नमः सिद्धेभ्यः ॥
सम्यग्दर्शनशुद्धं यो ज्ञानं विरतिमेवं चाप्नोति ।
दुःखनिमित्तमपीदं तेन सुलब्धं भवति जन्म ॥

अन्तः —

प्राप्स्यत्यचिरेण परमार्थम् ॥ छ ॥ तत्त्वार्थाधिगमे जिनप्रवचनसंग्रहे भाष्यतः दशमोऽध्यायः समाप्तः ॥ छ ॥ छ ॥ संवत् १४४५ वर्षे अश्विन सुदि ४ गुरौ अद्येह श्रीस्तंभती......

*

No. 144 Karmaprakṛtiprakaraṇa with Commentary

कर्मप्रकृतिप्रकरण सटीक

Folios – 276
Language – Prakrit & Sanskrit
Author – Śivaśarmasūri
Commentator – Ācārya Malayagiri

Extent – Gāthās 475
Size – 26·7 × 1·5 inches
Age of MS. – V.S. 1451
Condition – Good

आदिः—

॥ ॐ नमो वीतरागाय ॥

प्रणम्य कर्मद्रुमचक्रनेमिं नमत्सुराधीशमरिष्टनेमिम् ।
कर्मप्रकृत्याः कियतां पदानां सुखावबोधाय करोमि टीकाम् ॥ १
अयं गुणश्चूर्णिकृतः समग्रो यदस्मदादिर्वदतीह किंचित् ।
उपाधिसम्पर्कवशाद्विशेषो लोकेऽपि दृष्टः स्फटिकोपमस्य ॥ २

इह शिष्टाः क्वचिदिष्टे वस्तुनि प्रवर्त्तमानाः सन्त इष्टदेवतानमस्कारपुरस्सरमेव प्रवर्त्तन्ते ।

अंतः—

कर्मप्रपंचं जगतोऽनुबन्धक्लेशावहं वीक्ष्य कृपापरीतः ।
क्षयाय तस्योपदिदेश रत्नत्रयं स जीयाज्जिनवर्द्धमानः ॥ १
निरस्तकुमतध्वान्तं सत्पदार्थप्रकाशकम् ।
नित्योदयं नमस्कुर्मो जैनं सिद्धान्तभास्करम् ॥ २
पूर्वान्तर्गतकर्मप्रकृतिप्राभृतसमुद्धृता येन ।
कर्मप्रकृतिरियमतः श्रुतकेवलिगम्यभावार्था ॥ ३
ततः क्वैषा विषमार्थयुक्ता क्व चाल्पशास्त्रार्थकृतश्रमोऽहम् ।
तथापि सम्यग्गुरुसम्प्रदायात् किंचित् स्फुटार्था विवृता मयैषा ॥ ४
कर्मप्रकृतिनिधानं बह्वर्थं येन मादृशां योग्यम् ।
चक्रे परोपकृतये श्रीचूर्णिकृते नमस्तस्मै ॥ ५
एनामतिगम्भीरां कर्मप्रकृतिं विवृण्वता कुशलम् ।
यदवापि मलयगिरिणा सिद्धिं तेनाश्नुतां लोकः ॥ ६
अर्हन्तो मंगलं मे स्युः सिद्धाश्च मम मंगलम् ।
मंगलं साधवः सम्यग् जैनो धर्मश्च मंगलम् ॥ ७ ॥ इति ॥ छ ॥

संवत् १४५१ वर्षे फागुण वदि १२ बुधे अद्येह स्तम्भतीर्थे कर्मप्रकृति-वृत्तिपुस्तिका लिखितमस्ति ॥ छ ॥ शुभं भवतु ॥

*

No. 145 Pañcasaṅgraha with Commentary–Part I

पंचसंग्रह सटीक—प्रथमखंड

Folios – 269
Language – Prakrit & Sanskrit
Author – Candrarṣi Mahattara
Commentator – Ācārya Malayagiri
Age of MS. – c. End of 13th cent. V.S.
Extent – Granthas 4631
Size – 16 × 2 inches
Condition – Fair
General Remarks – A broken leaf contains the following words:

"श्रीमलयगिरिकृत पंचसंग्रहटीका पु. १ । ग्रंथाग्रं ४६३१ ।
पत्र २७०–पटयड सा० आसधररत्नसिंहयोः ॥"

*

No. 146 Śatakapañcamakarmagranthacūrṇi

शतकपंचमकर्मग्रंथचूर्णि

Folios – 120
Language – Prakrit
Author – Candrarṣi Mahattara
Age of MS. – c. Latter half of 12th cent. VS.
Size – 14 × 2·2 inches
Condition – Good

आदिः—

सिद्धो निद्धुयकंमो सद्धम्मपणायगो तिजगनाहो ।
......................द्धसक्कारा ।
सव्वजगमज्झयारे सुयकेवलिणो जयंति सया ॥
जिणवरमुहसंभूया गण.......................... ।
......................सुयदेवी सया जयउ ॥

अन्तः—

....................ष्टा येषां प्रसादाद्वरधर्मलाभः ।
सज्ज्ञानसम्पद्विमला च दृष्टिः लोके महत्त्वं सुगतिस्सका.... ॥
........॥ छ ॥ * ॥ कृतिराचार्यश्रीचंद्रमहत्तरंशितांबरस्य शतकस्य ग्रंथस्य ॥
प्रशस्तचू........वदि ६ शनौ पुस्तिका लिखितेति ॥ छ ॥

*

No. 147 Āgamikavastuvicārasāraprakaraṇa with Commentary–Fourth Ancient Karmagrantha

आगमिकवस्तुविचारसारप्रकरण—चतुर्थ प्राचीन कर्मग्रंथ—सटीक

Folios – 69
Language – Prakrit & Sanskrit
Author – Jinavallabhagaṇi
Commentator – Haribhadrasūri of Bṛhadgaccha
Age of MS. – V. S. 1216

Extent – Granthas 850
Size – 14 × 2 inches
Date of Composition – V.S. 1172

आदिः—

॥ ॐ ॥

नत्वा जिनं विधास्ये विवृतिं जिनवल्लभप्रणीतस्य ।
आगमिकवस्तुविस्तरविचारसारप्रकरणस्य ॥ १ ॥

इह जिनवल्लभगणिनामा सूत्रकारो गणधरदेवादिनिबद्धातिगंभीरशास्त्रार्थावगाहनाऽसमर्थानां विशिष्टसंहननायुर्मेधादिविकलानां कलिकालोत्पन्नमानवानामनुग्रहाय सूक्ष्मार्थसार्थप्रकाशनार्थं प्रस्तुतप्रकरणं चिकीर्षुर्मंगलादिप्रतिपादकमिदमादौ गाथाद्वितयमाह ।

अन्तः—

इत्यागमिकवस्तुविचारसारप्रकरणवृत्तिः समाप्ता ॥ छ ॥ * ॥

प्रायोऽन्यशास्त्रदृष्टः सर्वोऽप्यर्थो मयाऽत्र संरचितः ।
न पुनः स्वमनीषिकया तथापि यत् किंचिदिह वितथम् ॥ १ ॥

सूत्रमतिलंघ्य लिखितं तच्छोध्यं मय्यनुग्रहं कृत्वा ।
परकीयदोषगुणयोस्त्यागोपादानविधिकुशलैः ॥ २ ॥

छद्मस्थस्य हि बुद्धिः स्खलति न कस्येह कर्मवशगस्य ।
सद्बुद्धिविरहितानां विशेषतो मद्विधासुमताम् ॥ ३ ॥

कृत्वा यद् वृत्तिमिमां पुण्यं समुपार्जितं मया तेन ।
मुक्तिमचिरेण लभतां क्षपितरजाः सर्वभव्यंजनः ॥ ४ ॥

मध्यस्थभावादचलप्रतिष्ठः सुवर्णरूपः सुमनोनिवासः ।
अस्मिन् महामेरुरिवास्ति लोके श्रीमान् वृहद्गच्छ इति प्रसिद्धः ॥ ५ ॥

तस्मिन्नभूदायतबाहुशाखः कल्पद्रुमाभः प्रभुमानदेवः ।
यदीयवाचो विबुधैः सुबोधाः कर्णे कृता नूतनमंजरीव ॥ ६ ॥

तस्मादुपाध्याय इहाऽजनिष्ट श्रीमान् मनस्वी जिनदेवनामा ।
गुरुक्रमाराधयताल्पबुद्धिस्तस्यास्ति शिष्यो हरिभद्रसूरिः ॥ ७ ॥

अणहिल्लपाटकपुरे श्रीमज्जयसिंहदेवनृपराज्ये ।
आशापूरवसत्यां वृत्तिस्तेनेयमारचिता ॥ ८ ॥

एकैकाक्षरगणनादस्या वृत्तेरनुष्टुभां मानम् ।
अष्टौ शतानि जातं पंचाशत्समधिकानीति ॥ ९ ॥

वर्षशतैकादशके द्वासप्तत्याधिके नभोमासे ।
सितपंचम्यां सूर्ये समर्थिता वृत्तिकेयमिति ॥ छ ॥

इति षडशीतिप्रकरणवृत्तिः समाप्ता ॥ छ ॥ ॥ छ ॥ मंगलं महाश्रीः ॥ छ ॥
संवत् १२१६ वर्षे ज्येष्ठ शुदि ६ शुक्रे ॥ छ ॥

*

No 148 Six Karmagranthas with Commentary

कर्मग्रन्थषट्क सटीक

Folios – 271
Language – Prakrit & Sanskrit
Author & Comm. of first 5 – Devendrasūri
Commentator of the 6th – Ācārya Malayagiri

Extent – Granthas 14000
Size – 33·2 × 1·7 inches
Condition – Good
Age of MS. – V. S. 1447

आदिः—

॥ ॐ नमः प्रवचनाय ॥

दिनेशवद् ध्यानवरप्रतापैरनंतकालप्रचितं समंतात् ।
योऽशोषयत्कर्मविपाकपंकं देवो मुदे वोऽस्तु स **वर्द्धमानः** ॥ १ ॥

ज्ञानादिगुणगुरूणां धर्मगुरूणां प्रणम्य पदकमलम् ।
कर्मविपाके विवृतिं स्मृतिबीजविवृद्धये विदधे ॥ २ ॥

तत्रादावेवाभीष्टदेवतास्तुत्यादिप्रतिपादिकामिमां गाथामाह ॥ छ ॥

सिरिवीरजिणं वंदिय **कम्मविवागं** समासओ वुच्छं ।
कीरइ जिएण हेऊहिं जेण तो भन्नए कम्मं ॥ १ ॥

अन्तः—

निरुपममनंतमनघं शिवपदमधिरूढमपगतकलंकं ।
दर्शितशिवपुरमार्गं **वीरजिनं** नमत परमशिवं ॥ १ ॥

यस्योपांतेऽपि संप्राप्ते प्राप्यन्ते संपदोऽनघः ।
नमस्तस्मै जिनेशश्रीवीरसिद्धांतसिंधवे ॥ २ ॥

यैरेषा विषमार्था सप्ततिका सुस्फुटा कृता सम्यक् ।
अनुपकृतपरोपकृतश्चूर्णिकृतस्तान् नमस्कुर्वे ॥ ३ ॥

प्रकरणमेतद्विषमं सप्ततिकाख्यं विवृण्वता कुशलम् ।
यदवापि मलयगिरिणा सिद्धिं तेनाश्नुतां लोकः ॥ ४ ॥

अर्हंतो मंगलं सिद्धा मंगलं संयतानहम् ।
अशिश्रियं जिनाख्यातं धर्मं परममंगलम् ॥ ५ ॥

इति श्रीमलयगिरिविरचिता सप्ततिकाटीका समाप्ता । ग्रंथाग्रं ३८८० ॥छ॥

ॐ ॥ ऊकेशवंशभूषण सा० पद्मसुत सा० वीजडभार्या वीकमदे तत्सुता श्रा० सारूनाम्नी सा० आमसीहसुत सा० धर्मसीहभार्या सर्वदा नानाविधपुण्यकृत्य-परायणा श्रीमत्तपागच्छमंडनसुविहितचक्रचूडामणिभट्टारकश्रीदेवसुंदरसूरीणामुपदेशेन स्व-श्रेयसे नव्यकर्मग्रन्थवृत्तिपुस्तकं श्रीविक्रमनृपसंवत् १४४७ वर्षे लेखयामास । आचंद्रार्कं पुस्तकोऽयं बुधैर्वाच्यमानो नंदतात् ॥ छ ॥ कर्मग्रंथ १४००० टीका ॥

*

No. 149 : (1) Karmastava Karmagrantha Ṭīkā
Second Ancient Karmagrantha-Commentary

(१) कर्मस्तव कर्मग्रन्थ टीका-प्राचीन द्वितीय कर्मग्रन्थ टीका

Folios – 94
Language – Sanskrit
Author – Govindagani
Age of MS. – c. First half of 15th cent. V. S.
Extent – Granthas 1090
Size – 13·2 × 1·5 inches
Condition – Good

आदिः —

॥ ॐ नमः सर्वज्ञाय ॥

कर्मबंधोदयोदीर्यासत्तावैचित्र्यवेदिनम् ।
कर्मस्तवस्य टीकेयं नत्वा वीरं विरच्यते ॥ १ ॥

नमिऊणेत्यादि । पूर्वार्द्धेन मंगलार्थमिष्टदेवतानमस्कारमाह । मंगलमविघ्नेन प्रकरणसमाप्त्यर्थं । पश्चार्द्धेन प्रयोजनादि त्रयमिति गाथासमुदायार्थः ।

अन्तः—

स्मृत्यनुसारेण मया यद्गदितमिहोनमधिकमागमतः ।
तत् क्षंतव्यं श्रुतशुद्धबुद्धिभिः शोधनीयं च ॥ १ ॥

इति श्वेतपटाचार्यगोविंदगणिना कृता ।
कर्मस्तवस्य टीकेयं देवनागगुरोर्गिरा ॥ २ ॥ छ ॥
समाप्ता चेयं कर्मस्तवटीका ॥ छ ॥

अनुष्टुप् छन्दसां प्रायः संकलय्याऽनुवर्णितम् ।
सहस्रमेकं श्लोकानां नवत्युत्तरमेव तु ॥

शिवमस्तु सर्वजगतः लेखकपाठकवाचकानां ॥ छ ॥ मंगलं महाश्रीः ॥ छ ॥

(2) Karmavipāka Karmagrantha with Vrtti–Ancient

(२) कर्मविपाक कर्मग्रन्थ वृत्ति सह–प्राचीन

Folios – 95 to 163
Language – Prakrit & Sanskrit
Author – Gargarṣi
Commentator – Paramānandasūri
Age of MS. – c. first half of 15th cent. V.S.
Extent – 922 Vṛtti granthas
Size – 13.2 × 1.5 inches
Condition – Good

आदिः—

॥ ॐ नमः सर्वविदे ॥

निःशेषकर्मोदयमेघजालमुक्तो दिनाधीश इवोग्रतेजाः ।
प्रदर्शिताशेषपदार्थसार्थो मुदेऽस्तु नः श्रीजिनवर्द्धमानः ॥ १ ॥

अन्तः—

श्रीभद्रेश्वरसूरिशिष्यतिलकश्रीशांतिसूरिप्रभोः
श्रीमंतोऽभयदेवसूरिगुरवः सिंहासनोत्तंसकाः ।
तत्पादांबुजषट्पदेन परमानंदेन सत्प्रीतये
चक्रे कर्मविपाकवृत्तिमिषतः श्रोत्रैकलेह्यं मधु ॥ १ ॥

यन्नागमानुगामि स्यान्न वा संगतिमंगति ।
इह तत्साधुभिः शोध्यमनभ्यर्थितवत्सलैः ॥ २ ॥

प्रत्यक्षरं निरूप्यास्य ग्रंथाग्रं परिनिश्चितम् ।
अनुष्टुभां नवशती द्वाविंशत्यधिका भवेत् ॥ ३ ॥

अंकतो ९२२ कर्मविपाकवृत्तिः समाप्तेति ॥ छ ॥

*

No. 150 : Bṛhatsaṅgrahaṇīprakaraṇa with Commentary

बृहत्संग्रहणीप्रकरण सटीक

Folios – 2 to 245
Size – 13 × 2 inches.

Language – Prakrit & Sanskrit
Author – Jinabhadragaṇi Kṣamāśramaṇa
Commentator – Ācārya Malayagiri
Condition – Good
Age of MS. – V.S. 1287

अन्तः—

॥ इति श्रीमलयगिरिविरचिता संग्रहणीटीका समाप्ता ॥

अर्हन्तः शरणं सिद्धाः शरणं साधवो मम ।

शरणं शरणं धर्मस्तान् शरणमशिश्रियम् ॥ छ ॥

मंगलं महाश्रीः ॥ छ ॥ संवत् १२८७ वर्षे वैशाप शुदि २ गुरौ इहैव वीजापुरीयश्रावकपौषधशालायां पूज्यश्रीदेवेंद्रसूरि श्रीविजयचन्द्रसूरि उपाध्यायश्रीदेवभद्रगणिसद्गुरूणां धर्मोपदेशतः सा. रतनपाल श्रे० वील्हण ठ० आसपाल सा० लाहड प्रभृतीनां संघयणिवृत्ति पुस्तिका लिखापिताः ॥ छ ॥

*

No. 151: <u>Śrīcandrīya Saṅgrahaṇīprakaraṇa with Commentary</u>

श्रीचन्द्रीय संग्रहणीप्रकरण सटीक

Folios – 360
Language – Prakrit & Sanskrit
Author – Śrīcandrasūri
Commentator – Devabhadrasūri
Age of MS. – c. latter half of 13th cent. V.S.
Extent – Granthas 3500
Size – 17.5 × 1.2 inches
Condition – Good

आदिः—

॥ ॐ नमः सर्वज्ञाय ॥

अत्यद्भुतं योगिभिरप्यगम्यं विधूतनिःशेषतमोवितानम् ।
अचिंत्यमाहात्म्यमजं निरंजनं ज्योतिर्जयत्येकमनंतमव्ययम् ॥ १ ॥

यस्यामृतैर्वचोभिर्जीवत्यद्यापि भव्यलोकोऽयम् ।
स जयत्यागमजलधिर्जिनभद्रगणिः क्षमाश्रमणः ॥ २ ॥

प्रसन्नगंभीरपदाहितक्रमा मिताक्षरा वर्जितपौनरुक्त्या ।
यैर्निर्मिता संग्रहणीयमद्भुता नमो नमस्तत्पदपंकजेभ्यः ॥ ३ ॥

इह तावच्छास्त्रादौ संक्षिप्तरुचिना प्रायः शिष्टसमयानुवृत्तये विघ्नोपशांतये च परममंगलालयोऽभीष्टदेवतास्तवः ।

अन्तः—

तदेवं व्याख्याता चतुर्विंशतिद्वारात्मिका गाथाद्वयप्रमाणा संक्षिप्ततरा संग्रहणिस्तद्याख्यानाच्च श्रीहर्षपुरीयगच्छालंकारमलधारिश्रीमदभयदेवसूरिपट्टरत्नश्रीहेमचंद्रसूरिशिष्यश्रीचंद्रसूरिचरणांबुजचंचरीकेण श्रीमुनिचंद्रसूरिभ्यो लब्धप्रतिष्ठेन श्रीदेवभद्रसूरिणा विरचिता स्वगुरुप्रणीतसंग्रहण्या वृत्तिः समर्थिता ॥ छ ॥

अंगान्युपांगानि तथा पराणि विलोक्य शास्त्राणि गुरूपदेशात् ।
विनिर्मिता वृत्तिरियं तथापि शोध्यं यदि स्याद्विबुधैर्विशोध्यम् ॥ १ ॥

निजगुरुपदभक्तेः कुर्वतो वृत्तिमेनां मम॰समजनि पुण्यं यत्ततो भव्यलोकः ।
जिनपतिमतपोतात्तीर्णसंसारसिंधुर्व्रजतु शिवमनंतज्ञानदृग्वीर्यसौख्यम् ॥ २ ॥

प्रत्यक्षरगणनातो ग्रंथमानं विनिश्चितम् ।
पंचत्रिंशच्छतान्यत्र श्लोकानां सर्वसंख्यया ॥ ३ ॥ छ ॥

इति श्रीलघुसंग्रहणिवृत्तिः समाप्ता ॥ छ ॥

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ १ ॥

अक्षरमात्रपदस्वरहीनं व्यंजनसंधिविवर्जितरेफम् ।
साधुभिरेव मम क्षमितव्यं कोऽत्र न मुह्यति शास्त्रसमुद्रे ॥ २ ॥

भग्नपृष्ठिकटिग्रीवा स्तब्धदृष्टिरधोमुखम् ।
कष्टेन लिखितं शास्त्रं यत्नेन प्रतिपालयेत् ॥ ३ ॥ छ ॥ शुभं भवतु ॥ छ ॥

*

No. 152 : Caityavandanabhāṣya with Saṅghācāravṛtti
चैत्यवन्दनभाष्य संघाचारवृत्ति सहित

Folios – 272
Language – Prakrit & Sanskrit
Author – Devendrasūri
Commentator – Dharmaghoṣasūri
Age of MS. – c. Latter half of 13th cent. V.S.
Size – 33 × 2·5 inches
Condition – Good

आदिः—

॥ ॐ नमः प्रवचनाय ॥

देवेन्द्रवृंदस्तुतपादपद्मः स्वर्भूर्भुवःश्रीवरकेलिसद्म ।
संदेहसंदोहरजःसमीरः स वः शिवायाऽस्तु जिनेन्द्रवीरः ॥ १ ॥

चैत्यमुनिवंदनप्रभृतिभाष्यविवृतेर्यथाश्रुतं किंचित् ।
संघस्याचारविधिं वक्ष्ये स्वपरोपकाराय ॥ २ ॥

इह हि दुरंतानंतचतुरंतासारविसारिसंसारापारगभीरपारावारे निमज्जता भव्यजंतुना जिनप्रवचनप्रतीतचोल्लकादिदशनिदर्शनदुःप्रापां कथमपि प्रशस्तसमस्तमनुजजन्मादिसामग्रीमवाप्य भवजलधिसमुत्तरणप्रवणप्रवहणसधर्मसद्धर्मविधाने प्रयत्नो विधेयः ॥

अंतः—

अंगोपांग-प्रकीर्णोल्लसदपि भणित-च्छेद-सन्मूलकर्मग्रंथेत्यादिस्वरूपश्रुतजलधिविधिप्रावगाहप्रवीणान् ।

श्रीमद्देवेन्द्रसूरेर्विविधविधियुत.......
रार्थप्रथितकथपथः शेषविध्यादिवर्ण्णी ॥ १ ॥

इति श्रीसंघस्य प्रतिदिनमवश्यं कृतिविधौ सुधर्मानुष्ठाने प्रकटमधिकारः प्रथमकः ।
सदाऽर्हच्चैत्यानां विहितविधिवद्वंदनवरः श्रुतादाम्नायाच्च प्रकृतविवृतिः पारमगमत् ॥ २ ॥

इति श्रीदेवेन्द्रसूरिशिष्यमहोपाध्यायश्रीधर्मकीर्त्तिकीर्त्तिते प्रतिदिनावश्यकृत्यश्रीसंघाचारविधिनाम्नि चैत्यवंदनादिविवरणे चैत्यवंदनाविधानाभिधानप्रथमाधिकारे चैत्यवंदनाविशेषविधिस्वरूपादिवर्णनो नाम चतुर्थः प्रस्तावः ॥ छ ॥

एवं समर्थितश्चैत्यवंदनाविधिनामा प्रथमोऽधिकारः ॥ छ ॥
जयति श्रीजिनशासनमुदितश्रुतधर्मघोषसुविशुद्धि ।
यत्र सदाऽपि हि साधुः प्रवरप्रल्हादनपुरस्तात् ॥ १ ॥

श्रीधर्मकीर्त्तिकर्त्ता गौरव्योऽन्योऽपि धर्मघोष इव ।
श्रुतदुग्धाद्युपलब्धिः किमु सच्चरणाध्वनीनस्तु ॥ २ ॥

सर्वज्ञाख्यः पिता यस्य गुरुर्गीष्पतिनामतः ।
निरवद्यसर्वविद्यानंदयो विश्वनंदये ॥ ३ ॥

शुद्धक्रियादिसंश्लेषशालिनस्तस्य काव्यराजस्य ।
लघुबंधोर्वृत्तिरियं स्वपरोपकृतौ कृतार्थोऽस्तु ॥ ४ ॥

अर्हन्तो मम मंगलं विदधतां देवेन्द्रवंद्यक्रमा
विद्यानंदमयास्तु मंगलमलं कुर्वन्तु सिद्धा मयि ।

मह्यं मंगलमस्तु साधुनिकरः सद्धर्मकीर्त्तौ स्थितो
मंगल्यं श्रुतधर्मघोषणपरं धर्मं सुदृग्भिः श्रये ॥ ५ ॥ छ ॥

शुभं भवतु लेखकपाठकयोः ॥ मंगलं महाश्रीः ॥ छ ॥

*

No. 153: Siddhajayantīprakarana with Commentary-Jayantīcaritra
सिद्धजयन्तीप्रकरण—सटीक—जयन्तीचरित्र

Folios – 172
Language – Prakrit & Sanskrit
Author – Mānatuṅgasūri
Commentator – Malayaprabhasūri
Size – 31 × 2.2 inches
Condition – Good
Date of Composition – 1260 V.S.
Age of MS. – V.S. 1261

आदिः—

॥ ॐ नमो वीरजिनाय ॥

सर्वाशाः परिपूर्णतां वसुचयैः संप्रापयन्नन्वहं
जीवाजीवविचारकैरववनप्रोद्बोधचन्द्रोदयः ।
धर्माधर्मविवेकदुग्धजलधेर्वृद्धिं दधानोऽधिकां
स श्रीनाभिनृपांगजो जिनपतिस्तादिष्टसंसिद्धये ॥ १ ॥

यः कल्याणगिरीन्द्रसुंदरवपुर्गोत्राधिकामुन्नतिं
बिभ्राणः शुशुभे ससम्मदसुरैः संसेव्यपादोऽन्वहम् ।
धर्माख्यानविधाननंदनवने प्रोत्फुल्लपुष्पश्रियो
रेजुर्यद्दशनांशवः स भगवान् वीरो जिनः पातु वः ॥ २ ॥

रागद्वेषविषौषधीकल्मिमलप्रक्षालनस्वर्धुनी-
मोक्षाध्वप्रतिपन्नभव्यभाविनां हस्तस्फुरद्दीपिका ।
ज्ञानादित्रयरत्नभूमिरखिलव्यामोहनिर्नाशिनी
यद्वाणीविभवो भवंतु शिवदास्तेऽन्येऽपि तीर्थेश्वराः ॥ ३ ॥

यत्प्रज्ञाप्रसरेऽतिशायिनि तथा प्रालेयशैलोज्ज्वले
जैनी गौरचरत् त्रिपद्यपि यथा सद्यः पदैः कोटिशः ।
अंगोपांगमहोदया समभवत् त्रैलोक्यसंचारिणी
वंद्योऽसौ गणभृज्जगत्त्रयगुरुर्नाम्नेन्द्रभूतिः सताम् ॥ ४ ॥

हस्ताक्षमालामणिसाम्यभाजः सूत्रानुगानुज्ज्वलपूर्णवृत्तान् ।
साधूनिमान् प्रापयतु क्षणेन गीर्देवताऽसौ श्रुतसिंधुपारम् ॥ ५ ॥

प्रत्याशं प्रसरत्प्रभापरिगतो यत्पद्महस्तोऽरुणो
यद्दोषापगमं करोति परितस्तत्सत्यमाभासते ।
आश्चर्यं तु मुनीन्दुतारककविज्योतिःप्रकाशोदयं
धत्ते यत्कुमुदं प्रकाश्य सहसा सौरभ्यलक्ष्म्यास्पदम् ॥ ६ ॥

श्रीमानतुंगसूरीस्तान् जाड्ये सूर्यानुकारिणः ।
गुरून् निजान् नुमो नित्यं श्रीमतो गणधारिणः ॥ ७ ॥

श्रीगच्छाधिपमानतुंगगुरुभिश्चक्रे परार्थोद्यतै-
र्यत्कर्मादिपरार्थसंशयतमःसूर्यप्रभाभासुरम् ।
तत्त्वज्ञानसुधानिधि प्रकरणं यस्मिन् जयंतीकृत-
प्रश्नेपूत्तरदानवाक्यरचना श्रीवर्द्धमानप्रभोः ॥ ८ ॥

स्वगुरुबहुमानजलनिधिवेलां दानादिरत्नरमणीयाम् ।
विवृतिं तस्य विधास्ये सिद्धजयंतीकथां प्रथयन् ॥ ९ ॥

तत्राधिकृताभीष्टदेवतानमस्कारेण समुन्नतशिरसा मंदरमंथानुकारेण निर्मथितेऽन्तरायनीरधौ समुल्लसिताभीष्टसिद्धिसुधास्वादितः सुमनसां स्यादजरामरपदोपलंभ इति संबद्धार्थभणितिभंगीगंगातरंगिणीपरिष्वंगपवित्रांगतयाऽभिगमनीयताकमनीयता स्यादिति अभिधेयवत्ताव्यक्तिमुक्तावलीव श्रोतृपरिषदो हृदयहारितामात्मन्यादधीतेति फलवत्तया च पक्षपातच्छेकतयाऽऽशुकवीनां सहकारवनमिव सानंदप्रवृत्त्यविकलकारणतां प्रपद्येतेति यशःसौरभोद्गारसारसौजन्यादिगुणगणांभोजवनप्ररोहरमणीयशिष्टसमयसरःप्रतिपालनप्रवणपालिप्रबंधशालिनी चेयं नमस्काराद्यर्थाभिधायिका प्रथमगाथा । यथा—

नमिय नमिरामरेसरसिरसेहरमणिमऊहविच्छुरियं ।
वीरचरणारविंदं जयंतियापगरणं वोच्छं ॥ १ ॥

अन्तः—

एवं विणिच्छियट्ठा पहट्ठतुट्ठाऽभिवंदिउं वीरं ।
सामन्नमसामन्नं देवाणंद व्व काऊणं ॥

निद्दलियघाइकम्मा केवलमुप्पाडिऊण य **जयंती** ।
भवघाइकम्महरणा सिवमयलमणुत्तरं पत्ता ।
भगवइबारसमसया बियउद्देसाओ पगरणं एयं ।
सपरोभयसरणत्थं उद्धरियं **माणसूरी**हिं ॥

एवं पूर्वोक्तप्रश्नोत्तरप्रदानेन विनिश्चितार्था निर्णीतार्था अत एव प्रहृष्टतुष्टाऽभिवंद्य**वीरं श्रीवर्द्धमानस्वामिनं** श्रामण्यं श्रमणभावं असामान्यं अनन्यसाधारणं **देवानंदेव** भगवदाद्यजननी ब्राह्मणीव कृत्वा निर्दलितघातिकर्मा केवलमुत्पाद्य च **जयंती** भवघातिकर्महरणा शिवमचलमनुत्तरं प्राप्ता । **भगवती**द्वादशशतात् द्वितीयोद्देशात् प्रकरणमेतत् स्वपरोभयस्मरणार्थमुद्धृतं **मानसूरि**भिः, अवयवे समुदायोपचारात् श्री**मानतुंगसूरि**भिरित्यर्थः ॥ छ ॥

आमूलान्मधुरोऽत्र गच्छगहने तापापहारप्रभु-
नित्यानंदसुपर्वभिः परिचितः स्वर्गश्रिया राजितः ।
प्राग्वाटान्वय इक्षुवाटसुभगो वृद्धिं परां प्रापितो
यैः पूज्यैरतिशायिसंवररसासाराद् घनाभ्युन्नतैः ॥ १ ॥

शिष्यप्रशिष्यैः प्रसृतैर्यदीयैर्गच्छो वटो वा ववृधे प्ररोहैः ।
तस्मिन् बृहन्नामनि मूलकल्पाः श्री**सर्वदेवा**भिधसूरयस्ते ॥ २ ॥

बभूवुरुत्सर्पिगणाधिपत्याः श्रीगौतमस्यानुकृतिं दधानाः ।
सत्याहितस्वांततया प्रसिद्धसौभाग्यलक्ष्म्याऽच्युतकीर्तिभाजः ॥ ३ ॥

तत्पट्टे प्रथिते सुवर्णघटिते कल्याणकुंभोपमाः
श्रीमंतो **जयसिंहसूरि**गुरवः सिद्धांतदुग्धार्णवाः ।
दत्तो यैर्विधिमार्गदर्शनविधावादेशदीपांकुरः
शिष्याणां विनयैकतानमनसामाचार्यलक्ष्मीभृताम् ॥ ४ ॥

श्रीमच्चन्द्रकुलोदयाद्रिशिखरोत्तंसाः सुधांशुश्रियः
श्री**चन्द्रप्रभसूर**यो जिनवचः क्षीरार्णवोल्लासिनः ।
मोहध्वान्तमपास्य भव्यकुमुदोद्बोधास्ततस्तेऽभवन्
यत्कीर्त्तिर्द्धवलीकरोति भुवनं ज्योत्स्नातुलां बिभ्रती ॥ ५ ॥

तैर्दत्तामुपलभ्य निर्मलकलां श्रीधर्मघोषप्रभु–
भास्वांस्तीव्रतपःप्रतापकलितो जज्ञे ददद्विस्मयम् ।
नानादृप्तकुतीर्थितारकरुचिव्यासप्रहाणोद्यतो
माद्यद्वादिकुशीलकौशिकमदोद्रेकापहारक्षमः ॥ ६ ॥

आदिष्टा जयसिंहसूरिभिरमी चात्मीयशिष्योत्तमा
विख्याता जगति क्षमाधरशिरोऽलंकारलीलास्पृशः ।
पूज्याः शीलगणाह्वया गणभृतो येऽखंडवृत्तोदया
निन्युश्चन्द्र इव प्रकाशपदवीं पूर्णामिमां पूर्णिमाम् ॥ ७ ॥

गच्छेऽस्मिन् प्रसृते क्षमानुगगुणैः शाखाभिरभ्युन्नते
येषां कुंदसमुज्ज्वलेन यशसा पुष्पायितं सर्वतः ।
तद्गंधग्रहणाग्रहैकरसिका भव्यालयोऽहर्निशं
संगीतं प्रथयंति सम्मदरसस्यापानतः स्वेच्छया ॥ ८ ॥

चंचच्चन्द्रकुले चरित्रनृपतेः श्रीराजधान्यामिह
प्रासादेषु महाव्रतेषु सुदुरारोहाग्रभागेष्वियम् ।
येषां कीर्त्तिरमंदमंदरपरिभ्रांतिक्रमोल्लासित–
क्षीराम्भोधिविलोलवीचिरुचिरा नूनं पताकावली ॥ ९ ॥

यद्दीक्षा सुकृतोदयेन कृतिनां दाक्षायणीनायक–
ज्योत्स्नेव प्रमदं विकाश्य कुमुदं दूरे रजांस्यऽस्यति ।
संतापं हरते गुणौघमनघं दुग्धोदधिं वर्धय–
त्यस्मात् संवरवीचिसंचयवशान्मुक्तात्मलाभो भवेत् ॥ १० ॥

सिंहस्यापि लघोः क्रमेण भविता शौर्यं करीन्द्रापहं
बालस्यापि रवेर्महः प्रतिदिनं दृष्टं प्रतापावहम् ।
एवं ज्ञानदृशा विभाव्य वयसि स्वल्पेऽपि तैः श्रीमतां
येषां शीलगणाभिधैः स्वगुरुभिश्चक्रे पदस्थापना ॥ ११ ॥

तेषां चिरं गच्छपतित्वभाजां श्रीमानतुंगाभिधसूरिराजाम् ।
शिष्या बभूवुर्गुणदिव्यरत्नरत्नाकरा वृत्तधरा धरित्र्याम् ॥ १२ ॥

तेषु श्रीमलयप्रभाख्यगणभृच्छाखाधिराजोऽजनि
ज्ञानेंदूदयशैलश्रृंगसुभगोऽनुलंघ्यमानोन्नतिः ।
ख्यातो यः सह शेषसूरिभिरिह स्वीयैः क्षमामंडले
सूर्यो द्वादशमूर्त्तितामधिगतो भव्याम्बुजोद्बोधकः ॥ १३ ॥

एवं गुरुपर्वक्रमसंबद्धे जयति **वीरजिनतीर्थे** ।
श्रीमानतुंगगुरुभिः कृते **जयंत्या** महासत्याः ॥ १४ ॥

प्रश्नोत्तरप्रकरणे परिवाराभ्यर्थने स्वगुरुभक्त्या ।
अविभक्तधर्मचन्द्राभिधगणिना भागिनेयेन ॥ १५ ॥

भणितैः **श्रीमलयप्रभसूरिभिरेषा** विचित्रदृष्टान्तैः ।
संवेगाय यथामति जगति **जयंतीकथा** प्रथिता ॥ १६ ॥

हंसोऽयं गगने प्रभातमुखतः क्रीडासरस्यन्वहं
यावत् सांद्रतमिस्रशैवलमलं दूरे व्युदस्य क्षणात् ।
धत्ते सर्वदिशां मुखांबुजवने संचारलीलायितं
संतोषं सुधियां ददात्वविकलं **तावज्जयंतीकथा** ॥

द्वादशवर्षशतेषु श्रीविक्रमतो गतेषु षष्टितमे (१२६०) ।
वर्षे ज्येष्ठे मासे श्रवणे भे कृष्णपंचम्याम् ॥ १ ॥

जीवादिविषयसंशयतमोपहारैकतरणिरुचिरुचिरा ।
योगे चैन्द्रे सिद्धाविय़ं **जयंतीकथा** रचिता ॥ २ ॥

मोहमहीपतिविजये चतुरंगबलेन शुचिगुणस्यूता ।
इह जगति वैजयंती जयतु **जयंतीकथा** सुचिरम् ॥ ३ ॥ छ ॥ मंगलमस्तु ॥ छ ॥

दिव्यश्रीसदनं सदा क्षितिधराधारः सुपात्रास्पदं
क्षोणीमंडलमंडनं सुविदितः **प्राग्वाटवंशोऽ**स्ति सः ।
यत्र च्छत्रपरम्परावति तते संप्राप्य पर्वस्थितिं
जायंतेऽद्भुतमत्र वांछितफलैः सौहित्यभाजो जनाः ॥ १ ॥

मुक्तावत्तत्र वंशे समजनि विदितो **धाहडः** श्रेष्ठिवर्यः
सद्वृत्तः कांतकांतिः प्रवरगुणगणः प्रास्तनिःशेषदोषः ।

आनंदाधायिमूर्त्तिस्त्रिभुवनभवनोत्संगरंगत्सुकीर्त्तिः
स्फूर्जत्पुण्यप्रबंधोद्भववशविलसत्प्राभवस्फूर्त्तिपूर्त्तिः ॥ २ ॥

नयविनयविततिविढपितासितांशुसितकीर्त्तिधवलितदशाशः ।
पुण्याचारपवित्रस्तत्पुत्रो धवलनामाऽऽसीत् ॥ ३ ॥

अजनीह मरूसंज्ञा मरुस्थलीपापपंकजवनस्य ।
तस्य प्रवरा जाया विशुद्धशीला विगतमाया ॥ ४ ॥

तत्पुत्री ठक्कुराणी समभवदसमक्षांतिविस्तीर्णशाला
नाऊनामा शशांकद्युतिधवलगुणैः साधुशस्यैर्विशाला ।
धर्मानुष्ठाननिष्ठाविधिवशविकसत्कीर्त्तिसंभारसारा
प्राज्यस्फूर्ज्जद्विवेकप्रतिहतविततोद्दामदुर्वारमारा ॥ ५ ॥

इतश्च--

संजातोऽत्रैव वंशे निरुपममहिमाभाग्यसौभाग्यभूमिः
श्रीपालठक्कुराग्र्यः प्रथितशुचियशाः पालितप्राज्यनीतिः ।
दिव्यश्रीकेलिगेहं समजनि परमं मंडनं धामलक्ष्म्याः
श्रीदेवी तस्य पत्नी विकृतकलुपतालोलतानां सपत्नी ॥ ६ ॥

तयोः सुतः शोभनदेवनामा मुख्यो यशोदेव इति द्वितीयः ।
जातोऽभिजातो नृपमान्यतादिगुणैरशेषैर्भुवि सुप्रसिद्धः ॥ ७ ॥

तत्र शोभनदेवस्य ठक्कुरस्य गृहाद्व्वयम् ।
सहत्र-महणूसंज्ञं सोढूनामा सुताः पुनः ॥ ८ ॥

नाऊकायाः पाणिग्रहणं कृतवानसौ यशोदेवः ।
तत्रातिरत्नभूतेति रत्नदेवीति विदितेयम् ॥ ९ ॥

या सीतेव कलौ कलंकविकलप्रोल्लासिशीलोज्ज्वला
धर्मानुष्ठितिनिष्ठया त्रिभुवने प्राप्तप्रतिष्ठा हि या ।
लब्धागण्यवरेण्यपुण्यनिवहा या चैत्यकृत्यादिभि-
र्नानास्थानपुरादिधार्मिकसभाप्रख्यातनामा च या ॥ १० ॥

ज्ञानं मोहमहांधकारदलने रत्नप्रदीपायते
ज्ञानं दुर्गतिदुर्गकूपपतने हस्तावलंबायते ।
गंभीरे भववारिधौ भवभृतां ज्ञानं सुपोतायते
ज्ञानं कामितवस्तुलाभविषये सत्कामधेनूयते ॥ ११ ॥

इत्येवं शुभदेशनां बहुविधां श्रुत्वा गुरूणां मुखा-
देषा दोषपराङ्मुखी जिनमते रक्ता विरक्ता भवे ।
सप्तक्षेत्रनिजार्थबीजवपनासक्ता विशेषात् पुन-
र्नानापुस्तकलेखने कृतमतिर्नाऊरिह श्राविका ॥ १२ ॥

इतश्चतुर्भिः संबंधः—

श्री**शीलगण**सूरीशपूज्यपट्टप्रतिष्ठितैः ।
बाल्यादपि महापुण्यश्रेण्या नित्यमधिष्ठितैः ॥ १३ ॥

श्री**मानतुंग**सूरिभिराराध्यैस्तत्र यज्जयंत्याख्यम् ।
प्रकरणमकारि शुभदं **भगवत्यंगा**न्मनोहारि ॥ १४ ॥

तस्योपरि गुरुभक्त्या विदधे सुधियां मनोरमा वृत्तिः ।
श्री**मलयप्रभ**सूरिभिरिह या पूज्यैः प्रसन्नतमैः ॥ १५ ॥

तामिह सा **नाऊका** ज्ञानाराधनधिया सुगुरुभक्त्या ।
लेखितवती गुणवती महासती शुद्धशुभभावा ॥ १६ ॥

यावच्चारुमरीचिसंचयचिते चंद्रार्कयोर्मंडले
राजेते गगनश्रियो मणिमये दिव्ये चलत्कुंडले ।
ताराश्रेणिरियं पुनः सुकुसुमालंकारशोभावहा
तावत् पुस्तकमेतदद्भुततमं व्याख्यायतां सूरिभिः ॥ १७ ॥

स्वस्ति श्रीविक्रमनरेन्द्रतः संवत् १२६१ वर्षे अश्विनवदि ७ रवौ पुष्यनक्षत्रे शुभयोगे श्री**मदणहिलपाटके** महाराजाधिराजश्री**भीमदेव**कल्याणविजयिराज्ये प्रवर्त्तमाने श्री**प्राग्वाट**-ज्ञातीयश्रेष्ठिधवलमरुपुत्र्या ठ० **नाऊ**श्राविकया आत्मश्रेयोऽर्थं पंडित**मुंजाल**हस्तेन **मंकुशिका**स्थाने जयंतीवृत्तिपुस्तकं लेखयित्वा श्री**अजितदेव**सूरीणां निजभक्त्या समर्पित-मिति ॥ छ ॥ शुभं भवतु । मंगलमस्तु । मंगलं महाश्रीः ॥ छ ॥

*

No. 154 Pravacanasāroddhāraprakaraṇa with Vṛtti

प्रवचनसारोद्धारप्रकरण वृत्तिसहित

Folios – 293
Language – Prakrit & Sanskrit
Author – Nemicandrasūri
Commentator – Siddhasenasūri
Age of MS. – c. First half of 14th cent. V. S.
Size – 17·2 × 2·5 inches
Condition – Good
Date of Composition of Vṛtti – 1248 V.S.
General Remarks – From Dwāra 67 to Dwāra 142. Folios 41–43, 53, 95, 102, 103, 107, 111, 113, 116–121, 125, 130, 146, 154, 157, 161, 165, 166, 188, 189, 220, 223, 240, 249, 261–275 missing.

आदिः—

इदानीं करणं ति सत्तपष्टं द्वारमाह ।
पिंडविसोही समिई भावण पडिमा य इंदियनिरोहो ।

अन्तः—

तिन्नि सया तेयाला रज्जूणं होंति सव्वलोगम्मि ।
चउरंसं हो....................

*

No. 155 Pravacanasāroddhāraprakaraṇa with Vṛtti

प्रवचनसारोद्धारप्रकरण वृत्तिसहित

Folios – 249
Language – Prakrit & Sanskrit
Author – Nemicandrasūri
Commentator – Siddhasenasūri
Age of MS. – c. First half of 14th cent. V. S.
Size – 15 × 2 inches
Condition – Good
Date of Composition of Vṛtti – 1248 V.S.
General Remarks – From Dwāra 134 to Dwāra 263. Folio No. 1 missing.

अन्तः—

इदानीं वैनयिकानां द्वात्रिंशद् भेदान् आह–सुरनिवइ इत्यादि गाथाद्वयम् ॥

*

No. 156 Pravacanasāroddhāra Viṣamapadaparyāya

प्रवचनसारोद्धार विषमपदपर्याय

Folios – 187
Language – Sanskrit
Author – Udayaprabhasūri
Age of MS. – c. End of 13th cent. V. S.
Extent – 3202
Size – 17 × 2·5 inches
Condition – Good

आदिः—

प्रवचनसारोद्धारे विषमपदार्थविबोधमाधत्ते ।
श्रीउदयप्रभसूरिः श्रीपार्श्वाधीशमानम्य ॥ १ ॥
सूत्रेणैव गतार्थे व्याख्या पुनरुक्तदोषपोषाय ।
हीनांग इत्यवज्ञा विज्ञैस्तेनात्र नो कार्या ॥ २ ॥
यद्वा सूत्रेणैष सुसूत्रः कार्यो हार इव योजितविमुक्तः ।
यस्माद्विषमपदार्थविबोधसंधिर्दुरधिगम्यः ॥ ३ ॥

*

No. 157 Yogaśāstra-First Four Prakāśas

योगशास्त्रम्—आद्यप्रकाशचतुष्कम्

Folios – 3 to 69
Language – Sanskrit
Author – Hemacandrācārya

Size – 12 × 1·7 inches
Condition – Good
Age of MS. – c. Latter half of 13th cent V. S.

*

No. 158 Yogaśāstram-First Four Prakāśas

योगशास्त्रम्—आद्यप्रकाशचतुष्टयम्

Folios – 40
Language – Sanskrit
Author – Hemacandrācārya

Size – 14 × 1·7 inches
Condition – Good
Age of MS. – 1294 V. S.

अन्तः—

इति परमार्हतश्रीकुमारपालभूपालशुश्रूषिते आचार्यश्रीहेमचन्द्रविरचिते अध्यात्मोपनिषन्नाम्नि संजातपट्टबंधे द्वादशप्रकाशे श्रीयोगशास्त्रे चतुर्थः प्रकाशः ॥ छ ॥ * ॥ छ ॥ संवत् १२९४ वर्षे माघशुदि रवौ पं० देवानंदस्य योग्यं लिखितमिति ॥ छ ॥ * ॥ छ ॥

*

No. 159 Yogaśāstram-First Four Prakāśas

योगशास्त्रम्— आद्यप्रकाशचतुष्टयम्

Folios – 6 to 49
Language – Sanskrit
Author – Hemacandrācārya

Size – 11·7 × 1·7 inches
Condition – Fair
Age of MS. – c. Latter half of 13th cent. V. S.

*

No. 160 Yogaśāstram–with his own Vṛtti

योगशास्त्रम्—स्वोपज्ञवृत्तियुक्तम्

Folios – 393
Language – Sanskrit
Author – Hemacandrācārya
General Remarks – A corrected manuscript

Extent – Granthas 12000
Size – 30·2 × 2·2 inches
Condition – Good
Age of MS. – V.S. 1251

आदिः—

॥ अर्हम् ॥ प्रणम्य सिद्धाद्भुतयोगसम्पदे श्रीवीरनाथाय विमुक्तिशालिने ।
स्वयोगशास्त्रार्थविशेषनिर्णयो भव्याववोधाय मया विधास्यते ॥ १ ॥

तस्य चायमादिश्लोकः—

नमो दुर्वाररागादिवैरिवारनिवारिणे ।
अर्हते योगिनाथाय महावीराय तायिने ॥ १ ॥

अत्र महावीरायेति विशेष्यपदम् ।

अन्तः—

इदानीं श्रुताम्भोधेरधिगमादिति यन्मुखे प्रतिज्ञातं तन्निर्वाहेणानूद्योपसंहरति ॥ छ ॥

या शास्त्रात् सुगुरोर्मुखादनुभवाच्चाज्ञायि किंचित् क्वचि-
द्योगस्योपनिषद् विवेकिपरिषच्चेतश्चमत्कारिणी ।
श्रीचौलुक्यकुमारपालनृपतेरत्यर्थमभ्यर्थना-
दाचार्येण निवेशिता पथि गिरां श्रीहेमचंद्रेण सा ॥

या योगस्योपनिषद्रहस्यमज्ञायि ज्ञाता । कुतः, शास्त्रात् द्वादशाङ्गादागमात् । सुगुरोः सदागमव्याख्यातुर्मुखात् साक्षादुपदेशात् । अनुभवात् स्वसंवेदनरूपात् किंचिदिति स्वप्नज्ञानानुसारेण । क्वचिदिति एकत्र सर्वस्य ज्ञातुमशक्यत्वात् प्रदेशभेदे क्वचन । उपनिषदमेव विशिनष्टि । विवेकिनां योगरुचीनां या परिषत् सभा तस्या यच्चेतस्तच्चमत्करोतीत्येवंशीला सा योगस्योपनिषत् । श्रीचौलुक्यो यः कुमारपालनृपतिस्तस्यात्यर्थमभ्यर्थनया । स हि योगोपासनप्रियो दृष्टयोगशास्त्रान्तरश्च इति स पूर्वेभ्यो योगशास्त्रेभ्यो विलक्षणं योगशास्त्रं शुश्रूषमाणोऽत्यर्थमभ्यर्थितवान् । ततस्तदभ्यर्थनतो वचनस्यागोचराऽपि उपनिषत् गिरां पथि निवेशितवानाचार्यश्रीहेमचन्द्र इति शुभम् ॥

श्रीचौलुक्यक्षितिपतिकृतप्रार्थनाप्रेरितोऽहं,
तत्त्वज्ञानामृतजलनिधेर्योगशास्त्रस्य वृत्तिम् ।
स्वोपज्ञस्य व्यरचयमिमां तावदेषा च नन्द्याद्,
यावज्जैनप्रवचनवती भुर्भुवःस्वस्त्रयीयम् ॥

संप्रापि योगशास्त्रात्तद्विवृत्तेश्चापि यन्मया सुकृतम् ।
तेन जिनबोधिलाभप्रणयी भव्यो जनो भवतात् ॥ छ ॥

इति परमार्हतश्रीकुमारपालभूपालशुश्रूषिते आचार्यश्रीहेमचन्द्रविरचिते अध्यात्मोपनिषन्नाम्नि संजातपट्टबंधे श्रीयोगशास्त्रे स्वोपज्ञं द्वादशप्रकाशविवरणम् ॥ छ ॥ * ॥ छ ॥ ग्रन्थ श्लोक १२००० । संपूर्णं योगशास्त्रविवरणमिति ॥ छ ॥ मंगलं महाश्रीः ॥ छ ॥

भृङ्गीणामिव पक्षपातललितैर्लीलागृहं सुश्रियां
सुच्छायो विततोऽतिविस्मयकरः **श्रीमालवंशो**ऽस्त्यसौ ।
उद्यत्पर्वमनोहरे क्षितिधरप्राप्तप्रतिष्ठोदये
यत्र च्छत्रपरंपरा ननु परादृश्यन्त एवानिशम् ॥ १ ॥

आसीद्वंशे वरगुणगणे तत्र मुक्तानुकारी
कान्त्युल्लासैर्निरुपमतमः साधुवृत्तानुसारी ।
शुद्धध्यानोपचितसुकृतो देवपूजादिनिष्ठः
श्रेष्ठी श्रेष्ठः सुनयविनयैः **साभदेवो** गरिष्ठः ॥ २ ॥

पासिलाख्यः सुतस्तस्मादत्यद्भुतसुवैभवात् ।
सुमनोवर्गमुख्योऽभूज्जयन्त इव वासवात् ॥ ३ ॥

अगण्यपुण्यलावण्या तस्य **पूनाविनामिका** ।
सीतेव रामचन्द्रस्य जाता पत्नी पतिव्रता ॥ ४ ॥

तौ **सर्वदेव-साभाख्यौ** तत्कुलव्योममंडनम् ।
जज्ञाते ज्ञातमाहात्म्यौ चंद्रार्काविव विश्रुतौ ॥ ५ ॥

एतयोः **सोहिणि**र्भग्नी भग्नकंदर्पशासना ।
जिनशासनधरा जज्ञे सज्ज्ञानाम्भोजदीर्घिका ॥ ६ ॥

श्रेष्ठिनः **सर्वदेवस्य पार्श्वनागः** सुतोऽजनि ।
लक्ष्मीकुक्षिभवा शान्ता तस्य **थामिणि**रात्मजा ॥ ६ ॥

जाते सधर्मचारिण्यौ धर्मकर्मातिकर्मठे ।
साभाकस्य सदा भक्ते **वीरी-वयजसं**ज्ञिते ॥ ७ ॥

वीरीकायाः सुते जाते जातिश्लाघ्ये शमान्विते ।
सीता-जास्यौ जिनाधीशधर्माराधनतत्परे ॥ ८ ॥

सत्पुत्रस्तत्र सीताया आसदेवाभिधोऽभवत् ।
ततो भूतौ सुतावाभू-शोभनदेवनामकौ ॥ ९ ॥

अभूतां नंदनौ जास्यास्तुवूटडि-यशोधरौ ।
जिंदा-यशःकुमाराख्यौ बभूवतुस्तयोः सुतौ ॥ १० ॥

वयजाख्या तु तत्पत्नी पंचाऽसूत सुतोत्तमान् ।
कुंतीव पांडवान् पांडुयशःशुभ्रितभूतलान् ॥ ११ ॥

तेषामाम्रप्रसादाख्य आद्यो देवधरस्ततः ।
रामदेवस्ततश्चांडू-यशोधवलसंज्ञितौ ॥ १२ ॥

पंचाप्यद्भुतधर्मकर्मनिरताः पंचापि पुण्यांचिताः
पंचाप्युग्रभवप्रपंचविमुखाः पंचापि सत्यप्रियाः ।
एते पंचमहाव्रतैकरुचयः पंचापि शुद्धाशयाः
प्रापुः पञ्चजनौघमौलितिलकाः पंचापि कीर्तिं पराम् ॥ १३ ॥

अभूदाम्रप्रसादस्य सज्जनी वरगेहिनी ।
ज्ञानविज्ञानयोः पात्रं तनूजः सोहडस्तयोः ॥ १४ ॥

जाया देवधरस्यासीत् श्रेष्ठिनः श्रेष्ठतानिधेः ।
सांतूकायाः सुता माहूः शमकैरवकौमुदी ॥ १५ ॥

आभडो नरसिंहश्च जज्ञिरे सूनवस्तयोः ।
जगद्देवाख्य-लाखाक-चाहडाः श्रुतशालिनः ॥ १६ ॥

आद्या प्रियमती नामा संजाता तदनु कुमरदेवीति ।
लघ्वी त्वनिहवदेवी वधूटिका तस्य विनययुता ॥ १७ ॥

भार्याऽभूद्रामदेवस्य पद्मी नंदनास्त्वमी ।
शंबो वयरसिंहश्च पुण्यश्च जयन्तः सुताः ॥ १८ ॥

अन्यच्च—

येन जिग्ये जगद्देवगुरुभक्त्याऽखिलं भृशम् ।
जगद्देवस्य तस्यासीद्दैवाद् ग्लानिकारणम् ॥ १९ ॥

इतश्चतुर्भिः सम्बन्धः—

ज्ञात्वा येन लघीयसाऽपि सहसा स्वस्यान्तकालं क्षणा-
दानाय्य व्रतिनः स्वयं तदखिलं कृत्वाऽन्त्यकृत्यं स्फुटम् ।
त्यक्त्वा स्नेहमशेषमात्मवदनेनोच्चार्य धर्मव्ययं
जिग्ये मोहमहामहीपतिरतिप्राज्यप्रभावोऽप्यसौ ॥ २० ॥

आबाल्यादपि येन पूर्णविधिना भक्त्याऽर्चितः श्रीजिन-
स्तात्पर्थादतिसेविताः सुगुरवोऽभ्यस्तं च शास्त्रं परम् ।
आत्मीयैर्विनयादिभिर्वरगुणैराचन्द्रकालं कलौ
चन्द्रांशूज्ज्वलकान्तकीर्त्तिरतुला स्वल्पैर्दिनैरर्जिताः ॥ २१ ॥

श्री**योगशास्त्रवृत्ते**र्**देवधरे**णात्मपुत्रसहितेन ।
निस्संगचित्तमुनिवत् सावद्यारंभरहितेन ॥ २२ ॥

साधुजनजनिततोषं निर्दोषं पुस्तकप्रवरमेतत् ।
तस्यात्मसुतस्य **जगद्देव**स्य श्रेयसेऽलेखि ॥ २३ ॥

यद् दोषैरकलंकितं गुणगणैर्युक्तं मनोहारिभि-
र्नित्याभ्यासवशेन निर्वृतिकरं दिव्योक्तसाधुक्रियम् ।
श्रीभूपाल**कुमारपाल**सहितं श्री**हेमचन्द्र**प्रभोः
कर्मव्याधिविबाधकं विजयतां तद् **योगशास्त्रं** सदा ॥ २४ ॥

सूर्याचन्द्रमसौ यावद् द्योतयन्ति भुवं रुचा ।
अश्रान्तं पुस्तकं तावत् कोविदैर्वाच्यतामिदम् ॥ २५ ॥ छ ॥

ॐ ॥ स्वस्ति श्रीविक्रमनृपतेः संवत् १२५१ वर्षे कार्त्तिक सुदि १२ शुक्रे रेवतिनक्षत्रे सिद्धयोगे महाराजश्री**भीमदेव**विजयिराज्ये अवनिवनिताप्रशस्तकस्तूरिकातिलकायमान**लाटदेशा**लंकारिणि सकलजनमनोहारिणि विविधधार्मिकविराजमाने **दर्भवती**स्थाने **श्रीमाल**वंशीय श्रे० **साभा**नंदनेन जगदानंदनेन निर्मलतमसम्यक्त्वधरेण श्रे० **देवधरेण** सकलधर्मकर्मावहितेन ठ० **आमड-नरसिंहा**दिसुतसाहितेन निजपुत्र**जगद्देव**श्रेयोनिमित्तं श्री**वटपद्रकपुर**प्रसिद्धप्रवुद्ध पं० **केशव**सुत पं० **वोसरि**हस्तेनाशेषविशेषज्ञचेतश्चमत्कारकारीदमप्रतिमप्रतापश्रीजिनशासनप्रभावकश्री**कुमारपाल**भूपालविधापितस्य श्री**हेमचन्द्र**सूरिरचितस्य श्री**योगशास्त्र**स्य **वृत्ति**पुस्तकं लिखितमिति । मङ्गलं महाश्रीः । शुभं भवतु लेखकपाठकवाच[का]नामिति ॥ छ ॥ * ॥ छ ॥

*

No. 161 : Yogaśāstra–with his own Commentary

योगशास्त्रम्—स्वोपज्ञटीकासहितम्

Folios – 323
Language – Sanskrit
Author – Hemacandrasūri
Extent – Granthas 12000
Size – 29 × 2·2 inches
Condition – Good

अन्तः—

अस्तीह श्रेष्ठपर्वप्रचयपरिचितः क्ष्माभृदाप्तप्रतिष्ठः ० इत्यादि
(जुओ क्रमांक १)........
एवं निशम्य सम्यक् ततश्च निजभुजसमार्जितधनेन ।
श्रीयोगशास्त्रवृत्तेः पुस्तकं लेखयामास ॥ २० ॥........

*

No. 162 : Yogaśāstra–with his own Vivaraṇa

योगशास्त्रम्—स्वोपज्ञविवरणसहितम्

Folios – 258
Language – Sanskrit
Author – Ācārya Hemacandra
Size – 14 × 1·5 inches
Condition – Good
Age of MS. – c. Latter half of 13th cent. V.S.

General Remarks – Contains First Prakāśa only—incomplete.

*

No. 163 : Yogaśāstra–with his own Vivaraṇa

योगशास्त्रम्—स्वोपज्ञविवरणसहितम्

Folios – 242
Language – Sanskrit
Author – Hemacandrācārya
Age of MS. – V. S. 1292
Extent – Granthas 3100
Size – 14·2 × 2·2 inches
Condition – Good

General Remarks – Contains the Second Prakāśa only. Folios 43–45, 47–50, 52–55, 57, 60–66, 70, 71, and 215 missing.

अन्तः—

इति परमार्हतश्रीकुमारपालभूपालशुश्रूषिते आचार्यश्रीहेमचंद्रविरचितेऽध्यात्मोपनिषन्नाम्नि संजातपट्टबंधे श्रीयोगशास्त्रे स्वोपज्ञं द्वितीयप्रकाशविवरणं ॥ छ ॥ ग्रंथाग्रं ३१०० मंगलं महाश्रीः ॥ छ ॥ छ ॥ भद्रम् ॥

आसीच्चन्द्रकुलांबरैकतरणिः श्रीमानदेवाभिध-
स्तद्वंशे प्रभुमानतुंगगणभृत् प्राज्यप्रभावः प्रभुः ।

तत्राजायत बुद्धिसागरगुरुः प्रद्युम्नसूरिस्तत-
स्तच्छिष्योऽजनि देवचंद्रगणभृद् गच्छाग्रणीर्विश्रुतः ॥ १ ॥

श्रीदेवचंद्रस्य मुनीश्वरस्य जातौ सुशिष्यौ जगति प्रसिद्धौ ।
श्रीमानदेवः प्रथमो गणेशः श्रीपूर्णचंद्रो गणभृत्तथाऽन्यः ॥ २ ॥

यः सैद्धांतिकमौलिभूषणमणिर्विद्वज्जनाग्रेसरः
संतोषोत्तमरत्नराजिततनुः श्रीमानदेवप्रभुः ।
यच्चेतः कल्याऽपि नो विलिखितं सल्लापलीलावती-
वेल्लल्लोचनचारुवीक्षितशरश्रेणीभिरात्मोद्भवः ॥ ३ ॥

श्रीपूर्णचंद्रसूरेर्गौर्वादिगोवृंदनाशिनी ।
ब्रह्मनिघ्नाऽपि साऽव्याद्वो याऽसूत परमं वृषं ॥ ४ ॥

श्रीमानदेवसूरेः पट्टेऽजनि मानतुंगसूरिगुरुः ।
विधिरिव भवांतकारी नरकद्वेषी स विष्णुरिव ॥ ५ ॥

अन्यच्च—

धर्कटवंशसुधानिधिचंद्रः श्रेष्ठी गणियाको निस्तंद्रः ।
तस्य गुणश्रीः समजनि जाया दक्षसुतेव सदैव विमाया ॥ ६ ॥

तस्यांगजैका सुमहत्तरायाः प्रभावतीसंज्ञमहत्तरायाः ।
पार्श्वेऽग्रहीत् पंच महाव्रतानि प्रद्युम्नसूरेः सुगुरोः करेणं ॥ ७ ॥

जगश्रीरुदयश्रीः श्रीचारित्रश्रीमहत्तरा ।
क्रमेण तासां सर्वासां पादपद्ममधुव्रता ॥ ८ ॥

सा निर्मलमतिगणिनी रम्यां श्रीयोगशास्त्रसद्वृत्तेः ।
द्वैतप्रकाशखंडस्य पुस्तिकां लेखयामास ॥ ९ ॥

श्रीमानतुंगसूरेः पट्टस्थितपद्मदेवसूरीणाम् ।
तां प्रवचनरसपात्रं प्रददौ पुण्याय पुण्यतराम् ॥ १० ॥

कल्याणाद्रिनृपो धराधरसुता जाया कुरू मंत्रिणौ
वृद्धा वृद्धनगाञ्जनास्तदपरे वक्षारसाराकराः ।
चंद्रादित्यवरौ पदातिभगणाः साम्राज्यमेतत् क्षितौ
यावत्तिष्ठति तावदत्र विबुधैर्वाच्या सदा पुस्तिका ॥ ११ ॥

संवत् १२९२ वर्षे कार्त्तिक शुदि ८ रवौ धनिष्ठानक्षत्रे योगशास्त्रवृत्तिद्वितीय-प्रकाशस्य[पुस्तिका] लिखितेति । शुभं भवतु ॥ छ ॥

*

No. 164 : Yogaśāstra-with his own Vṛtti

योगशास्त्रम्—स्वोपज्ञवृत्तिसहितम्

Folios – 228 to 452 Extent – Granthas 3800
Language – Sanskrit Size – 14.7 × 1.5 inches
Author – Hemacandrācārya Condition – Good
Age of MS. – V.S. 1260
General Remarks – Contains the third Prakāśa only. Folio no. 451 is marked thus in the margin : रत्ता
C
१

अन्तः—

.......तश्रीकुमारपालभूपालशुश्रूषिते आचार्यश्रीहेमचन्द्र.......वंधे श्रीयोगशास्त्रे स्वोपज्ञतृतीयप्रकाशविवरणम् ॥ ग्रं. ३८०० ॥ छ ॥ सं. १२६० अश्विन शु. ५ लिखितेयम् ॥

*

No. 165 : Yogaśāstra with his own Vṛtti

योगशास्त्रम्—स्वोपज्ञवृत्तिसहितम्

Folios – 240 Extent – Granthas 2000
Language – Sanskrit Size – 12·2 × 1·7 inches
Author – Hemacandrācārya Condition – Good
Age of MS. – c. Latter half of 13th cent. V. S.
General Remarks – Contains the fourth Prakāśa only.

*

No. 166 : Yogaśāstra-with his own Commentary

योगशास्त्रम्—स्वोपज्ञटीकासहितम्

Folios – 118 Extent – Granthas 1300
Language – Sanskrit Size – 15·7 × 2 inches
Age of MS. – c. Latter half of 13th cent. V. S. Condition – Good
General Remarks – *Complete from the beginning of the fifth Prakāśa.*

*

No. 167 : Yogaśāstra-with his own Vṛtt

योगशास्त्रम्—स्वोपज्ञवृत्तिसहितम्

Folios – 343
Language – Sanskrit
Author – Hemacandrācārya
Age of MS. – c. Latter half of 13th cent. V. S.
Extent – Granthas 3300
Size – 15·5 × 1·5 inches
Condition – Good
General Remarks – Contains the Second Prakāśa only. The first 11 folios and folio Nos. 330 to the end are injured. Folios 330 onwards are written on paper and are much injured. Folio No. 330 contains the following marking in the margin : सा ला ०

*

No. 168 : **Yogaśāstra-with his own Vivaraṇa**

योगशास्त्रम्—स्वोपज्ञविवरणसहितम्

Folios – 8 to 423
Language – Sanskrit
Author – Hemacandrācārya
Age of MS. – c. Latter half of 13th cent. V. S.
Extent – Granthas 3800
Size – 15·5 × 1·5 inches
Condition – Good
General Remarks – Contains the third Prakāśa only. Folios 108–111, 115, 116, 129, 131, 132, 134–150, 219–247 missing.

*

No. 169 : **Yogaśāstra-Commentary Notes**

योगशास्त्र—टीकाटिप्पन

Folios – 24
Language – Sanskrit
Age of MS. – c. First half of 14th cent. V. S.
Size – 14·2 × 2·2 inches
Condition – Good

आदिः—

॥ अर्हम् ॥ **योगशास्त्रस्य टीकाटिप्पनकम्** ॥ सोदेति कथं सहिष्यते । सरस्यामिति अखातसरसि । विदांकरोतु जानातु । प्रणेमे नमस्कृतः । वेधसे द्वादशांगस्यादिकृते । लोकप्रदीपाय· भव्यसत्त्वा लोकः ।

अन्तः—

अर्थपरिसमाप्तिकं वाक्यपदमुच्यते ॥ छ ॥ मंगलं महाश्रीः ॥ छ ॥ शुभं भवतु संघस्य लेखकपाठकयोरेव ॥

*

No. 170 : Śrāddhadinakṛtyaprakaraṇa with his own Vṛtti

श्राद्धदिनकृत्यप्रकरणम्—स्वोपज्ञवृत्तिसहितम्

Folios – 267
Language – Prakrit & Sanskrit
Author & Commentator – Devendrasūri
Age of MS. – c. 14th Century V. S.

Extent – Granthas 13000
Size – 32.5 × 2.2 inches
Condition – Good

आदिः—

॥ ॐ नमः सर्वज्ञाय ॥

गोभिर्येन जगत्त्रयेऽपि निखिलद्रव्यप्रकाशः सदा
चक्रे जाड्यतमोभिदा भवभृतां दोषापहारस्तथा ।
तं नत्वा जिनवीरमर्कमतुलं सूत्रात्तथाम्नायतः
श्राद्धानां दिनकृत्यसूत्रविवृतिं वक्ष्ये सुबोधामहम् ॥

तत्रादौ शिष्टसमयपरिपालनार्थं मंगलादिचतुष्टयाभिधायकं सूत्रकृदेव प्रस्तावनावृत्तमाह ।

वीरं नमेऊण तिलोयभाणुं विसुद्धनाणं सुमहानिहाणं ।
वोच्छामि सड्ढाण दिणस्स किच्चं जिणिंदचंदाण य आगमाओ ॥ १ ॥

वीरं नत्वा श्राद्धानां दिनकृत्यं वक्ष्ये इति समुदायार्थः ।

अन्तः—

सर्वोपसंहारार्थमाह

अयाणमाणेण जिणुत्तमाणं मयं महत्थं मइविब्भमेणं ।
जं मे विरुद्धं इह तस्स वुत्तं तं मज्झ मिच्छामिह दुक्कडं ति ॥ ४४ ॥

पाठसिद्धम् ॥

सिद्धान्ततत्त्वामृतपूरपानात् प्रस्ताव एषोऽष्टमको मयोक्तः ।
उच्चन्द्रकाले शुभसंज्ञिधर्मे सच्चिंतनार्थो दिनकृत्यवृत्तौ ॥ १ ॥

इति श्रावकदिनकृत्यविवरणे विधिशयनादिद्वारषट्कव्यावर्णनो नामाष्टमः प्रस्तावः समाप्तः । तत्समाप्तौ च समाप्तेयं श्रावकदिनकृत्यसूत्रवृत्तिः ।

जीयात् श्रीवर्धमानस्य तीर्थं सुरसरित्सुखम् ।
पवित्रं विबुधैः सेव्यं पंकतृष्णापहं च यत् ॥ १ ॥

गौतमादनु तत्राभूत् श्रुतगंगाहिमाचलः ।
आद्यो युगप्रधानानां सुधर्मा गणभृद्वरः ॥ २ ॥

इतश्च केवली जंबूः प्रभवः श्रुतकेवली ।
शय्यंभवो यशोभद्रः संभूतविजयोऽपि च ॥ ३ ॥

भद्रबाहुः स्थूलभद्रस्ततोऽपि दशपूर्विणः ।
महागिरि-सुहस्त्याद्या वज्रांता बहवोऽभवन् ॥ ४ ॥

ततोऽभूद्वज्रसेनर्षिर्वज्रशाखा ततोऽपि च ।
गणश्च कोटिकाभिख्यः कुलं चंद्रकुलं तथा ॥ ५ ॥

तत्र क्रमेण चित्रावालकगच्छो बभूव सुविदितः ।
श्रीभुवनचंद्रसूरिसूत्रामात् भव्यपद्मरविः ॥ ६ ॥

तच्छिष्यरत्नमभवन् भुवनप्रसिद्धाश्चारित्रपात्रमखिलश्रुतपारमाप्ताः ।
गांभीर्यमुख्यगुणरत्नमहासमुद्राः श्रीदेवभद्रगणिमिश्रसुनामधेयाः ॥ ७ ॥

तत्पादांबुजरोलंबा निरालंबा वपुष्यपि ।
अभूवन् भूरिभावाढ्याः श्रीजगच्चन्द्रसूरयः ॥ ८ ॥

देवेन्द्रसूरिसंज्ञस्तेषामार्यो बभूव शिष्यलवः ।
श्रीविजयचन्द्रसूरिस्तथा द्वितीयो गुणैस्त्वाढ्यः ॥ ९ ॥

चक्रे भव्यावबोधाय संप्रदायात्तथाऽऽगमात् ।
सच्छ्राद्धदिनकृत्यस्य वृत्तिर्देवेन्द्रसूरिभिः ॥ १० ॥

श्रीविजयचन्द्रसूरिप्रमुखैर्विद्वद्गणैर्गुणगरिष्ठैः ।
स्वपरोपकारनिरतैस्तदैव संशोधिता चेयम् ॥ ११ ॥

प्रथमां प्रतिमप्रतिमप्रतिभाप्रतिहस्तितत्रिदशसूरिः ।
श्रीहेमकलशनामा सदुपाध्यायो लिलेखास्याः ॥ १२ ॥

यच्चेह समयहीनं मतिमांद्यात् किमपि विरचितं शास्त्रे ।
क्षंतव्यं तत्कविभिः कृपापरैर्मयि विशोध्यं च ॥ १३ ॥

यावज्जिनमतमेतज्जगतोऽप्युपकर्तृ विजयते पृथ्व्याम् ।
तावत्त्रींदुसहस्री १३००० जीयाद्वृत्तिः कृतानंदा ॥ १४ ॥ छ ॥

॥ ॐ ॥

नमः श्रीवर्द्धमानाय **वर्द्धमानाय** वेदसा ।
वेदसारं परं ब्रह्म ब्रह्मवन्नास्थितिश्च यः ॥ १ ॥

स्वबीजमुप्तं कृतिभिः कृपीवलैः क्षेत्रेषु सिक्तं शुभभाववारिणा ।
क्रियेत यस्मिन् सफलं शिवश्रिया पुरं तदाभाति **दयावटा**भिधम् ॥ २ ॥

ख्यातस्तत्रास्ति वस्तुप्रगुणगुणगणः प्राणिरक्षैकदक्षः
सज्ज्ञाने लब्धलक्ष्यो जिनवचनरुचिश्चंचदुच्चैश्चरित्रः ।
पात्रं पात्रैकचूडामणिजिनसुगुरूपासनावासनायाः
संघः सुश्रावकाणां सुकृतमतिरमी संति तत्रापि मुख्याः ॥ ३ ॥

होनाकः सज्जनश्रेष्ठः श्रेष्ठी **कुमरसिंहकः** ।
सोमाकः श्रावकश्रेष्ठः शिष्टधी**ररिसिंहकः** ॥ ४ ॥

कडुयाकश्च सुश्रेष्ठी **सांगाक** इति सत्तमः ।
खीम्वाकः सुहडाकश्च धर्मकर्मैककर्मठः ॥ ५ ॥

एतन्मुखः श्रावकसंघ एषोऽन्यदा वदान्यो जिनशासनज्ञः ।
सदा सदाचारविचारचारुक्रियासमाचारशुचिव्रतानाम् ॥ ६ ॥

श्रीमज्ज**गच्चंद्रमुनींद्र**शिष्यः श्रीपूज्य**देवेन्द्रमुनी**श्वराणाम् ।
तदाद्यशिष्यत्वभृतां च **विद्यानंदा**ख्यविख्यातमुनिप्रभूणाम् ॥ ७ ॥

तथा गुरूणां स्वगुणैर्गुरूणां श्री**धर्मघोषा**भिधसूरिराज्ञः ।
सद्देशनामेवमपापभावां शुश्राव भावावनतोत्तमांगः ॥ ८ ॥

विषयसुखपिपासोर्गेहिनः क्वास्ति शीलं
करणवशगतस्य स्यात्तपो वाऽपि कीदृग् ।
अनवरतमदभ्रारंभिणो भावनाः का-
स्तदिह नियतमेकं दानमेवास्य धर्मः ॥ ९ ॥

किंच—

धर्मः स्फूर्ज्जति दानमेव गृहिणां ज्ञानाभयोपग्रहै-
स्त्रेधा तद्वरमाद्यमत्र यदितो निःशेषदानोदयः ।

ज्ञानं चाद्य न पुस्तकैर्विरहितं दातुं च लातुं च वा
शक्यं पुस्तकलेखनेन कृतिभिः कार्यस्तदर्थोऽर्थवान् ॥ १० ॥
श्रुत्वेति संघसमवायविधीयमानज्ञानार्चनोद्भवधनेन मिथः प्रवृद्धिम् ।
नीतेन पुस्तकमिदं श्रुतकोशवृद्ध्यै बद्धादरश्चिरमलेखयदेष हृष्टः ॥ ११ ॥
यावज्जिनमतभानुः प्रकाशिताऽशेषवस्तुविस्तारः ।
जगति जयतीह पुस्तकमिदं बुधैर्वाच्यतां तावत् ॥ १२ ॥ छ ॥
ग्रंथाग्रं १३००० प्रमाणं ॥ मंगलं महाश्रीः ॥ छ ॥
लेखकपाठकदाताराः समस्तसंघदीर्घायुर्भवतु ॥ छ ॥
यादृशं पुस्तके दृष्ट्वा तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ १ ॥
शिवमस्तु सर्वजगतः परहितनिरता भवंतु भूतगणाः ।
दोषाः प्रयांतु नाशं सर्वत्र सुखी भवतु लोकः ॥ २ ॥
भग्नपृष्ठिकटिग्रीवास्तब्धदृष्टिरधोमुखम् ।
कष्टेन लिखितं शास्त्रं यत्नेन प्रतिपालयेत् ॥ ३ ॥ छ ॥

*

No. 171 : Śrāddhadinakṛtyaprakaraṇa–with his own Vṛtti

श्राद्धदिनकृत्यप्रकरणम्—स्वोपज्ञवृत्तिसहितम्

Folios – 356
Extent – Granthas 13000
Language – Prakrit & Sanskrit
Size – 34·5 × 2·2 inches
Author & Commentator – Devendrasūri
Condition – Good
Age of MS. – c. First half of 15th cent. V. S.

अंतः—

तावत्त्रींदुसहस्री जीयाद् वृत्तिः कृतानंदा ॥ १४ ॥ छ ॥
श्रीमद्देवेन्द्रसूरेश्चरणसरसिजोपास्तिहंसायमानः
श्रीविद्यानंदसूरिस्तदनु मुनिपतिर्धर्मघोषाख्यसूरिः ।
त्रैलोक्यख्यातकीर्त्तिर्विमलगुणगणावासमाद्यो मुनीनां
सूरिः सोमप्रभाख्यः शमदममहिमाधीनिधिः साधुराजः ॥ १ ॥
तस्याऽभवच्च विमलप्रभसूरिराद्यो
श्रेष्ठो गुणैर्यतिपतिर्गरिमागरिष्ठः ।

आनंदसूरिरभवत् परमोपगूढः
सूरिव्रजप्रथितकीर्त्तिरथ द्वितीयः ॥ २ ॥
पद्मतिलकगुरुरप्यतोऽभवद् ज्ञानदर्शनचरित्रसुंदरः ।
सूरिराड् विजयते चतुर्थकः सोमतिलकगुरुरत्र विश्रुतः ॥ ३ ॥
ऊकेशवंशतिलकं श्रीशांवरगोत्रमंडनं परमम् ।
पासलश्रेष्ठीः समभूज्जिनसमयरतो गुणमहीयान् ॥ ४ ॥
तस्यान्वये श्रावकमौलिरत्नं पुराऽजनि श्रीअरसीहसाधुः ।
तस्याऽऽसतां द्वौ तनयौ गुणज्ञौ क्षे.......जिनराजभक्तौ ॥ ५ ॥
श्रीआसपालस्य सुता अभूवन् पंच पृथिव्यां प्रथिताश्चरित्रैः ।
अदभ्रबुद्धिः प्रथमोऽभ्रसंज्ञः सद्दर्शनस्थः किल धीसलोऽन्यः ॥ ६ ॥
सामंतसिंहो मतिमांस्तृतीयः ततश्चतुर्थो विजयाद्यसिंहः ।
अथार्जुनाख्यः किल पंचमोऽपि पंचाऽभ्रसाधुस्तनयानसूत ॥ ७ ॥
आद्योऽभवद्देल्हणनामधेयः स्तंभाभिधोऽन्यो जगसीहनाम ।
तुर्योऽथ धीमान् किल पासदेवो झाझाभिधानः प्रथितोऽपरश्च ॥ ८ ॥
अभ्रांगजो देल्हण एष भक्त्यां तातस्य पुण्योदयवर्द्धनाय ।
जिनागमाराधनतत्परोऽमुमलेखयत् पुस्तकमादरेण ॥ ९ ॥

*

No. 172 : Darśanaśudhiprakaraṇa with Commentary—Samyaktvaśuddhi-prakaraṇa with Commentary

दर्शनशुद्धिप्रकरणम् सटीकम्—सम्यक्त्वशुद्धिप्रकरणम् सटीकम्

Folios – 283
Language – Prakrit & Sanskrit
Author – Candraprabhasūri
Commentator – Vimalagaṇi
Size – 28 × 2.2 inches
Condition – Good
Date of Composition of Commentary – V. S. 1184
Age of MS. – c. First quarter of the 13th cent. V.S.

General Remarks – Last five folios are broken.

आदिः—

॥ नमः श्रीसर्वज्ञाय ॥

चंचच्चंद्रमरीचिचारुरुचिरा विश्वंभरा राजते
कीर्तिर्विष्टपचंद्रशेखरशशी शीतांशुशीतत्विषम् ।

य: शुद्धाशयशुद्धवुद्धिविभवो धीरो धिनोत्युद्धवं
धीरं नौमि नमत्सुरासुरशिरोघृष्टांह्रिविश्वाग्रणी: ॥ १ ॥

येषामास्यारविंदागमसुपरिमलास्वादमिथ्यालिमाला-
मत्ता मूकाऽपि धत्ते मधुरमुखरतामेवमंह्रिप्रसाद: ।
चंचत्स्वर्गापवर्गप्रभवसुसुखदो देहिनां भानवो ये
भासंते चारुगोभिस्त्रिभुवनमखिलं लीलया कामदाभि: ॥ २ ॥

तेषां परमगुरूणां नत्वा पदपंकजं स्फुटां वक्ष्ये ।
वृत्तिं दर्शननाम्न: शास्त्रस्य हितां च सुखबोधाम् ॥ ३ ॥

इह हि भीमभवाटवीभ्रमणभयोद्भ्रान्तमानसस्य नारकातिर्यग्नरामरचतुर्गतिगतातिकटुकशारीरिकमानसानेकदु:खविच्छेदचिकीर्षो: । दुष्टपुष्टश्लिष्टातिक्लिष्टाष्टकर्मवनगहननिर्दहनवुद्ध्या अतिशयितनरनरेश्वरखेचरखेचरेश्वरचक्रचक्रवर्त्तिसुरासुरसमूहनाकिनायकनिरुपमसुखसंदोहदायिविशुद्धसिद्धिसौधमध्याध्यासनावंध्यनिवंधनधर्मसंसाधनधेयाधर्मकृत्येषु प्रवर्त्तमानस्य । सामान्येनातिधर्मलिप्सो: । अनादिकालालीनमोहवासनावशगतनानाजनप्रवर्त्तितागमप्रतिकूलधर्ममार्गप्रवाहपतितस्य मिथ्यात्वमोहकर्मक्षयोपशमतया समं सम्यक्सन्मार्गमवगम्य जिनशासनानुवादद्वारेण यथावस्थितमुक्तिमार्गमुपदिदर्शयिषुर्भविकलोकस्यानुग्रहार्थं सर्वथा सन्मार्गामृतशंशीत्यनलशमसुधाप्रपातसमम् । संसारमहामहीरुहमूलभूतानाद्यविद्यावासनावलायातमिथ्यात्वनिर्मूलनसहं शिवमार्गप्रणेतृदेवताविशेषसद्धर्मसन्मार्गसद्गुरुजीवादितत्त्वस्वरूपप्रकाशकं अत्यन्तं करुणापरीतचेता: सुगृहीतनामधेयो भगवान् श्रीचंद्रप्रभसूरिर्दर्शनशुद्धिनामकं शास्त्रं चिकीर्षुर्मंगलसंबंधाभिधेयप्रयोजनप्रतिपादनप्रतिवद्धमादाविदं गाथाद्वयमाह ॥ छ ॥

पत्तभवन्नवतीरं दुहदवनीरं शिवंवतरुकीरं ।
कंचणगोरसरीरं नमिऊण जिणेसरं वीरं ॥

वोच्छं तुच्छमईणं अणुग्गहत्थं समत्थभव्वाणं ।
सम्मत्तस्स सरूवं संखेवेणं निसामेह ॥

तत्र विघ्नविनायकोपशमनाय श्रोतृजनप्रवृत्त्यर्थं शिष्टसमयपरिपालनार्थं तावदादितो मंगलमुपादेयम् ।

अन्त:—

संप्रति पुनरपि शास्त्रगतोपदेशमाह—

एयं दंसणसोहिं सव्वे भव्वा पढंतु निसुणंतु ।
जाणंतु कुणंतु लहंतु सिवसुहं सासयं झत्ति ॥

अस्या व्याख्या । एतां दर्शनशुद्धिं सर्वेऽपि भव्याः पठंतु सूत्रतो निःशृण्वंत्वर्थतः । जानंतु पुनः पुनरभ्यासतः ।

यः कंदर्पतरोः कुठारललितो लीलाजितेभः प्रभु-
र्यस्याशेषसुरासुरेंद्रशिरसा पादद्वयं घृष्यते ।
हेलांदोलितमंदिरो जिनपतिः श्रीवर्द्धमानोऽनघः
तीर्थस्यास्य विभुर्जगत्त्रयनतो जीयाज्जगद्भास्करम् ॥ १ ॥

स्यात्तस्याथ भवाटवीसुगहने नानाकुतीर्थित्रजो-
त्सर्पत्श्वापदभीतिके कटुरटन्मेहोग्रघूकाकुले ।
नानाजीवमहीतले तवगणोत्सर्पत्कुजौघाकरे
वाव्याव्यादिमहातिदुःखगहनोल्लासिप्रतापेऽधिकम् ॥ २ ॥

शीलोत्तुंगविशालपालिकलितं सच्छ्रावकश्राविका-
नानावृक्षवृतं समस्तसुतपःस्वाध्यायनीराकरम् ।
नानालब्धिधरथांगपक्षिनिवहोल्लासिप्रकोलाहलं
प्राणित्रासादतीर्थ(?) चारुसुसरस्तत्त्वोदसद्दर्पणम् ॥ ३ ॥

तस्मिन्नुग्रविशालशीलकलितस्वाध्यायध्यानोद्यतो-
त्सर्पच्चारुतपःसुसंयमयुतश्रेयःसुधा....लयः ।
सच्छीलांगदलः कलंकविकलो ज्ञानादिगंधोद्धुरः
सेव्यो देवनृपद्विरेफसुततेः श्रीचंद्रगच्छोऽम्बुजः ॥ ४ ॥

तस्मिंस्तीर्थविभूषकेऽभवदथ श्रीसर्वदेवप्रभुः
सूरिः शीलनिधिर्धिया जितमरुत्सूरिः सतामग्रणीः ।
तस्याऽप्यद्भुतचारुचंचदमलोत्सर्पद्गुणैकास्पदं
स्याच्छिष्यो जयसिंहसूरिरमलस्तस्यापि भूभूषणम् ॥ ५ ॥

हेलानिर्जितवादिवृंदकलिकालाशेपलुप्तव्रता-
चारोत्सर्पितसत्पथैककदिनः सिंहः कुमार्गद्विपे ।

चंचच्चंचलचित्तवृत्तिकरणग्रामाश्वघातो वभू
श्रीचंद्रप्रभसूरिचारुचरितश्चारित्रिणामग्रणीः ॥ ६ ॥

ज्ञानादित्रयरत्नरोहणगिरिः सच्छीलपाथोनिधि-
र्द्धीरो धीधनसाधुसंहतिपतिः श्रीधर्मधूर्धारकः ।
स्यात् सिद्धांतहिरण्यघर्षणकृते पट्टः पट्टः शुद्धधीः
शिष्यो गच्छपतिः प्रतापतरणिः श्रीधर्मघोषप्रभुः ॥ ७ ॥

तच्छिष्यविमलगणिना कृतिना भ्रात्राऽनुजेन शास्त्रस्य ।
अस्योच्चैर्वृत्तिरियं विहिता साहाय्यतः सुधिया ॥ ८ ॥

निजशिष्यविजयसेनाभिधगणिविहिता द्विधा य....ग्यासु ।
करुणामतिगीतार्था विशोध्य विस्तारयंत्वेनाम् ॥ ९ ॥

श्रीवटपद्रकपत्तनविहितावासेन चतुरशीत्यधिकैः ।
एकादशैः शतैर्गतविक्रमकालात्तथा चैत्रे ॥ १० ॥

वदिपक्षचतुर्दश्यां विहितेयं वृत्तिरमलवोधाय ।
स्यात् स्तुत्यार्जितपुन्यं भव्यासुमतां ममापीह ॥ ११ ॥

या विश्वाशेषवस्तुप्रकटनकरणे भानुतुल्या सुपुंसां
यस्याः संपर्कमात्रादखिलसुखमलं लीलयाऽऽसादयंति ।
यामाराध्यातिमूर्खा अपि जननिवहाः पंडिता विश्ववंद्या
जायंते तां नमामि त्रिभुवनविनुतां भारतीं भावतोऽहम् ॥ १२ ॥

यस्याः प्राप्य प्रसादं जडमतिविभवेनाशु वृत्तिः प्रशस्ये-
दृक्षा विद्वज्जनानाममलसुमनसां भेददा चित्तवृत्तेः ।
नानाविद्याप्रपंचप्रगुणगुरुगुणाशेषलब्धेः प्रकोशा
जीयाज्जैनी सुशास्त्रप्रथमरुहकृते भारती वीजकल्पा ॥ १३ ॥

यावत् पाथोधयोऽयं सुरगिरिरखिलालोकलोकोदरस्थो
यावद् द्वीपोऽथ जंवूस्त्रिभुवनतिलकः पूर्णचंद्राकृतिश्च ।
यावज्जैनोऽथ धर्मो प्रभवति च शशी भूतलं तावदेनां
भव्याः शृण्वन्तु श्रव्यां विषयविमुखतापादिकां वोधिकां च ॥१४॥ छ ॥

*

No. 173: Darśanaśuddhiprakaraṇa with Commentary—Samyaktva-śuddhiprakaraṇa with Commentary

दर्शनशुद्धिप्रकरणम् सटीकम्—सम्यक्त्वशुद्धिप्रकरणम् सटीकम्

Folios - 264 (?)
Language - Prakrit & Sanskrit
Author - Candraprabhasūri

Size - 30 × 2 inches
Condition - Fair
Age of MS. - c. First half of 15th cent. V.S.

General Remarks - Folio 12, 53, 140, 141, 252, 257, 260 and 262 are missing. Only a piece of folio no. 296 is preserved in the ms. As such the last portion of the ms. is incomplete to a great extent.

आदिः—

|| नमः श्रीपंचपरमेष्ठिभ्यः ||

यद्वक्त्रांभोजवाप्याः स्फुटवचनघटीयंत्रवारेण निर्यत्सूरिश्रेणिप्रणाली प्रणयिगुरुगणप्रोच्छलच्छीकरौघात् । ....शिष्टसमयानुवर्त्तनार्थं च मंगलाभिधेयप्रयोजनाभिधायकं प्रथममेव गाथायुग्ममाहुः—

पत्तभवन्नवतीरं दुहदवनीरं सिवंवतरुकीरं ।

*

No. 174: Darśanaśuddhiprakaraṇa with Commentary

दर्शनशुद्धिप्रकरणम्—सटीकम्

Folios - 205
Language - Prakrit & Sanskrit
Author - Candraprabhasūri
Commentator - Devabhadrācārya

Extent - Granthas 3800
Size - 14·5 × 2·2 inches
Condition - Fair
Age of MS. - c. beginning of 14th cent. V. S.

General Remarks - Folios 91-92 missing. Several folios in the beginning are dilapidated.

आदिः—

नत्वा श्रीवर्द्धमानाय निःसीमज्ञानचक्षुषे ।
जितांतरारिवर्गाय सम्यक् तत्त्वार्थदेशिने ॥ १ ॥

अन्तः—

इति श्रीदेवभद्राचार्यविरचितदर्शनशुद्धिप्रकरणविवरणे पंचमं तत्त्वतत्त्वं(?) समर्थितम् ॥ छ ॥ * ॥

दात्ममतितो
बुधासत्तेर्लब्ध्वा किमपि पुनराम्नायवशतः ।
इयं दब्धा वृत्तिस्तदपि यदसत् किंचिदुदितं
विशोध्यं तत्प्राज्ञैरवि................॥ १ ॥

आस्ते तुंगो घनाभोगः सुप्रतिष्ठो भुवस्तले ।
आस्थानं द्विजसार्थानां श्रीकोटिकगणद्रुमः ॥ २ ॥

तत्रायता घनच्छाया सुमनः ।
विख्याता सदैव फलशालिनी ॥ ३ ॥

गोभिः सुधावयस्याभिस्तर्पिताशेषभूतलम् ।
तस्यां सुवृत्तसंशोभि चांद्रं विजयते कुलम् ॥ ४ ॥

अर्ह ख्यानगुंजारवैः
श्रोतृस्वांतनिकुंजकल्मषमृगानुत्त्रासयन् सर्वतः ।
प्रोन्मादिप्रतिवादिवारणघटाविक्षोभदक्षोऽभवत्
तत्र श्री..................धानः प्रभुः ॥ ५ ॥

तच्छिष्यः समजायताद्भुतनिधिश्चारित्रिणामग्रणीः
शास्त्रस्यास्य विधायकः कुशलधीर्निःशेषशास्त्राध्वनि ।
लुप्त...................कर्त्ता कलौ
श्रीचंद्रप्रभसूरिरित्यभिधया ख्यातः क्षितौ सद्गुरुः ॥ ६ ॥

एतत्पट्टधुरंधरः शमनिधिः श्रेष्ठस्तपःशालिनां
प्रह्वश्री ज...................क्रमः ।
अर्हच्छासनवार्द्धिवर्द्धनविधौ ताराधिनाथोऽभवद्
भव्यांभोजवनप्रबोधनरविः श्रीधर्मघोषप्रभुः ॥ ६ ॥

आचारेण कु...................पः
स्वामित्वेन गुणज्ञता विदुरता शीलेन दाक्ष्यं श्रिया ।
इत्थं यस्य पुरं कुटुंबिन इवाध्यूषुर्गुणाः सुस्थिताः
शिष्यस्तस्य समंतभद्र...................॥ ७ ॥

शिष्यस्तस्याथ चंद्रप्रभपरमगुरोरद्वितीयो द्वितीय-
वन्धुः श्रीधर्मघोषाभिधमुनिवृषभस्यानुजातोऽभिजातः ।
प्रज्ञाप्राग्भारपश्चात्कृ....................
....ग्रे गण्यो मुनीनां विमलगणिरिति श्लाघ्यनामा बभूव ॥ ८ ॥
सरसा विचारवहुला सच्चक्रानंदहेतुरस्ताघा ।
दर्शनशुद्धेर्वृत्तिः क्ष....................॥ ९ ॥
सूरिः श्रीदेवभद्राख्यस्तस्य शिष्योऽस्ति मंदधीः ।
प्रतिष्ठितः स्वयं श्रीमद्धर्मघोषाख्यसूरिभिः ॥ १० ॥
गुरोस्तेन वृहद्वृत्तेरुद्धृत्य कतिचिल्लवान् ।
....................हितकाम्यया ॥ ११ ॥
सूरिश्रीरितिभद्राख्यः (?) स्वशिष्यस्य महामतेः ।
साहाय्यादयमारंभो निष्ठाकोटिमटीकत ॥ १२ ॥
मुनिप्रभानि.................... ।
अलेखि प्रथमादर्शे विश्वविज्ञानशालिना ॥ १३ ॥
ग्रंथाग्रं श्लोकमानेन वृत्तावस्यासुदीरितम् ।
बुधैस्त्रीणि सहस्राणि संयुतान्यष्टभिः शतैः ॥ १४ ॥
...........................क्षत्रपुष्पावलीं
चिन्वानः परिवर्त्तते प्रतिदिनं भास्वन्महामालिकः ।
ग्रंथस्तावदयं सुवर्णनिधिवन्नानार्थसिद्धिप्रद-
स्तत्त्वप्रीतितर....कृतधियां चेतश्चिरं चुंवतु ॥ १५ ॥ छ ॥
श्रीपुण्यतिलकसूरीणां पुस्तिका ॥

*

No. 175 : <u>Dharmaratnaprakaraṇa with Bṛhadvṛtti</u>

धर्मरत्नप्रकरणम्—वृहद्वृत्तिसहितम्

Folios – 279
Language – Prakrit & Sanskrit
Author – Śāntisūri
Commentator – Devendrasūri

Extent – Granthas 9700
Size – 16·7 × 2·7 inches
Condition – Good
Age of MS. – c. First half of 13th cent. V. S.

आदिः—

॥ नमः श्रीप्रवचनाय ॥

सज्ज्ञानलोचनविलोकितसर्वभावनिःसीमभीमभवकाननदाहदावम् ।
विश्वार्चितं प्रवरभासुरधर्मरत्नरत्नाकरं जिनवरं प्रयतः प्रणौमि ॥ १ ॥

श्रीधर्मरत्नशास्त्रं बह्वर्थं स्वल्पशब्दसंदर्भम् ।
स्वपरोपकारहेतोर्विवृणोमि यथाश्रुतं किंचित् ॥ २ ॥

अन्तः—

इति श्री**धर्मरत्नवृत्तिः समाप्ता** ॥ छ ॥

विष्णोरिव यस्य विभोः पदत्रयी व्यानशे जगन्निखिलम् ।
सद्धर्मरत्नजलधिः स श्री**वीरो** जिनो जयतात् ॥ १ ॥

कुंदोज्ज्वलकीर्तिभरैः सुरभीकृतसकलविष्टपाभोगः ।
शतमखशतविनतपदः श्री**गौतम**गणधरः पातु ॥ २ ॥

तदनु **सुधर्मस्वामी जंबूप्रभवा**दयो मुनिवरिष्ठाः ।
श्रुतजलनिधिपारीणा भूयांसः श्रेयसे संतु ॥ ३ ॥

क्रमश**श्चैत्रावालक**गच्छे कविराजराजिनभसीव ।
श्री**भुवनचंद्रसूरि**र्गुरुरुदियाय प्रवरतेजाः ॥ ४ ॥

तस्य विनेयः प्रशमैकमंदिरं **देवभद्र**गणिपूज्यः ।
शुचिसमयकनकनिकषो बभूव भूविदितभूरिगुणः ॥ ५ ॥

तत्पादपद्मभृंगा निस्संगाश्चंग[........]संवेगाः ।
संजनितशुद्धबोधा जगति **जगच्चन्द्र**सूरिवराः ॥ ६ ॥

तेषामुभौ विनेयौ श्रीमान् **देवेन्द्रसूरि** रित्याद्यः ।
श्री**विजयचंद्रसूरि**र्द्वितीयकोऽद्वैतकीर्तिभरः ॥ ७ ॥

स्वान्ययोरुपकाराय श्रीम**द्देवेंद्रसूरिणा** ।
धर्मरत्नस्य [illegible] मिमे ॥ ८ ॥

प्रथमां प्रति [illegible] ।
नि [illegible] ॥

श्रीहेमकलशवाचकपंडितवरधर्मकीर्त्तिमुख्यबुधैः ।
स्वपरसमयैककुशलैस्तदैव संशोधिता चेयम् ॥ १० ॥

यद्गदितमल्पमतिना सिद्धांतविरुद्धमिह किमपि शास्त्रे ।
विद्वद्भिस्तत्त्वज्ञैः प्रसादमाधाय तच्छोध्यम् ॥ ११ ॥

बह्वर्थमल्पशब्दं शास्त्रमिदं रचयता मया कुशलम् ।
यदवापि धर्मरत्नप्राप्तिर्जगतोऽपि तेनास्तु ॥ १२ ॥ छ ॥

ग्रंथाग्रं ९७०० प्रमाणम् ॥ छ ॥

*

No. 176 : Vivekamañjarīprakaraṇa with Commentary

विवेकमञ्जरीप्रकरणम्—सटीकम्

Folios – 242
Language – Prakrit & Sanskrit
Author – Āsaḍa
Commentator – Bālacandrasūri
Date of Composition – V.S. 1248.
Extent – Gāthās 144
Size – 32.7 × 2.5 inches
Condition – Good
Age of MS. – V.S. 1322 (?)

General Remarks – Folio 1 contains a nice illustration of Ṛṣabhadeva, the first *Tīrthaṅkara*, whose favour is invoked in the beginning of the text. Folio 2 contains a nice picture depicting the Ācārya expounding the Vivekamañjarī and one of his pupils as also Āsapāla, who got the ms. copied down, and Āsapāla's wife listening to the sermon. There are three more illustrations on folios 239, 240 and 269.

आदिः—

॥ ॐ ॥ अर्हं ॥ श्रीनाभिनंदनविभोर्वदनं मुदेऽस्तु
श्रीशारदासदनमक्षगवाक्षरम्यम् ।
स्कन्धाचलोपरि कलश्रुतिदोल्योर्य—
त्पर्यंतयोरुपवनीयति कुंतलाली ॥ १ ॥

देवाधिदैवतमतीवमतानि शान्तिः
श्रेयांसि वो दिशतु संहतविश्वतान्तिः ।
यत्पादयोर्नखरुचः प्रणतेषु शान्ति—
तोयच्छटात्वमरुगच्छवयः प्रयान्ति ॥ २ ॥

आदिः—

॥ नमः श्रीप्रवचनाय ॥

सज्ज्ञानलोचनविलोकितसर्वभावनिःसीमभीमभवकाननदाहदावम् ।
विश्वार्चितं प्रवरभासुरधर्मरत्नरत्नाकरं जिनवरं प्रयतः प्रणौमि ॥ १ ॥

श्रीधर्मरत्नशास्त्रं वह्वर्थं स्वल्पशब्दसंदर्भम् ।
स्वपरोपकारहेतोर्विवृणोमि यथाश्रुतं किंचित् ॥ २ ॥

अन्तः—

इति श्रीधर्मरत्नवृत्तिः समाप्ता ॥ छ ॥

विष्णोरिव यस्य विभोः पदत्रयी व्यानशे जगन्निखिलम् ।
सद्धर्मरत्नजलधिः स श्रीवीरो जिनो जयतात् ॥ १ ॥

कुंदोज्ज्वलकीर्तिभरैः सुरभीकृतसकलविष्टपाभोगः ।
शतमखशतविनतपदः श्रीगौतमगणधरः पातु ॥ २ ॥

तदनु सुधर्मस्वामी जंबूप्रभवादयो मुनिवरिष्ठाः ।
श्रुतजलनिधिपारीणा भूयांसः श्रेयसे संतु ॥ ३ ॥

क्रमशश्चैत्रावालकगच्छे कविराजराजिनभसीव ।
श्रीभुवनचंद्रसूरिर्गुरुरुदियाय प्रवरतेजाः ॥ ४ ॥

तस्य विनेयः प्रशमैकमंदिरं देवभद्रगणिपूज्यः ।
शुचिसमयकनकनिकषो वभूव भूविदितभूरिगुणः ॥ ५ ॥

तत्पादपद्मभृंगा निस्संगाश्चंग[........]संवेगाः ।
संजनितशुद्धबोधा जगति जगच्चन्द्रसूरिवराः ॥ ६ ॥

तेषामुभौ विनेयौ श्रीमान् देवेन्द्रसूरि रित्याद्यः ।
श्रीविजयचंद्रसूरिर्द्वितीयकोऽद्वैतकीर्तिभरः ॥ ७ ॥

स्वान्ययोरुपकाराय श्रीमद्देवेंद्रसूरिणा ।
धर्मरत्नस्य टीकेयं सुखबोधा विनिर्ममे ॥ ८ ॥

प्रथमां प्रतिमप्रतिमां विभ्राणो गुरुजनेषु भक्तिभरम् ।
विद्वान् विद्यानंदः सानंदमना लिलेखास्याः ॥ ९ ॥

श्रीहेमकलशवाचकपंडितवरधर्मकीर्तिमुख्यवुधैः ।
स्वपरसमयैककुशलैस्तदैव संशोधिता चेयम् ॥ १० ॥
यद्गदितमल्पमतिना सिद्धांतविरुद्धमिह किमपि शास्त्रे ।
विद्वद्भिस्तत्त्वज्ञैः प्रसादमाधाय तच्छोध्यम् ॥ ११ ॥
बह्वर्थमल्पशव्दं शास्त्रमिदं रचयता मया कुशलम् ।
यदवापि धर्मरत्नप्राप्तिर्जगतोऽपि तेनास्तु ॥ १२ ॥ छ ॥

ग्रंथाग्रं ९७०० प्रमाणम् ॥ छ ॥

*

No. 176 : Vivekamañjarīprakaraṇa with Commentary

विवेकमञ्जरीप्रकरणम्—सटीकम्

Folios – 242
Language – Prakrit & Sanskrit
Author – Āsaḍa
Commentator – Bālacandrasūri
Date of Composition – V.S. 1248.

Extent – Gāthās 144
Size – 32.7 × 2.5 inches
Condition – Good
Age of MS. – V.S. 1322 (?)

General Remarks – Folio 1 contains a nice illustration of Ṛṣabhadeva, the first *Tīrthaṅkara*, whose favour is invoked in the beginning of the text. Folio 2 contains a nice picture depicting the Ācārya expounding the Vivekamañjarī and one of his pupils as also Āsapāla, who got the ms. copied down, and Āsapāla's wife listening to the sermon. There are three more illustrations on folios 239, 240 and 269.

आदिः—

॥ ॐ ॥ अर्हं ॥ श्रीनाभिनंदनविभोर्वदनं मुदेऽस्तु
श्रीशारदासदनमक्षगवाक्षरम्यम् ।
स्कन्धाचलोपरि कलश्रुतिदोलयोर्य—
स्पर्यंतयोरुपवनीयिति कुंतलाली ॥ १ ॥
देवाधिदैवतमतीवमतानि शान्तिः
श्रेयांसि वो दिशतु संहृतविश्वतान्तिः ।
यत्पादयोर्नखरुचः प्रणतेषु शान्ति—
तोयच्छटात्वमरुगच्छवयः प्रयान्ति ॥ २ ॥

मर्यादयाऽपि कलितः प्रियनिम्नगोऽसौ
कुग्राहवानतिगभीरगिरान्वितोऽपि
हित्वा समुद्रमिति कंबुरगाद् यदंकं
स श्रीजिनो वृजिनमस्यतु **शंखलक्ष्मा** ॥ ३ ॥

निर्मेघमेघपथमेचकदेहधामा
वामासुतः स भवताद् भवतां विभूत्यै ।
यन्मौलिसीम्नि रुचि मंडलसप्तसप्तेः
सप्तापि सप्तय इवाहिफणाः स्फुरंति ॥ ४ ॥

ते वः शिवश्रियमपश्चिमतीर्थनाथ-
पादारविन्दनखचंद्रमसो दिशन्तु ।
कामं कलंकविकलाः सकलांकसिंह-
भीप्रोषितोदरमृगा इव ये विभान्ति ॥ ५ ॥

नम्रासुरत्रिदशकोटिकिरीटकोटि-
शाणानिशातपदपद्मनखेन्दुकान्ताः ।
कान्तानि वः शिवसुखानि दिशन्तु शश्व-
दन्येऽपि तीर्थपतयोऽजितनाथमुख्याः ॥ ६ ॥

मोहांधकारधिक्कारदीपिका मुक्तिवर्त्मनि ।
विवेकमंजरीवृत्तिरियं निर्वर्त्स्यते मया ॥ ७ ॥ छ ॥

इह हि महितगुणमहिमकुमुदहिमकरस्य मकरकेतुबाणवित्रस्तसमस्तजनपरित्राणवज्रपंजरस्य **गूर्जर**वसुंधरावदन**मंडलीनगर**मण्डनश्री**महावीरचैत्य**प्रतिष्ठाकृतः सुकृतचरितचमत्कृतदेवेन्द्रस्य श्री**देवेन्द्रगुरु**स्वहस्तस्वपदविनिवेशितस्य भुवनभद्रंकरस्य श्री**भद्रेश्वरसूरि**गुरोः पट्टनभस्तलालंकरणकिरणमालिना प्रतिवादिदैत्यदमनसौरिणा श्रीम**दभयदेवसूरिणा** समुपदिष्टसकलसिद्धान्तसारः संसारवैराग्यरसप्रसरपुष्टचेताः शिष्टसमयसरसिजवनीविकाशनैकरविः श्रीम**दासडकविः कविसभाशृंगार** इत्यपरनामधेयः श्रेयःप्रवृत्तिसुभगम्भावुकभविकजनचक्रप्रमोदसंपादनच्छेकरुचि**र्विवेकमंजरीप्रकरण**करणमभीष्टदेवतानमस्कारपुरःसरं प्रतिजानीते यथा ॥ छ ॥ ग्रं. २१ ॥

सिद्धिपुरसत्थवाहं वीरं नमिऊण चरमजिणनाहं ।
सवणसुहारससरियं वुच्छामि **विवेगमंजरियं** ॥ १ ॥

अन्तः—

अथ प्रशस्तिगाथामाह—

सिरिभिल्लमालनिम्मलकुलसंभवकडुयरायतणएण ।
इय आसडेण रइयं वसुजलहिदिणेसवरिसम्मि ॥ १४४ ॥

व्याख्या—

एतद्धि विवेकमंजरीनामधेयं प्रकरणं आसडेन रचितं रचनामानीतम् । किंविशिष्टेन । सिरिभिल्लमाल त्ति । निर्मलं निर्दूषणं च तत् कुलं च निर्मलकुलं, श्रिया उपलक्षितं तत् भिल्लमालाख्यं निर्मलकुलं च, तस्मात् संभवतीति श्रीभिल्लमालकुलसंभवः । स चासौ कटुकराजस्तस्य तनयः पुत्रो यः स तथा तेन । कदेत्याह । वसुजलहिदिणेसवरिसम्भि । वसवोऽष्टौ जलधयश्चत्वारो दिनेशा द्वादश तैर्निर्मितं वर्षं वसुजलधिदिनेशवर्षे तत्रेति संक्षेपार्थः। व्यासार्थस्तूच्यते ॥ छ ॥

श्रीभिल्लमालाभिधया प्रसिद्धो वंशोऽवतंसो जगतीतलस्य ।
समस्ति पाथोधिरिवाच्युतश्रीसरस्वतीवासनिवास एकः ॥ १ ॥

तस्मिन्नवो रजनिजानिरिवाजनिष्ट
भासा पटुः कटुकराज इति प्रतीतः ।
यो जैनदर्शनमयो भवमूर्ध्नि चक्रे
लीलास्पदं पदमखंडितवृत्त एव ॥ २ ॥

सुधांशो रोहिणीवास्य बुधपुत्रप्रसूः प्रिया ।
वभूवाऽनलदेवीति सतीजनमतल्लिका ॥ ३ ॥

तयोरजनिपातां द्वौ सुतावासडजासडौ ।
सत्पथं न व्यलंघेतां धुर्यौ धर्मरथस्य यौ ॥ ४ ॥

आसडः कालिदासस्य यशोदीपमदीपयत् ।
मेघदूतमहाकाव्यटीकास्नेहनिषेचनात् ॥ ५ ॥

श्रुत्वा नवरसोद्गारकिरोऽस्य कविता गिरः ।
राजसभ्याः कविसभाशृंगार इति यं जगुः ॥ ६ ॥

जिनस्तोत्र-स्तुतीः पद्य-गद्यबंधैरनेकशः ।
चक्रे यः क्रूरकर्मा हि जांगुलीमंत्रसन्निभाः ॥ ७ ॥

येनोपदेशकंदल्याह्वानप्रकरणच्छलात् ।
कृतं मोक्षाध्वनीनेभ्यः पाथेयातिथ्यमक्षयम् ॥ ८ ॥

आसडस्य मृडस्येव गौरी-गंगे बभूवतुः ।
पृथिवींदेवि-जैतल्लदेव्यौ द्वे तस्य वल्लभे ॥ ९ ॥

जैतल्लदेव्यां तनयावभूतां द्वावेतयोराजडनामधेयः ।
ज्येष्ठः कनिष्ठः कलिकालकुंभिद्विड्जैत्रसिंहः किल जैत्रसिंहः ॥ १० ॥

अरिसिंह इति पृथिवींदेव्यां करपुष्करश्रवद्दानः ।
गुरुगिरिपरिणयकर्मा गज इव कलभोंगजः समभूत् ॥ ११ ॥

पुत्रे राजडनाम्नि बालकदलीकांडोपमे स्वःपुरीं
याते बालसरस्वतीति विदिते तच्छोकमूढाशयः ।
संबुद्धोऽभयदेवसूरिसुगुरोर्यैरेव वाक्यैरसौ
तैरेवेदमसूत्रयत् प्रकरणं श्रीआसडः सत्कविः ॥ १२ ॥

एतामासडिजैत्रसिंहसचिवेनात्यर्थमभ्यर्थितो
वृत्तिं श्रीहरिभद्रसूरिसुगुरोः शिष्यप्रशस्यावधिः ।
वाग्देवीप्रतिपन्नसूनुरकृत श्रीबालचंद्राख्यया
विख्यातोऽधिपतिर्गणस्य गणिनीरत्नश्रियो धर्मजः ॥ १३ ॥

नागेन्द्रगच्छार्णवपार्वणेन्दुरेतां बृहद्गच्छनभोरविश्च ।
श्रीमान् विपूर्वो जयसेनसूरिः श्रीपद्मसूरिः समशोधयेताम् ॥ १४ ॥

देवानन्दमुनीन्दुगच्छगगनालंकारशीतद्युतेः
शिष्यः श्रीकनकप्रभाभिधगुरोस्त्रैविद्यचूडामणेः ।
वाग्देवीसुतबालचन्द्रसुकवेराप्तप्रतिष्ठः सुधी-
रेतस्यां सहकारिकारणमभूत् प्रद्युम्नसूरिः पुनः ॥ १५ ॥

उत्सूत्रं यदसूत्रि सूत्रविकलेनालक्षणं लक्षण-
न्यूनेन श्लथरीतिरीतिरिपुणा व्यर्थं हतार्थेन च ।
किंचित् क्वापि मया वचः प्रलपितं स्वच्छंदमच्छंदसा
तच्छोध्यं विबुधैः परैरपि परं कृत्वा प्रसादं मयि ॥ १६ ॥

श्रीधातुर्लेखशाली त्रिदशपथमहालेखिनीदंडशाली
सायं सायं किलायं सितकरखटिनीपात्रमादाय कालः ।
यावद् द्यौपट्टिकायामुडुलिपिविपुलं हस्तलेखं विधत्ते
तावद्वावच्यमाना कृतिभिरतितरां वर्त्ततां वृत्तिरेषा ॥ १७ ॥ छ ॥

इत्याचार्य श्रीबालचन्द्रविरचितायां **विवेकमंजरीवृत्तौ** भावनाविवरणं नाम चतुर्थः परिमलः ॥ छ ॥

उद्दंडशैलमयदंडधृतस्य धात्रीछत्रस्य वारिधिदुकूलवृत्तस्य मौलौ ।
स्वर्णाचलः कलशतामयमेति यावत्तावज्जयं कलयतादिह **जैत्रसिंहः** ॥ १ ॥ छ ॥

समाप्ता चेयं विवेकमञ्जरीप्रकरणवृत्तिः ॥ छ ॥ मंगलं महाश्रीः ॥ छ ॥ भद्रमस्तु ॥ छ ॥ * ॥ छ ॥

॥ ॐ नमः श्रीवीतरागाय ॥

यन्नाममंत्रवशवतोऽपि शरीरभाजां नश्यन्ति सामजघटा इव दुष्कृतौघाः ।
पादाग्रलांछनमृगेन्द्रभुवा भियेव देवः स वः शिवसुखानि तनोतु **वीरः** ॥ १ ॥

विस्तीर्णोऽयं क्षितिरुह इव श्लाघ्यमूलप्रतिष्ठः
प्राग्वाटाख्यो गरिमगुणवानन्वयोऽस्ति प्रधानः ।
लक्ष्मीर्यस्मिन्नवकिसलयश्रेणिशोभां विभर्त्ति
ज्योत्स्नाकारा विकचकुसुमस्तोमसाम्यं च कीर्त्तिः ॥ २ ॥

आद्यस्तत्रानवद्यश्रीः **सीदः** श्रीद इवाभवत् ।
विश्राणनेन यश्चित्रं तत्याज न कुलीनताम् ॥ ३ ॥

वीरदेव्यभिधया शुभलीला तस्य शीलपरिपालनशीला ।
देहिनीव कमला विमलाऽभूद्देहिनी सुकृतनिर्मलबुद्धेः ॥ ४ ॥

चन्द्र इव **पूर्णदेवः** सुतस्तयोः सुगुणकिरणसंपूर्णः ।
दोषाश्रितो न चित्रं कलंकितां न भजते यस्तु ॥ ५ ।

लोकोपकारकरणाद्विजयाद्यसिंहसूरेरुपास्तिजननाज्जिनबिम्बक्लृप्तेः ।
पुत्रद्वयव्रतविधापनतश्च चक्रे यः सार्थकं द्रविणवायुरपि स्वकीयम् ॥ ६ ॥

तस्य च प्रियतमाऽजनि रम्या **वाल्हविः** शशिसमुज्ज्वलशीला ।
वीतरागचरणार्चनचित्ता क्षेत्रसप्तकवितीर्णसुवित्ता ॥ ७ ॥

क्लृप्तोपतापनिधनं विधिनोपधानाभिख्यं तपः शिवसुखाय विधाय धैर्यात् ।
मालाधिरोपणमकारयदात्मनो या द्वेषद्विषो विजयसिंहगुरोः करेण ॥ ८ ॥

त्रपामणिक्षोणिरसावसूत सुतान् दिगीशान् स्फुटमष्टसंख्यान् ।
ये पुण्यकाष्टाश्रितचेतसोऽपि चित्रं न संक्रंदनयोगमापुः ॥ ९ ॥

भोगिभोगायितभुजस्तंभः कुलगृहं श्रियः ।
आद्यस्तत्राभिरामश्रीः ब्रह्मदेवोऽभवत् सुतः ॥ १० ॥

अभिरामगुणग्रामद्रुमारामवसुंधरा ।
दयिता पोइणिस्तस्य बभूव प्रियसंवरा ॥ ११ ॥

वासनावासितस्वान्तश्चन्द्रावत्यां महत्तमे ।
यश्चैत्ये कारयामास बिम्बं वीरजिनेशितुः ॥ १२ ॥

या पद्मदेवसूरेर्गुरोः कृते शुभमतिः स्ववित्तेन ।
चरितं त्रिषष्टिमध्यादलेखयत् प्रथमतीर्थकृतः ॥ १३ ॥

द्वैतीयीको वोहडिरभवत्तनुजो गुणव्रजनिकेतम् ।
एतस्यावीति कुटुंबिनी च चंचद्गुणकदंबा ॥ १४ ॥

स्वकीयवंशे भुवनावतंसे ध्वजानुकारं दधदंगजन्मा ।
सद्धर्मनिर्मापणदत्तवित्तचित्तस्तयोर्बिल्हणसंज्ञ आद्यः ॥ १५ ॥

सती सतीसंहतिशीर्षरत्नं तस्य प्रिया जैनपदाब्जभृंगी ।
बभूव दानादिगुणप्रधाना सन्मानसा रूपिणिनामधेया ॥ १६ ॥

द्वितीय आल्हणश्चाभूद्धाग्यसौभाग्यजन्मभूः ।
अनन्यजनसामान्यसौजन्यमणिरोहणः ॥ १७ ॥

जल्हणस्तृतीयः सूनुश्चतुर्थो मल्हणाभिधः ।
समभून्मोहिनी चापि सुता स्वजनमोहिनी ॥ १८ ॥

जल्हणस्य तृतीयस्य नाऊ जाया शुभाशया ।
वीरपालो वरदेवो वैरिसिंहः सुतास्तयोः ॥ १९ ॥

व्रहुदेवस्तु तृतीयो यश्चारित्रं च सूरिपदवीं च ।
संप्राप्य नाम लेभे सूरिः श्रीपद्मदेव इति ॥ २० ॥

चतुर्थ आमणश्चारुगुणमाणिक्यमंडितः ।
पंचमो वरदेवाख्यः सत्सख्यविहितोद्यमः ॥ २१ ॥

षष्ठः पंडितसंहतिचतुरः स्फूर्जद्यशा **यशोवीरः** ।
आचार्यपदे लेभे श्री**परमानन्द** इत्यभिधाम् ॥ २२ ॥

सप्तमो वीरचन्द्राख्यो यतोऽनूनगुणावलिः ।
समभूज्जिनचंद्राह्वः प्रकृष्टवपुरष्टमः ॥ २३ ॥

सोहडिजा विल्हणस्य च पुत्रचतुष्टयमनूनगुणरूपम् ।
रूपिणिकुक्षिसरोवरकलहंसनिभं विवेकयुतम् ॥ २४ ॥

आसापालः कीर्त्तिवल्ल्यालवालः **सीधूनामा** भूरिधामा द्वितीयः ।
तार्त्तीयीकोऽभूज्जगसिंहसंज्ञस्तुर्यः सूनुः **पद्मसिंहा**भिधानः ॥ २५ ॥

वीरीति पुत्री सुगुणैः पवित्रा मनोहरा सा हरिणीसुनेत्रा ।
अभूच्छुभाचारपवित्रपात्रा सद्रूपलावण्यविशुद्धगात्रा ॥ २६ ॥

जग्राह यः पुत्र इह तृतीयः कामप्रदां संयमराज्यलक्ष्मीम् ।
क्षिप्रं तथा सूरिपदं च लेभे सुदुर्लभं पुण्यवताऽपि पुंसा ॥ २७ ॥

प्रथमस्याऽऽसपालस्य **खेतुका**कुक्षिसंभवाः ।
सज्जनोऽभयसिंहाख्यस्तेजाकः सहजा सुता ॥ २८ ॥

सीधूकाख्यद्वितीयस्य **सोहगे**त्यभवद्वधूः ।
अगण्यपुण्यदाक्षिण्यलावण्यादिगुणान्विता ॥ २९ ॥

तुर्यस्य **पद्मसिंहस्य वाल्हू**नाम्नी प्रियाऽभवत् ।
सुतस्तयोः समुत्पन्नो **नागपाला**भिधः सुधीः ॥ ३० ॥

किंच—

रूपं बलं च विभवो विषयाभिषंगो नीरोगता लवणिमा प्रियसंप्रयोगः ।
वातावधूतपटचञ्चलमेव सर्वं विज्ञाय धर्मनिपुणैर्भविभिर्विभाव्यम् ॥ ३१ ॥

अंगुष्ठमात्रं यो बिम्बं कारयत्यर्हतां बुधः ।
सिद्धिनारीपरिरंभभवं स लभते सुखम् ॥ ३२ ॥

न मनःपर्ययमवधिर्न केवलज्ञानमत्र नैवास्ति ।
पुस्तकलेखनमेतत्तद्यष्टिर्दृष्टिहीनानाम् ॥ ३३ ॥

श्रीरत्नप्रभसूरेर्गुरोः सकाशान्निजस्य सद्बन्धोः
संसाराम्भोधितरीं श्रुत्वेत्यथ देशनां विशदाम् ॥ ३४ ॥

होडापद्रपुरे चैत्ये कारयामास भावभाक् ।
श्रीमतः सुमतेर्बिम्बमर्हतस्त्रिजगत्पतेः ॥ ३५ ॥

अलेखयत् सैष किलाऽऽसपालः श्रेयः श्रिये स्वस्य पितुः प्रधानम् ।
विवेकमञ्जर्यभिधां दधानं सत्पुस्तकं निर्वृतिदीपकल्पम् ॥ ३६ ॥

यावत् पूर्वाद्रिशृंगोदित इह जगति स्वप्रतापेन हन्ति
प्रोद्यन्नीलीविनीलं तिमिरभरमरं तापनस्तत्समन्तात् ।
यावच्छेषाहिराजः क्षितिमलयमसौ स्फूर्त्तिमान् संबिभर्त्ति
श्रेयोधिष्ठानयानप्रवरर....निभः पुस्तकस्तावदा॰ताम् ॥ ३७ ॥

चक्षुर्लोचनविष्टपात्रिनयनप्रोद्भूतसंवत्सरे (१३२३ ?)
मासे कार्त्तिकनाम्नि चंद्रसहिते कृष्णाष्टमीवासरे ।
वृत्तिर्निर्वृतिमार्गदीपकलिकातुल्या विनीतात्मना
रामेण स्वयमादरेण लिखिता नंद्यादनिन्द्याक्षरा ॥ ३८ ॥ छ ॥

प्रशस्तिः समाप्ता ॥ छ ॥ शुभमस्तु ॥ ॐ ॥ पूज्यश्रीप्रद्युम्नसूरिभिः प्रशस्तिः शोधितेति ॥ छ ॥

*

No. 177 : Upadeśamālāprakaraṇa-Heyopādeyāṭīkā

उपदेशमालाप्रकरण-हेयोपादेयाटीका

Folios – 204
Language – Sanskrit
Author – Siddharṣi
Age of MS. – V. S. 1383.

Extent – Granthas 3500
Size – 19·2 × 2·2 inches
Condition – Good

आदिः—

॥ ॐ ॥ नमः सर्वज्ञाय ॥

हेयोपादेयार्थोपदेशभाभिः प्रबोधितजनाब्जम् ।
जिनवरदिनकरमवदलितकुमततिमिरं नमस्कृत्य ॥ १ ॥

गीर्देवताप्रसादितधाष्टर्यान्मंदतरजंतुबोधाय ।
जडबुद्धिरपि विधास्ये **विवरणमुपदेशमालायाः** ॥ २ ॥

अभिधेयादिशून्यत्वादस्या विवरणकरणमनर्थकमिति चेन्न, तत्सद्भावात्तथा ह्यस्यामुपदेशा अभिधेयास्तदभिधानद्वारेण सत्त्वानुग्रहः कर्त्तुरनंतरप्रयोजनम् । श्रोतुस्तदधिगमात् । द्वयोरपि परमपदावाप्तिः परंपराफलम् । संबंधस्तूपायोपेयरूपस्तत्रोपेयं प्रकरणार्थपरिज्ञानं प्रकरणमुपायोऽतो युक्तमेतद्विवरणकरणमिति । अत्राद्यगाथया शिष्टसमयानुसरणार्थं भावमंगलमाह ॥ छ ॥ जगचूडामणीत्यादि ॥ छ ॥

अन्तः—

जुग्गा गाहा ॥ छ ॥ योग्योचिता वैराग्यं विद्यते येषां ते वैराग्यकाः सुश्रावका गृह्यन्ते । सुसाधवश्च वैराग्यकास्तेषां परलोकप्रस्थितानां च संयमोन्मुखतया परत्र हिताभ्युद्यतानामित्यर्थः । केषां संविग्नपाक्षिकाणां योग्येति वर्त्तते । दातव्या पुनरियं बहुश्रुतेभ्यश्च विवेकिभ्यः चशब्दाच्च सुसाधुत्वादिविशेषणेभ्य इति । इह च सूत्रे पाठानां बाहुविध्याद्य एव पर्यालोचयतां सम्यगर्थप्रदः प्रतिभातः स एवास्माभिः पाठो विवृतः, न शेषाः । क्वचित् पुनः सन्निहितसूत्रादर्शेषु प्रस्तुतार्थेनाघटमानं पाठमवेक्ष्य प्रायोऽयमेव क्वचित् पाठो भविष्यतीत्यूहितः स इति ।

विषं विनिर्द्धूय कुवासनामयं व्यचीचरद् यः कृपया मदाशये ।
अचिंत्यवीर्येण सुवासनासुधां नतोऽस्मि तस्मै जिनधर्मसूरये ॥ १ ॥

उत्सूत्रमत्र विवृतं मतिमांद्यदोषाद् गांभीर्यभाजि वचने यदनंतकीर्त्तेः ।
संसारसागरमनेन तरीतुकामैस्तत्साधुभिः कृतकृपैर्मयि शोधनीयम् ॥ २ ॥

तोषाद्विधाय विवृतिं **गिरिदेवतायाः** पुण्यानुबंधि कुशलं यदिमां मयाप्तम् ।
सर्वोऽपि तेन भवतादुपदेशमालाप्रोक्तार्थसाधनपरः खलु जीवलोकः ॥ ३ ॥ छ ॥

उपदेशमालाविवरणं समाप्तम् ॥ छ ॥ भगवद्गीर्देवताया निभमात्रदुर्गस्वामिगुरुशिष्यसिद्धर्षिचरणरेणोः **सिद्धसाधोः** ॥ छ ॥ ग्रंथाग्रं ३५०० ॥ १३८३ वर्षे कार्त्तिक शुदि १३ शनौ अद्येह **श्रीदेवगिरौ** साधुराजसीहसुतसाधुतिहुणसिंहेन **श्रीमदुपदेशमालालघुवृत्ति**पुस्तिका लिखापिता ॥ छ ॥

याद्दशं पुस्तके द्दष्टं ताद्दशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ छ ॥ ॐ ॥ मंगलमस्तु । शुभं भवतु ॥ छं ॥

*

No. 178 : Upadeśamālāprakarana-with Heyopādeyāvṛtti

उपदेशमालाप्रकरणम्-हेयोपादेयावृत्तिसहितम्

Folios – 286
Language – Prakrit and Sanskrit
Author – Dharmadāsagaṇi
Commentator – Siddharṣi Ācārya

Extent – Granthas 4328
Size – 13 × 2 inches
Condition – Good
Age of MS. – c. Latter half of 13th cent. V. S.

*

No. 179 : Upadeśamālāprakaraṇa with Prākṛtakathāgarbhitavṛtti

उपदेशमालाप्रकरणम्-प्राकृतकथागर्भितवृत्तिसहितम्

Folios – 322
Language – Prakrit and Sanskrit
Age of MS. – c. Latter half of 13th cent. V. S.

Size – 36·5 × 2·5 inches
Condition – Good

General Remarks – Folio no. 323 containing the concluding portion and the author's *Praśasti* is missing, and someone else has written down these on folio no. 322 but not consistently.

*

No 180 : Upadeśamālāprakaraṇa-Prākṛtakathāgarbhitavṛtti

उपदेशमालाप्रकरण-प्राकृतकथागर्भितवृत्तिः

Folios – 269
Language – Prakrit & Sanskrit
Age of MS. – V. S. 1291

Size – 32·7 × 2.5 inches
Condition – Good
General Remarks – Folio 126 missing.

आदिः—

चूडामणिगाहा ॥ छ ॥ इयं हि भगवद्गुणोत्कीर्त्तनार्था । तस्य च निर्जराहेतुतया तपोवन्मंगलता स्फुटैवेति ।

अन्तः—

विषं विनिर्द्धूय कुवासनामयं व्यचीचरद्यः कृपया मदाशये ।
अचिंत्यवीर्येण सुवासनासुधां नतोऽस्मि तस्मै **हरिभद्रसूरये** ॥ १ ॥

उत्सूत्रमत्र विवृतं मतिमांद्यदोषाद्गांभीर्यभाजि वचने यदनंतकीर्त्तेः ।
संसारसागरमनेन तरीतुकामैस्तत्साधुभिः कृतकृपैर्मयि शोधनीयम् ॥ २ ॥

तोषाद्विधाय विवृतिं **गिरिदेवतायाः** पुण्यानुबंधि कुशलं यदिमां मयाप्तम् ।
सर्वेऽपि तेन भवतादुपदेशमालाप्रोक्तार्थसाधनपरः खलु जीवलोकः ॥ ३ ॥

उपदेशमालाविवरणं समाप्तम् ॥ छ ॥ कृतिरियं जिनजैमिनिकणभुक्सौगतादिदर्शनवेदिनः सकलग्रंथार्थविन्निपुणस्य **श्रीसिद्धर्षेर्महावर्द्धमानाचार्यस्येति** ।

सिद्धर्षिकृता विवृतिः कथानकैर्योजिता स्वबोधार्थम् ।
प्राक्तनमुनीन्द्ररचितैश्चारुभिरुपदेशमालायाः ॥

यदविधिनासूत्रोक्तं यच्चान्योक्तं सम्यगिह लिखितम् ।
।नेन्द्रमताभिज्ञैस्तच्छोध्यं मर्षणीयं च ।

यदत्र मात्राक्षरबिंदुकानां किंचिद्भवेदूनमथाधिकं वा ।
सर्वं तदार्यैर्मम मर्षणीयं क्षमाप्रधाना हि भवंति संतः ॥ छ ॥

ठक्कुरजैत्रसिंहस्य..........................**प्रदीपसिंहेन** निपुणेनार्पितां लिपिं ॥छ॥

संवत् १२९१ वर्षे आषाढ शुदि १३ शनौ **उपदेशमालीयपुस्तकं** लिखितमिति ॥छ॥ मंगलं महाश्रीः ॥ छ ॥

श्रीमत्यर्बुदतुंगशैलशिखरच्छायाप्रतिष्ठास्पदे
धर्माणाभिधसन्निवेशविषये न्यग्रोधवृक्षो बभौ ।
यत्शाखाशतसंख्यपत्रबहलच्छायास्वपायाहतं
सौख्येनोषितसंघमुख्यशकटश्रेणीशतीपंचकम् ॥ १ ॥

लग्ने क्वापि समस्तकार्यजनके सत्सग्रहालोकने
ज्ञात्वा ज्ञानवशाद् गुरुं...........**देवाभिधः** ।

No. 178: Upadeśamālāprakaraṇa-with Heyopādeyāvṛtti

उपदेशमालाप्रकरणम्-हेयोपादेयावृत्तिसहितम्

Folios – 286
Language – Prakrit and Sanskrit
Author – Dharmadāsagaṇi
Commentator – Siddharṣi Ācārya
Extent – Granthas 4328
Size – 13 × 2 inches
Condition – Good
Age of MS. – c. Latter half of 13th cent. V. S.

*

No. 179: Upadeśamālāprakaraṇa with Prākṛtakathāgarbhitavṛtti

उपदेशमालाप्रकरणम्-प्राकृतकथागर्भितवृत्तिसहितम्

Folios – 322
Language – *Prakrit and Sanskrit*
Size – 36·5 × 2·5 inches
Condition – *Good*
Age of MS. – c. Latter half of 13th cent. V. S.
General Remarks – Folio no. 323 containing the concluding portion and the author's *Praśasti* is missing, and someone else has written down these on folio no. 322 but not consistently.

*

No 180: Upadeśamālāprakaraṇa-Prākṛtakathāgarbhitavṛtti

उपदेशमालाप्रकरण-प्राकृतकथागर्भितवृत्तिः

Folios – 269
Language – Prakrit & Sanskrit
Age of MS. – V. S. 1291
Size – 32·7 × 2.5 inches
Condition – Good
General Remarks – Folio 126 missing.

आदिः—

॥ ॐ ॥ नमो वीतरागाय ॥

हेयोपादेयार्थोपदेशभाभिः प्रबोधितजनान्जम् ।
जिनवरदिनकरमवदलितकुमततिमिरं नमस्कृत्य ॥ १ ॥
गीर्देवताप्रसाधितधार्ष्ट्यान्मंदतरजंतुबोधाय ।
जडबुद्धिरपि विधास्ये विवरणमुपदेशमालायाः ॥ २ ॥

अभिधेयादिशून्यत्वादस्या विवरणकरणमनर्थकमिति चेन्न । तत्सद्भावात्तथा ह्यस्यामुपदेशा अभिधेयाः, तद्द्वारेण सत्त्वानुग्रहः कर्तुरनंतरप्रयोजनम् । श्रोतुस्तदधिगमो । द्वयोरपि परमपदप्राप्तिः परंपराफलं । संबंधस्तूपायोपेयरूपस्तत्रोपेयं प्रकरणार्थपरिज्ञानं । प्रकरणमुपायोऽतो युक्तमेतद्विवरणमिति । तत्राद्यगाथया शिष्टसमयानुपालनार्थं भावमंगलमाह ॥ छ ॥ जग-

चूडामणिगाहा ॥ छ ॥ इयं हि भगवद्गुणोत्कीर्त्तनार्था । तस्य च निर्जराहेतुतया तपोवन्मंगलता स्फुटैवेति ।

अन्तः—

विषं विनिर्द्धूय कुवासनामयं व्यचीचरद्यः कृपया मदाशये ।
अचिंत्यवीर्येण सुवासनासुधां नतोऽस्मि तस्मै **हरिभद्रसूरये** ॥ १ ॥

उत्सूत्रमत्र विवृतं मतिमांद्यदोषाद्गांभीर्यभाजि वचने यदनंतकीर्त्तेः ।
संसारसागरमनेन तरीतुकामैस्तत्साधुभिः कृतकृपैर्मयि शोधनीयम् ॥ २ ॥

तोषाद्विधाय विवृतिं **गिरिदेवतायाः** पुण्यानुबंधि कुशलं यदिमां मयासम् ।
सर्वेऽपि तेन भवतादुप**देशमाला**प्रोक्तार्थसाधनपरः खलु जीवलोकः ॥ ३ ॥

उपदेशमालाविवरणं समाप्तम् ॥ छ ॥ कृतिरियं जिनजैमिनिकणभुक्सौगतादिदर्शनवेदिनः सकलग्रंथार्थविन्निपुणस्य श्री**सिद्धर्षेर्महावर्द्धमानाचार्य**स्येति ।

सिद्धर्षिकृता विवृतिः कथानकैर्योजिता स्वबोधार्थम् ।
प्राक्तनमुनीन्द्ररचितैश्चारुभिरुपदेशमालायाः ॥

यदविधिनासूत्रोक्तं यच्चन्योक्तं सम्यगिह लिखितम् ।
।नेन्द्रमताभिज्ञैस्तच्छोध्यं मर्षणीयं च ।

भदत्र मात्राक्षरबिंदुकानां किंचिद्भवेदूनमथाधिकं वा ।
सर्वं तदार्यैर्मम मर्षणीयं क्षमाप्रधाना हि भवंति संतः ॥ छ ॥

ऽक्कुरजैत्रसिंहस्य........................**प्रदीपसिंहेन** निपुणेनार्पितां लिपिं ॥छ॥

संवत् १२९१ वर्षे आषाढ शुदि १३ शनौ **उपदेशमालीयपुस्तकं** लिखितामिति ॥छ॥
मंगलं महाश्रीः ॥ छ ॥

श्रीमत्यर्वुदतुंगशैलशिखरच्छायाप्रतिष्ठास्पदे
धर्माणाभिधसन्निवेशविषये न्यग्रोधवृक्षो बभौ ।
यत्शाखाशतसंख्यपत्रबहलच्छायास्वपायाहतं
सौख्येनोषितसंघमुख्यशकटश्रेणीशतीपंचकम् ॥ १ ॥

लग्ने क्वापि समस्तकार्यजनके सप्तग्रहालोकने
ज्ञात्वा ज्ञानवशाद् गुरुं...........देवाभिधः ।

आचार्यान् रचयांचकार चतुरस्तस्मात् प्रवृद्धो बभौ
वंद्रोऽयं वटगच्छनाम रुचिरो जीयाद् युगानां शतीम् ॥ २ ॥

तत्रैकादशसूरिराजविपुले गच्छे प्रतिष्ठाधिकः
पूर्वं श्रीजिनचंद्रसूरिरभवत् सीमंधरद्योतकः ।

शुद्धात्मा धवलक्कके पुरिवरेण्ये ढाकचैत्यान्तरे
श्रीसंघप्रभवप्रभावविपुल[प्रद्योत]नद्योतिनि ॥ ३ ॥

तस्मिन् पट्टमहोदधौ नवविधुः श्रीआम्रदेवाभिधः
[श्रीआख्यानक]कोशशास्त्ररचनाचंचन्मतिद्योतिमान् ।

यद्व्याख्यानरसायनामृतमहालाभादहो देवता
कौष्मांडी समुपागमत् प्रमुदिता जीयात् स सूरिप्रभुः ॥ ४ ॥

...............यादिसूरिरभवत् श्रीनेमिचंद्राभिधो
...........धर्म्यजिनद्वयीसु चरितप्रख्यातकीर्त्तिस्ततः ।

तार्त्तीयो मुनिपुंगवः समजनि श्रीमान् यशोदेवयुक्
सूरिः सच्चरितप्रसिद्धमहिमा संशुद्धधामा शशी ॥ ५ ॥

पीयूषोन्मुखमुख्यशांतरसवत्सांद्रे मनःस्थानके
सम्यक्कुलक्षणमूल...........साहित्यग........बुधिः ।

................सूरिभिर्वल्लीव वागीश्वरी
यज्ञे........त्तनिश्चयफला...........सूरिप्रभोः ॥ ६ ॥

....

*

No. 181 : <u>Upadeśamālāprakaraṇa-Doghaṭṭīvṛtti</u>

उपदेशमालाप्रकरण-दोघट्टीवृत्तिः

Folios – 311
Language – Sanskrit, Prakrit, Apabhraṃśa
Author – Ratnaprabhasūri, disciple of Vādidevasūri

Size – 35 × 2·2 inches
Condition – Good
Composition – V. S. 1238
Age of MS. – c. First half of 14th cent. V. S.

आदिः—

॥ ॐ ॥ नमः श्रीदेवसूरिगुरुपादुकाभ्यः ॥

यस्यारघट्टस्य घनोपदेशमालार्पितध्यानघटाघटीभिः ।
संसारकूपाद् भवभृज्जलानामूर्द्ध्वं गतिः स्यात् स जिनोऽवताद् वः ॥

रागादिक्षपणपटुः स केवलश्री-
जृम्भारिव्रजमहितो यथार्थवाक्यः ।

नाभेयः स भवतु भूतये सदा न-
स्तीर्थस्याधिपतिरयं च **वर्धमानः** ॥

पायं पायं प्रवचनसुधां प्रीयते या प्रकामं
स्वैरं स्वैरं चरति कृतिनां कीर्त्तिवल्लीवनेषु ।

दोग्ध्री कामान् नवनवरसैः सा भृशं प्रीणयन्ती
मादृग्वत्सान् जयति जगति श्रीगवी **देवसूरेः** ॥

विशुद्धसिद्धान्तधुरां दधानां संसारनिस्सारकृतावधानाम् ।
श्राद्धः सुधासिन्धुमिमां विशालां प्राप्नोति पुण्यै**रुपदेशमालाम्** ॥

सत्यामपि सद्वृत्तौ वृत्तिममुष्याः करोम्यहृदयोऽपि ।
त्वरयति यस्मान्मामिह सविशेषकथार्थिनां यत्नः ॥

तत्रादौ मंगलाभिधेयादि प्रतिपादनायाह ॥ नमिऊण गाहा । अत्र पूर्वार्धेन निर्विघ्नमारब्धप्रकरणसमाप्त्यर्थमिष्टदेवतानमस्काररूपं मंगलमपरार्द्धेन पुनरध्येतृश्रोतृव्याख्यातृप्रवृत्त्यर्थमभिधेयसम्बन्धौ साक्षादाह ।

अन्तः—

इति श्री**रत्नप्रभ**सूरिविरचितायामु**पदेशमालाविशेषवृत्तौ** चतुर्थो विश्रामः ॥ छ ॥
॥ * ॥ छ ॥

नानारूपनरोत्तमैकवसतिर्नीरागतासंगतः
पातालं परितः स्फुरन्निह बृहद्गच्छोऽस्ति रत्नाकरः ।

स श्रीमन्**मुनिचन्द्र**सूरिसुगुरुस्तत्राभवद् भूरिभिः
शाखाभिर्भुवि यः **प्रयागवटवद्** विस्तारमुद्रामगात् ॥

साहित्यतर्कागमलक्षणेषु यद्ग्रंथवीथी कविकामधेनुः ।
कस्योपकारं न चकार सम्यग् निःशेषदेशेषु च यद्विहारः ॥

शिष्यः श्रीमुनिचन्द्रसूरिगुरुभिर्गीतार्थचूडामणिः
पट्टे स्वे विनिवेशितस्तदनु स श्रीदेवसूरिप्रभुः ।
आस्थाने जयसिंहदेवनृपतेर्येनास्तदिग्वाससा
स्त्रीनिर्वाणसमर्थनेन विजयस्तम्भः समुत्तम्भितः ॥

तत्पट्टप्रभवोऽभवन्नथ गुणग्रामाभिरामोदयाः
श्रीभद्रेश्वरसूरयः शुचिधियस्तन्मानसप्रीतये ।
श्रीरत्नप्रभसूरिभिः शुभकृते श्रीदेवसूरिप्रभोः
शिष्यैः सेयमकारि सम्मदकृते वृत्तिर्विशेषार्थिनाम् ॥

श्रीदेवसूरिशिष्यभ्रातॄणां विजयसेनसूरीणाम् ।
आदेशस्यानृणभावमगममेतावताऽहमिह ॥

यदियमुपदेशमाला श्रावकलोकस्य मूलसिद्धान्तः ।
प्रायेण पठति चायं तदिहास्माभिः कृतो यत्नः ॥

व्याख्यातृचूडामणिसिद्धनाम्नः प्रायेण गाथार्थ इहाभ्यधायि ।
क्वचित् क्वचिद् या तु विशेषरेषा सद्भिः स्वयं सा परिभावनीया ॥

यदिह किंचिदनागमिकं क्वचिद् विरचितं मतिमन्दतया मया ।
तदखिलं सुधियः क्षमयामि च कृतकृपाः परिशोधयतादरात् ॥

स्वस्य परस्य च सूक्तैर्वृत्तिर्विस्तारिता चकास्तीयम् ।
मणिखण्डमण्डलैरिव सुवर्णपूजा जिनेन्द्राणाम् ॥

प्रकृता समर्थिता च श्रीवीरजिनाग्रतो भृगुपुरेऽसौ ।
अश्वावबोधतीर्थे श्रीसुव्रतपर्युपास्तिवशात् ॥

संशोधिता च सन्निहितकतिपयैः सहृदयैरियं प्रायः ।
पुनरपि कण्टकशुद्धिः कार्या वः प्रार्थये सर्वान् ॥

भास्वद्भास्वरकान्तकान्तातिलकं प्रक्षिप्तवज्राकृतं
निर्यन्नीलशिलातलांशुपटलीदुर्वारदुर्वाङ्कुरम् ।
यावन्मेरुमहीभृतं प्रति करोत्याराात्रिकोत्तारणं
ताराभिर्द्युविलासिनी विजयतां तावन्नवैषा कृतिः ॥

विक्रमाद्वसुलोकार्कवर्षे[१२३८]माघे समर्थिता ।
एकादश सहस्राणि मानं सार्द्धशतं तथा ॥ ११९५० ॥
छ ॥ शुभमस्तु ॥ लेखकपाठकयोः ॥ छ ॥ छ ॥
ॐ ॥ नमः श्रीवर्द्धमानाय वर्द्धमानाय वेदसा ।
वेदसारं परब्रह्मब्रह्मबद्धस्थितिश्च यः ॥ १ ॥
स्वबीजमुप्तं कृतिभिः कृषीवलैः इत्यादि

*

No. 182: Bhavabhāvanāprakarana with the author's own commentary

भवभावनाप्रकरणम्-स्वोपज्ञवृत्तिसहितम्

Folios – 325
Language – Prakrit & Sanskrit
Author & Commentator – Maladhārī Hemacandrasūri
Age of MS. – V. S. 1249.
Extent – Granthas 12950
Size – 28·7 × 2·5 inches
Condition – Good
Date of Composition – V. S. 1170

आदिः—

॥ ॐ ॥ नमः सर्वज्ञाय ॥

येनादौ नयसंपदः प्रकटिताः सृष्टा स्थितिर्भूभृता-
मुत्क्षिप्तोऽतिगुरुः स संयमभरस्तप्तं तदुग्रं तपः ।
तस्माज्ज्योतिरवाप्य केवलमयं येनाभिवीक्ष्योद्धृतं
त्रैलोक्यं भवसागरात् तमनघं नौम्याद्यतीर्थंकरम् ॥ १........
वयमपि किल शास्त्रकृतां मध्ये येषां प्रसादलेशेन ।
संजाताः स्वगुरूणां तेषां पदपंकजं वन्दे ॥ ५ ॥

अन्तः—

तत्र प्रत्यक्षरगणनया ग्रंथाग्रं १२९५० ॥ छ ॥ मंगलं महाश्रीः ॥ शुभं भवतु लेखकपाठकयोः ॥ छ ॥ संवत् १२४९ श्रावण वदि ८ सोमे ॥ छ ॥

*

No. 183: Puṣpamālāprakaraṇa with the author's own Vṛtti

पुष्पमालाप्रकरणम्-स्वोपज्ञवृत्तिसहितम्

Folios – 413 सो ल ३
Language – Prakrit & Sanskrit
Extent – Granthas 13968
Size – 30·5 × 1·7 inches

Author – Maladhārī Hemacandrasūri Condition – Fair
Age of MS. – c. latter half of 15th cent. V. S.
General Remarks – A corrected copy. Letters are eradicated at many places probably on account of unsuitable ink. Folios 382-383 missing.

अन्तः—

॥ इति श्रीहेमचन्द्रसूरिविरचितोपदेशमाला समाप्ता ॥ छ ॥

श्रीप्रश्नवाहनकुलांबुनिधिप्रसूतः क्षोणीतलप्रथितकीर्त्तिरुदीर्णशाखः । इत्यादि

....

निजशिष्यलवश्रीहेमचन्द्रसूरिभि........वृत्तिरियम् ।
सूत्रयुता तैरेव हि विहिता श्रुतदेवतावचनात् ॥ ९० ॥

एवं प्रत्यक्षरगणनया सर्वग्रंथाग्रस्य जातानि त्रयोदश सहस्राणि अष्टषष्ट्यधिकानि नव शतानि च ॥ अंकतोऽपि १३९६८ एवं ग्रन्थाग्रम् ॥ छ ॥ पुष्पमालाग्रंथसाग्रंतसमग्राः समाप्ताः ॥ छ ॥

*

No. 184: Puṣpamālāprakaraṇa with the author's own commentary
पुष्पमालाप्रकरणम्-स्वोपज्ञटीकासहितम्

Folios – 391 Extent – Granthas 14000
Language – Prakrit & Sanskrit Size – 33·2 × 2 inches
Author – Maladhārī Hemacandrācārya Condition – Fair
Age of MS. – c. Latter half of 14th cent. V. S.
General Remarks – This work, having been broken down, is completed probably about the latter half of the 15th century. Many folios in the middle of the ms. are broken to pieces.

आदिः—

॥ ॐ ॥ नमो वीतरागाय ॥

येन प्रबोधपरिनिर्मितवाग्वरत्रां क्षिप्त्वोद्धृतानि भुवनानि भवांधकूपात् ।
निःशेषनाकिविभुवंदितपादपद्मो भूयान्ममाशुभभिदे स युगादिदेवः ॥ १ ॥

अन्तः—

अथ श्रुतबहुमानार्थं शिष्यप्रशिष्यपरंपरा[यां]प्रकरणस्य स्थैर्यार्थं चापश्चिममंगलमाह—
जाव जिणसासणमिणं जाव य धम्मो जयंमि विप्फुरइ ।

ताव पढिज्जउ एसा भव्वेहिं सया सुहत्थीहिं ॥

सुगमा ॥ छ ॥ इति श्रीहेमचंद्रसूरिविरचितोपदेशमाला समाप्ता ॥ छ ॥ ग्रंथाग्रं १४००० ॥ छ ॥ शुभमस्तु ॥ छ ॥

*

No. 185 : Upamitabhavaprapañcā Kathā उपमितभवप्रपञ्चा कथा

Folios – 393
Size – 30·5 × 2·5 inches
Language – Sanskrit
Condition – Good
Author – Siddharṣi
Composition – V. S. 962
Age of MS. – c. First half of the 13th cent. V. S.
General Remarks – Folios 391 and 392 contain very nice picture-decorations.

आदिः—

ॐ नमः सिद्धेभ्यः

नमो निर्नाशिताशेषमहामोहहिमार्त्तये ।
लोकालोकामलालोकभास्वते परमात्मने ॥

नमो विशुद्धधर्माय स्वरूपपरिपूर्त्तये ।
मनोविकारविस्तारगोचरातीतमूर्त्तये ॥

नमो भुवनसंतापिरागकेसरिदारिणे ।
प्रशमामृततृप्ताय नाभेयाय महात्मने ॥

नमो द्वेषगजेन्द्रारिकुंभनिर्भेदकारिणे ।
अजितादिजिनस्तोमसिंहाय विमलात्मने ॥

नमो दलितदोषाय मिथ्यादर्शनसूदिने ।
मकरध्वजनाशाय वीराय विगतद्विषे ॥

अथवा—

अंतरंगं महासैन्यं समस्तजनतापकम् ।
दलितं लीलया येन केनचित्तं नमाम्यहम् ॥

समस्तवस्तुविस्तारविचारापारगोचरम् ।
वचो जैनश्वरं वंदे सूदिताखिलकल्मषम् ॥

मुखेंदोरंशुभिर्व्याप्तं या बिभर्त्ति विकस्वरम् ।
करे पद्ममचिन्त्येन धाम्ना तां नौमि देवताम् ॥

परोपदेशप्रवणो मादृशोऽपि प्रजायते ।
यत्प्रभावान्नमस्तेभ्यः सद्गुरुभ्यो विशेषतः ॥

इत्थं कृतनमस्कारः शांतविघ्नविनायकः ।
विवक्षितार्थप्रस्तावं रचयिष्ये निराकुलः ॥

अन्तः—

तदिदमत्र सुगुह्यमहो जनाः ! हृदि विधत्त परं परमाक्षरम् ।
मलविशोधनमेव सुमेधसा लघुविधेयमिहाऽऽप्य जिनागमम् ॥

एतन्निःशेषमत्र प्रकटितमखिलैर्युक्तिगर्भैर्वचोभिः
प्रस्तावे भावसारं तदखिलमधुना शुद्धबुद्ध्या विचिंत्य ।
भो भव्याः ! भाति चित्ते यदि हितमनघं चेदमुच्चैस्तरां व-
स्तत्तूर्ण्णं मेऽनुरोधाद्विदितफलमलं स्वार्थसिद्ध्यै कुरुध्वम् ॥

उत्सूत्रमत्र रचितं मतिमांद्यभाजा किंचिद्यदीदृशि मयाऽत्र कथानिबंधे ।
संसारसागरमनेन तरीतुकामे तत्साधुभिः कृतकृपैर्मयि शोधनीयम् ॥

पार्श्विल्लसाधोरपि लिखितं तथा **इत्युपमितभवप्रपंचायां कथायां** पूर्वसूचितमीलकवर्ण्णनोऽष्टमः प्रस्तावः समाप्तः ॥ छ ॥ * ॥ समाप्ता **चेयमुपमितभवप्रपंचा कथेति** ॥ छ ॥

द्योतिताखिलभावार्थः सद्भव्याब्जप्रवोधकः ।
सूराचार्योऽभवद्दीप्रः साक्षादिव दिवाकरः ॥

स **निर्वृतकुलोद्भूतो लाटदेश**विभूषणः ।
आचारपंचकोट्युक्तः प्रसिद्धो जगतीतले ॥

अभूद् भूतहितो धीरस्ततो **देल्लमहत्तरः** ।
ज्योतिर्निमित्तशास्त्रज्ञः प्रसिद्धादेशविस्तरः ॥

ततोऽभूदुल्लसत्कीर्त्तिर्ब्रह्मगोत्रविभूषणः ।
दुर्गस्वामी महाभागः प्रख्यातः पृथिवीतले ॥

प्रव्रज्यां गृह्णता येन गृहं सद्धनपूरितम् ।
हित्वा सद्धर्ममाहात्म्यं क्रिययैव प्रकाशितम् ॥

यस्य तच्चरितं वीक्ष्य शशांककरनिर्मलम् ।
बुद्धास्तत्प्रत्ययादेव भूयांसो जंतवस्तदा ॥

सद्दीक्षादायकं तस्य स्वस्य चाहं गुरूत्तमम् ।
नमस्यामि महाभागं गर्गर्षिं मुनिपुंगवम् ॥

क्लिष्टेऽपि दुःषमाकाले यः पूर्वमुनिचर्यया ।
विजहारेह निःसंगो दुर्गस्वामी धरातले ॥

सद्देशनांशुभिर्लोके द्योतित्वा भास्करोपमः ।
श्रीभिल्लमाले यो धीरो गतोऽस्तं सद्विधानतः ॥

तस्मादतुलोपशमः सद्‌र्षि(?)रभूदनाविलमनस्कः ।
परहितनिरतैकमतिः सिद्धांतनिधिर्महाभागः ॥

विषमभवगर्त्तनिपतितजंतुशतालंबदानदुर्ललितः ।
दलिताखिलदोषकुलोऽपि सततकरुणापरीतमनाः ॥

यः संग्रहकरणरतः सदुपग्रहनिरतबुद्धिरनवरतम् ।
आत्मन्यतुलगुणगणैर्गणधरबुद्धिं विधापयति ॥

बहुविधमपि यस्य मनो निरीक्ष्य कुंदेंदुविशदमद्यतनाः ।
मन्यंते विमलधियः सुसाधुगुणवर्णनं सत्यम् ॥

उपमितप्रभवप्रपंचा कथेति तच्चरणरेणुकल्पेन ।
गीर्देवतया विहिताऽभिहिता सिद्धाभिधानेन ॥

अथवा—

आचार्य हरिभद्रो मे धर्मबोधकरो गुरुः ।
प्रस्तावे भावतो हंत स एवाद्ये निवेदितः ॥

विषं विनिर्धूय कुवासनामयं व्यचीचरद्यः कृपया मदाशये ।
अचिंत्यवीर्येण सुवासनासुधान्नतोऽस्मि तस्मै हरिभद्रसूरये ॥

अनागतं परिज्ञाय चैत्यवंदनसंश्रया ।
मदर्थेन कृता येन वृत्तिर्ललितविस्तरा ॥

यत्रातुलरथयात्राधिकमिदमिति लब्धवरजयपताकम् ।
निखिलसुरभुवनमध्ये सततप्रमदं जिनेन्द्रगृहम् ॥

यत्रार्थाष्टकशालायां धर्मः सद्देवधामसु ।
कामो लीलावतीलोके सदाऽऽस्ते त्रिगुणो मुदा ॥

तत्रेयं तेन कथा कविना निःशेषगुणगणाधारे ।
श्रीभिल्लमालनगरे गदिता जिनमंडपस्थेन ॥
प्रथमादर्शे लिखिता साध्व्या श्रुतदेवतानुकारिण्या ।
दुर्गस्वामिगुरूणां शिष्यिकयेयं **गणा**भिधया ॥
सम्वत्सरशतनवके द्विषष्टिसहितेऽतिलंघिते चास्याः ।
ज्येष्ठे सितपंचम्यां पुनर्वसौ गुरुदिने समाप्तिरभूत् ॥ छ ॥

मंगलं महाश्रीः ॥ छ ॥ शुभं भवतु लेखकपाठकयोः ॥ छ ॥

श्रीमालाचलमौलिमूलमिलितस्त्रैलोक्यसुश्लाघितः
पर्वालीकलितः सुवर्ण्णनिलयः प्रासादलब्धालयः ।
लीनालीभ्यकुलः प्रलीनकलुषः शुभ्रातपत्रानुगो
वंशोऽस्ति प्रकटः सदौषधनिधिः श्रीध**र्कटानां** पट्टः ॥ १ ॥

सारासारविचारचारुचतुरः सारार्थबद्धादरः
संसारोदरवर्त्तिजंतुशरणश्रीमज्जिनार्चापरः ।
कारुण्याकरसद्गुरुस्तुतिवशप्राप्तार्थदानोद्यत-
स्तत्रात्मीयकुलक्रमोचितरतः स**न्नेमिचन्द्रो**ऽभवत् ॥ २ ॥

तस्यानघा घनपयोधरयुग्मरम्या रामानुरूपगुणरंजितभर्तृचित्ता ।
चिंताव्यतीतफलदायकधर्मलीना **निर्वाणि**नामविदिता जनतासु पत्नी ॥ ३ ॥

जीवाजीवपदार्थसार्थवचनः संपूर्णचंद्राननः
सर्वाधीनधनः सलीलगमनः क्रोधेभपंचाननः ।
नैपुण्यार्जितसज्जनः प्रतिदिनप्रारब्धदानावनः
सूनुः श्लाघितसर्वदेवभुवनख्याताभिधानस्तयोः ॥ ४ ॥

देवेन केनापि कदाचिदेष नीतो रजन्यां स्वगृहात् प्रसुप्तः ।
अष्टापदे वंदितवान् जिनेन्द्रान् प्रातः स्वहस्ते कुसुमं ददर्श ॥ ५ ॥

सदा दानासक्ता स्वकुलविमलाचारनिरता सुशीलप्रख्याता परहितरता दैन्यरहिता ।
अमानातिक्रांता गुणगणयुता सज्जनमता सदच्छुप्तानामा वरसहचरी तस्य च तयोः ॥ ६ ॥

लक्ष्मीपतिः सुतनयोऽजनि यक्षदेवः श्रीराजिनिनयनसम्मद आम्रदेवः ।
धाधमिनोभवनदीपकचांदिगाख्यस्तुर्यो यशोमतिवधूप्रियपुंडरीकः ॥ ७ ॥

चतुर्भिरेभिर्जिनधर्मलीनैर्विभावितागाधभवाब्धिभावैः ।
व्यधायि धंधाणकसन्निवेशे शरण्यचंद्रप्रभदेवहर्म्यम् ॥ ८ ॥

प्रत्याख्यातं येन कृत्वौदनादेः पद्भ्यां निर्गत्योज्जयंते नगेन्द्रे ।
श्रीमन्नेमिर्वंदितः पूजितश्च क्षिप्रं भूयाद्यक्षदेवः स सौख्यी ॥ ९ ॥

यक्षदेवस्य तस्योद्यमी जातवान् चारुपुत्रः प्रियः शांतनामादिमः ।
धर्मकर्मा सुशीलाऽऽम्रदत्ताभिधः क्रोधकोपाजितः कामरूपोऽर्जितः ॥ १० ॥

धर्मार्थादिचतुःप्रकारपुरुषस्वार्थोद्यतस्यान्यदा
द्वौ द्वौ सुंदरभार्ययोर्वरसुतौ श्राद्धाऽऽम्रदेवस्य तौ ।

संजातौ कुलजश्रियः सुसरलौ पार्श्वाख्यमूणागकौ
राजिन्या बुधलक्ष्मणो गुणनिधिर्नागेन्द्रनामाऽनघः ॥ ११ ॥

सन्नेमिचन्द्रगुणमंदिरदेवचंद्रसूनुद्वयं व्यजनि चांदिगनामधेयः ।
प्रद्युम्न-शंबकृतनामकमुज्ज्वलांगं सत्पुंडरीकसुधियाऽजनि पुत्रयुग्मम् ॥ १२ ॥

नागेंद्रः शुभधर्मकर्मनिरतः सन्मोहिनीभार्यया
पद्मावत्यभिधानया सरलया स्वस्रीयया संयुतः ।

चाहिन्या सुतया सुतेन गुणिना सुश्रीकुमारेण वै
शांतापत्ययशःप्रियानघयशोदेवेन धर्मार्थिना ॥ १३ ॥

अथान्यदा दानतपोविधानसुभावनाशीलसनाथधर्मे ।
जिनप्रणीते विदधन् प्रयत्नं शृणोति धर्म्यं वचनं गुरुभ्यः ॥ १४ ॥

तद्यथा—

निरवधिभववार्द्धौ कर्मदोषाद् भ्रमंतः प्रवरशरणहीना योनिलक्षेषु जीवाः ।
कथमपि तुटियोगान्मानुषं जन्मरत्नं सकलगुणविशिष्टं कष्टलक्षैर्लभंते ॥ १५ ॥

प्राप्य तत्प्राणिभिः प्रार्थितार्थप्रदं प्रेरणाप्रोद्यतप्रांजलप्रेरितैः ।
प्रत्यहश्चिंतयित्वा धनाद्यस्थिरं कर्त्तुमेवोचितं चारु जैनं वचः ॥ १६ ॥

प्राणातिपातविरतिप्रमुखानि यानि जैनागमे निगदितानि महाव्रतानि ।
तानि क्षमा यदि न कर्त्तुमशक्तियोगाद्यूयं कुरुध्वममलं गृहिधर्ममेनम् ॥ १७ ॥

कर्त्तव्यं जिनपुंगवस्य महनं स्तोत्रैश्च तत्संस्तवः
सेव्यः साधुजनः प्रसन्नवदनैः श्रव्यं जिनेंद्रोदितम् ।
चिंत्या द्वादश भावना निजहिते कार्यः प्रयत्नो महान्
शक्त्या चान्यहिते भवाब्धितरणप्रत्युद्यतैः प्राणिभिः ॥ १८ ॥

मोहादिद्विपकुंभभेदनविधौ येषां सदा पौरुषं
कामित्वं कमनीयमुक्तिललनापीनस्तनस्पर्शने ।
न्यायोपात्तधनं गतं जिनमतक्षेत्रेषु सप्तस्वहो
तेषां पौरुषकामिता विभविता मन्ये कृतार्था भुवि ॥ १९ ॥

रम्ये श्रीजिनपुंगवस्य सदने बिंबे तदीयेऽनवे
संघे श्लाघ्यतमे प्रशस्तचरिते पूज्ये चतुर्वर्णके ।
सर्वज्ञागमलेखने विनिहितं चित्तं भवेदिष्टदं
सत्क्षेत्रे विधिनोप्तमिष्टसमये शाल्यादिबीजं यथा ॥ २० ॥

ये कृत्वा जिनमंदिराणि विधिना संपूज्य वस्त्रादिभिः
श्रीसंघं समुपात्तनीतिविभवाः श्रद्धापराः श्रावकाः ।
स्याद्वादप्रतिबद्धवाक्यजनकश्रीवीररागेण यद्
निर्नीतं किल लेखयंति भविनः किं किं न तैः सत्कृतम् ॥ २१ ॥

श्रुत्वा पुस्तकवाचनामनुदिनं गृह्णन्ति केचिद् व्रतं
देवाधीशजिनेंद्रपूजनपराः श्राद्धा भवेयुः परे ।
अन्ये भद्रकभावभावितमनःसद्धर्मयोग्या नरा
जायंते खलु यस्य पुस्तकमिदं हेतुः स तच्छ्रेयसः ॥ २२ ॥

इत्याकर्ण्य जिनप्रणीतमनघं धर्मं गुरुभ्यस्ततः
पर्यालोच्य कुटुंबकेन गुणिना नागेन्द्रनामा गृही ।
सिद्धाख्येन कृतां कथामुपमितिं सिद्धांतसारोद्धृतां
तोषादेव सुधीर्व्यलीलिखदिमां स्वश्रेयसे पुस्तके ॥ २३ ॥

यावन्मेरुः प्रतपति रविर्द्योतते यावदिन्दु-
र्यावद्वायुः स्फुरति गगने तारकाः संति यावत् ।

यावद्भूमिः प्रवहति पयःसागरे यावदेतत्
तावन्नंद्यागुणिभिरंनिशं पुस्तकं वाच्यमानम् ।। २४ ।।

।। * ।। मंगलं महाश्रीः ।। छ ।।

*

No. 186 : Triṣaṣṭiśalākāpuruṣacaritramahākāvya–Parvan VIII : Ariṣṭanemicaritra

त्रिषष्टिशलाकापुरुषचरित्रमहाकाव्यम्—अष्टमपर्व : अरिष्टनेमिचरित्रम्

Folios – 234 Size – 24 × 2·2 inches
Language – Sanskrit Condition – Good
Author – Hemacandrācārya Age of MS. – V. S. 1297
General Remarks – Contains 4 excellent illustrations :
Folio 1 : Illustration of Neminātha
Folio 2 : of Ambikādevī
Folio 233 : of the Śrāvaka who got the ms. copied and of his wife.

आदिः—

।। ॐ ।। अर्हं ।। ॐ नमो विश्वनाथाय जन्मतो ब्रह्मचारिणे ।
कर्मवल्लीवनच्छेदनेमयेऽरिष्टनेमये ।।
श्रीनेमेरर्हतः कृष्णविष्णो रामस्य सीरिणः ।
जरासंधप्रतिहरेश्चरित्रं कीर्त्तयिष्यते ।। २ ।।

अन्तः—

द्वाविंशोऽर्हन्नथ च नवमः शार्ङ्गभृत् सीरपाणि-
स्तद्वैरी चेत्यतुल्महसः कीर्त्तिताः पर्वणीह ।
चत्वारोऽपि प्रवचनदिशं सम्यगुद्वीक्ष्य येषा-
मेकैकोऽपि श्रुतिपथगतो विस्मयाय त्रिलोक्याम् ।। १२८ ।।

इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये अष्टमपर्वणि वलदेवस्वर्गगमननेमिनिर्वाणपांडवनिर्वाणवर्णनो नाम द्वादशः सर्गः ।। छ ।।

।। ॐ ।। सद्वृत्तादिगुणौघरत्नरुचिरः शाखाशतैर्विस्तृतो
नव्योन्मीलदखर्वपर्वकलितश्छायास्पदं भूभृताम् ।
उच्चैर्वंश इवास्ति गूर्जरवरः श्रीमालवंशः क्षितौ
सद्धर्मा परमेष सन्ततिफलैर्विश्वोपकारोद्यतः ।। १ ।।

कर्त्तव्यं जिनपुंगवस्य महनं स्तोत्रैश्च तत्संस्तवः
सेव्यः साधुजनः प्रसन्नवदनैः श्रव्यं जिनेंद्रोदितम् ।
चिंत्या द्वादश भावना निजहिते कार्यः प्रयत्नो महान्
शक्त्या चान्यहिते भवाब्धितरणप्रस्तुद्यतैः प्राणिभिः ॥ १८ ॥

मोहादिद्विपकुंभभेदनविधौ येषां सदा पौरुषं
कामित्वं कमनीयमुक्तिललनापीनस्तनस्पर्शने ।
न्यायोपात्तधनं गतं जिनमतक्षेत्रेषु सप्तस्वहो
तेषां पौरुषकामिता विभविता मन्ये कृतार्था भुवि ॥ १९ ॥

रम्ये श्रीजिनपुंगवस्य सदने बिंबे तदीयेऽनघे
संघे श्लाघ्यतमे प्रशस्तचरिते पूज्ये चतुर्वर्णके ।
सर्वज्ञागमलेखने विनिहितं वित्तं भवेदिष्टदं
सत्क्षेत्रे विधिनोप्तमिष्टसमये शाल्यादिबीजं यथा ॥ २० ॥

ये कृत्वा जिनमंदिराणि विधिना संपूज्य वस्त्रादिभिः
श्रीसंघं समुपात्तनीतिविभवाः श्रद्धापराः श्रावकाः ।
स्याद्वादप्रतिबद्धवाक्यजनकश्रीवीररागेण यद्
निर्नीतं किल लेखयंति भविनः किं किं न तैः सत्कृतम् ॥ २१ ॥

श्रुत्वा पुस्तकवाचनामनुदिनं गृह्णन्ति केचिद् व्रतं
देवाधीशजिनेंद्रपूजनपराः श्राद्धा भवेयुः परे ।
अन्ये भद्रकभावभावितमनःसद्धर्मयोग्या नरा
जायंते खलु यस्य पुस्तकमिदं हेतुः स तच्छ्रेयसः ॥ २२ ॥

इत्याकर्ण्य जिनप्रणीतमनघं धर्मं गुरुभ्यस्ततः
पर्यालोच्य कुटुंबकेन गुणिना नागेन्द्रनामा गृही ।
सिद्धाख्येन कृतां कथामुपमितिं सिद्धांतसारोद्धृतां
तोषादेव सुधीर्व्यलीलिखदिमां स्वश्रेयसे पुस्तके ॥ २३ ॥

यावन्मेरुः प्रतपति रविर्द्योतते यावदिन्दु-
र्यावद्वायुः स्फुरति गगने तारकाः संति यावत् ।

यावद्भूमिः प्रवहति पयःसागरे यावदेतत्
तावन्नंद्यागुणिभिरनिशं पुस्तकं वाच्यमानम् ॥ २४ ॥

॥ * ॥ मंगलं महाश्रीः ॥ छ ॥

*

No. 186 : Triṣaṣṭiśalākāpuruṣacaritramahākāvya–Parvan VIII : Ariṣṭanemicaritra

त्रिषष्टिशलाकापुरुषचरित्रमहाकाव्यम्—अष्टमपर्व : अरिष्टनेमिचरित्रम्

Folios – 234 | Size – 24 × 2·2 inches
Language – Sanskrit | Condition – Good
Author – Hemacandrācārya | Age of MS. – V. S. 1297

General Remarks – Contains 4 excellent illustrations:
Folio 1 : Illustration of Neminātha
Folio 2 : of Ambikādevī
Folio 233 : of the Śrāvaka who got the ms. copied and of his wife.

आदिः—

॥ ॐ ॥ अर्हं ॥ ॐ नमो विश्वनाथाय जन्मतो ब्रह्मचारिणे ।
कर्मवल्लीवनच्छेदनेमयेऽरिष्टनेमये ॥
श्रीनेमेरर्हतः कृष्णविष्णो रामस्य सीरिणः ।
जरासंधप्रतिहरेश्चरित्रं कीर्त्तयिष्यते ॥ २ ॥

अन्तः—

द्वाविंशोऽर्हन्नथ च नवमः शार्ङ्गभृत् सीरपाणि-
स्तद्वैरी चेत्यतुलमहसः कीर्त्तिताः पर्वणीह ।
चत्वारोऽपि प्रवचनदिशं सम्यगुद्वीक्ष्य येषा-
मेकैकोऽपि श्रुतिपथगतो विस्मयाय त्रिलोक्याम् ॥ १२८ ॥

इत्याचार्यश्रीहेमचन्द्रविरचिते **त्रिषष्टिशलाकापुरुषचरिते** महाकाव्ये अष्टमपर्वणि बलदेवस्वर्गगमननेमिनिर्वाणपांडवनिर्वाणवर्णनो नाम द्वादशः सर्गः ॥ छ ॥

॥ ॐ ॥ सद्वृत्तादिगुणौघरत्नरुचिरः शाखाशतैर्विस्तृतो
नन्योन्मीलदखर्वपर्वकलितश्छायास्पदं भूभृताम् ।
उच्चैर्वंश इवास्ति **गूर्जरवरः श्रीमालवंशः** क्षितौ
सद्धर्मा परमेष सन्ततिफलैर्विश्वोपकारोद्यतः ॥ १ ॥

एतस्मिन् गुणरत्नरोहणगिरिर्देवप्रसादाभिधः
स्तुत्योऽनेकगुणौघरत्ननिधिभिः कोशाधिपो नूतनः ।
जातो यस्य विवेककल्पविटपी चित्तालबालान्तरे
विश्वप्राणिगणोपकारकरणप्रावीण्यमुद्राफलः ॥ २ ॥

नाम्ना महघलदेवीति प्रिया तस्य प्रियंवदा ।
शुद्धशीला तयोः पुत्री जज्ञे पुत्रद्वयं ततः ॥ ३ ॥

सुता मल्हणदेव्याख्या ठक्कुरचाहडप्रिया ।
विश्रान्तः संततिर्यस्याः श्रेयोभिः कीर्त्तिभाजनम् ॥ ४ ॥

देवं स्वीयगुरुं मनोज्ञवचनैर्यः स्तौति न स्वं पुनः
सर्वस्योपकृतिं तनोति नितरां न स्वस्य कस्मादपि ।
संसर्गं गुणिनां सदैव कुरुते न क्वापि पापीयसां
स श्लाघ्यो बहुदेव इत्यभिधया पूर्वस्तयोरंगजः ॥ ५ ॥

तत्पत्नी जिनराजचारुचरणांभोजद्वयीभृंगिका
श्रीमत्पंचनमस्कृतिस्मृतिपरप्राविण्यपुण्योन्नतिः ।
शीलाचारविचारसारमुक्ताहारावलीभूषिता
ख्याता श्रीजगदेवमंत्रिदुहिता शृंगारदेवी भुवि ॥ ६ ॥

युक्तायुक्तविचारनिस्तुषमतिर्बालप्रसादः पर-
स्तस्याऽभूत् सुभगा कलत्रमभवत्तज्जन्म सूनुद्वयम् ।
आद्योऽस्तीह विशुद्धबुद्धिकलितः सूनुर्नृसिंहाभिधः
सौभ्रात्रप्रथितोरुवृत्तकलितोऽन्यो रत्नसिंहाभिधः ॥ ७ ॥

सुतत्रयं सुता चैका बहुदेवस्यापि संततिः ।
बालभावेऽपि यच्चित्रमबालचरितोत्तमम् ॥ ८ ॥

भक्तिर्व्यक्तिरभिज्ञविस्मयकरी पित्रोस्तथा बंधुषु
शान्तिः शैशवसंगमेऽपि सुधियां केषां न दत्ते मुदम् ।
औचित्यं च पुराणपूरुषजनासाध्यं च यस्योच्चकैः
सत्पुत्रः प्रथमो विवेकवसतिः श्लाघास्पदं छड्डकः ॥ ९ ॥

सुधामूर्त्तिरिवान्यश्चाल्हादको **वद्दका**भिधः ।
शूरःप्रतापमार्त्तण्डस्तृतीयः **पेथडः** पुनः ॥ १० ॥

नाम्ना **नायकदेवी**ति सुतारत्नं सुताऽभवत् ।
तपस्तेजोऽद्भुतं यस्या नादपीयूषसंयुतम् ॥ ११ ॥

नाम्ना **कर्पूरदेवी**ति छड्डकस्य प्रियाऽभवत् ।
संग्रामसिंहस्तत्पुत्रो **हंसिका**दिसुताद्वयम् ॥ १२ ॥

नाम्ना **सहजलदेवी** गेहिनी वद्दकस्य च ।
धर्मरंगे यया चक्रे न प्रमादे निजं मनः ॥ १३ ॥

माघान्वयसमुद्भूत स्य पुत्रिका ।
नाम्ना **प्रतापदेवी**ति **पेथड**स्य प्रियां ततः ॥ १४ ॥

मायाजालमनित्यमत्र कलितं संसारलीलायितं
निजार्थं कुरु ।
तच्छ्रुत्वेति विभावितं विरचितं श्री**नेमिबिंबं** मया
तद्वृत्तस्य विलेखनं श्रुतिरपीदानीं क्रमात् युज्यते ॥ १५ ॥

भक्ति(?)स्वीयकुटुम्बसम्मदकृते पुण्योत्सवाकांक्षिणी
णा **शृंगारदेवी** मुदा ।
सौभाग्याद्भुतरूपचंगिमानिधिश्री**नेमिनाथप्रभो**-
र्वृत्तं विस्मयकारि तच्च विधिना व्याख्यापयामासिवान् ॥ १६ ॥

श्रीमज्जैन....................जगती रम्यालवाल
सौरभभरश्रेयः प्रसूनव्रजः ।
अत्यानंदफलो............प्रतिघनच्छायातपत्रद्युति-
र्यावन्नंदति तावदेष विजयीभूयाच्चिरं पुस्तकः ॥ १७ ॥

मुनिनंदशूरवर्षे १२९७ परिकलिते ।
श्री**नेमिचरित**मेत[लिखापितं वाचितं चापि ?] ॥ १८ ॥

॥ छ ॥ * ॥ मंगलं महाश्रीः ॥ छ ॥

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ छ ॥
शुभं भवतु ॥ छ ॥ * ॥ छ ॥

*

No. 187 : Triṣaṣṭiśalākāpuruṣacaritamahākāvya : Parvans V—VI—VII : From Śāntinātha to Neminātha.

त्रिषष्टिशलाकापुरुषचरितमहाकाव्यम्—पर्व ५–६–७ :

Folios – 224
Language – Sanskrit
Author – Hemacandrācārya

Size – 32 × 2·5 inches
Condition – Good
Age of MS. – c. end of 13th cent. VS.

आदिः—

ॐ ॥ अर्हं ॥ नमः श्रीशान्तिनाथाय कृतविश्वाघशान्तये ।
षोडशाय जिनेन्द्राय पंचमाय च चक्रिणे ॥ १ ॥
मोहांधकारसंदोहकर्त्तनैकविकर्त्तनम् ।
कीर्त्तयिष्यामि तस्याहं चरित्रमतिपावनम् ॥ २ ॥

अन्तः—

इत्याचार्यश्रीहेमचंद्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये सप्तमपर्वणि जयचक्रवर्त्तिचरितवर्णनो नाम त्रयोदशः सर्गः ॥ छ ॥ समाप्तं चेदं सप्तमं पर्व ॥ छ ॥

रामलक्ष्मणदशाननानमिस्तीर्थकृच्चहरिषेणचक्रभृत् ।
चक्रभृच्च जय इत्यमुत्र षड् वर्णिताः श्रुतिसुखाय संतु वः ॥ छ ॥ * ॥
विरोचनरुचिर्देयाद्विश्वेभ्यः सुदिनोदयम् ।
शिवतातिर्जिनः शांतिस्तमस्तोमोपशांतिकृत् ॥ १ ॥
श्रीचंद्रगच्छविशदांबरशीतरश्मिः श्रीमानभूदजितदेवगुरुः प्रतीतः ।
यो जंतुजातवरकैरवकाननस्य स्मेरश्रियं वितनुते तनुभिः स्वगोभिः ॥ २ ॥
यस्यास्यं कमलं नदीनममलं वेधा वेधात् शुद्धधी-
निर्दोषं विलसन्मरीचिरुचिरं नित्योदयश्रीश्रितम् ।
यत्र ब्रह्मसुता स्वयं निवसति स्वैरं श्रियः स्पर्द्धया
यज्जाड्येन विवर्जितं न च सदा रागास्पदं कुत्रचित् ॥ ३ ॥

आसीत्ततो विजयसिंहमुनिः प्रसिद्धः सत्याभिधः शुभविधिर्निधिरागमानाम् ।
धत्ते श्रियं समदवादिजनद्विपानां यो मानखंडनविधौ नखरायुधस्य ॥ ४ ॥

श्रीपद्मदेवनामा सूरिः श्रेष्ठस्ततः समजनिष्ट ।
जनताहृदयसरस्यां हंसा इव यद्गुणा रेजुः ॥ ५ ॥

वेधा व्यधान्नवसुधां वसुधांतरस्थां श्रीपद्मदेवमुनिपुंगववाग्मिषेण ।
या पीयते स्म विबुधैर्न पुनस्तताम यत्तानवं नवरसप्रसरातिरिक्ता ॥ ६ ॥

तत्पादांबुजचंचरीकपरमानंदाभिधानप्रभो-
वाग्देवी मुखवारिजे विजयते हस्तांबुजे श्रीरपि ।
नैवं चेत्तदभूदयं मदभरच्छेदाय किं वा दिनां
किं मौलौ करदानतोऽजनि जनः श्रेयः श्रियो भाजनम् ॥ ७ ॥

तत्पट्टोदयशैलमौलितरणिर्भूषामणिर्भूतले
स श्रीमान् जयदेवसूरिरभवद्भव्यांबुजोल्लासकृत् ।
उन्मीलत्कलिकालकल्मषमषीलोपस्तपःपाथसा
चक्रे येन जिनेश्वरागममहाश्रोतस्विनीजन्मना ॥ ८ ॥

तत्पादपद्मद्वितये षडंह्रिर्जयप्रभः सद्व्रतबद्धबुद्धिः ।
स्वश्रेयसे शांतिजिनादिपर्व विलेखयामास गुणैर्वरेण्यः ॥ ९ ॥

यावद्दिग्दंतिनोऽमी हृदि दधति मुदं भूतधात्री धुरायां
यावत्तिग्मांशुरंशुप्रचयपरिचयादुच्चिनोत्यंधकारम् ।
यावद्धर्मः प्रणीतः प्रसरति सततं सर्वतः श्रीजिनेंद्रैः
सम्यक् पापठ्यमानः शमिभिरभिनवं पुस्तकस्तावदस्तु ॥ १० ॥

शुभमस्तु ॥ छ ॥ समाप्तमिदं श्रीशांत्यादिनमिपर्यंततीर्थकराणां चरित्रम् ॥ छ ॥

*

No. 188 : Triṣaṣṭiśalākāpuruṣacaritamahākāvya—Parvan VIII : Ariṣṭanemicaritra

त्रिषष्टिशलाकापुरुषचरितमहाकाव्य – पर्व ८ : अरिष्टनेमिचरित्र

Folios – 128
Language – Sanskrit
Author – Hemacandrācārya

Size – 34 × 2·2 inches
Condition – Good
Age of MS. – c. First half of 14th cent. V. S.

1637

ગુજરાતી સાહિત્ય પરિષદ ગ્રંથાલય
અમદાવાદ-૩૮૦૦૦૯

अन्तः—

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये अष्टमपर्वणि वलदेवस्वर्गगमननेमिनाथनिर्वाणवर्णनो नाम द्वादशमसर्गः ॥ समाप्तं चेदमष्टमं पर्व ॥ छ ॥ समग्रनिर्ग्रंथचक्रचूडामणिश्रीकृष्णार्षिगच्छे सुविहितशिरोमणिश्रीपद्मचन्द्रोपाध्यायान्वये भट्टारक-श्रीपृथ्वीचंद्रसूरयस्ततपट्टांवरदिनकरश्रीप्रभानंदसूरीणां सदुपदेशेन समस्तपृथ्वीतलख्याते सुचिंतितगोत्रपवित्रे सा० क्षेमंधरपुत्राः सा० धनचंद्रमुनिचंद्रदेपालाभिधाः। धनचंद्र-सुतौ खीमसीहकाल्हाभिधौ। मुनिचंद्रसुताः छीहिलतोल्हसोमसीहहालाभिधाः। खीमसीहपुत्रौ लाडणनरपालौ। सोमसीहपुत्राः सा० धरणिग आसपाल दूलह काल्हू पारर्श्वाभिधानाः। तैः सद्गुरूणां उपदेशलेशं निशम्य संसारासारतां विचार्य संवत् १३९१ वर्षे वैशाखमासे। स्वमातुः सोमश्रीश्रेयोऽर्थं गृहीतमिदं नंदतादाचंद्रार्कं वाचकग्राहकैः सह।

*

No. 189 : Triṣaṣṭiśalākāpuruṣacaritamahākāvya–Parvan X : Mahāvīracaritra

त्रिषष्टिशलाकापुरुषचरितमहाकाव्यम्—पर्व १० : महावीरचरित्रम्

Folios – 266
Language – Sanskrit
Author – Hemacandrācārya
General Remarks – Folio 257 missing.
Size – 25.2 × 2.5 inches
Condition – Good
Age of MS. – V. S. 1324

आदिः—

॥ ॐ नमो वीतरागाय ॥ अर्हं ॥

नमो दुर्वाररागादिवैरिवारानिवारिणे।
अर्हते योगिनाथाय महावीराय तायिने ॥ १ ॥

अथास्य देवदेवस्य देवासुरनरार्चितम्।
चरितं कीर्त्तयिष्यामः पुण्यवारिसरोवरम् ॥ २ ॥

अन्तः—

त्रैलोक्येऽपि हि सात्त्विकेष्वनवधेः प्राग्जन्ममोक्षावधेः
श्रीमद्वीरजिनेश्वरस्य चरितं को वक्तुमीशोऽखिलम्।
अस्ताघस्य तथापि हि प्रवचनाम्भोधेर्गृहीत्वा लवं
किञ्चित् कीर्तितमीदृशं ननु मया स्वान्योपकारेच्छया ॥ ३८५ ॥

इत्याचार्य श्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये दशमपर्वणि श्रीमहावीरनिर्वाणगमनवर्णनो नाम त्रयोदशः सर्गः ॥ समाप्तं चेदं दशमं पर्व ॥ छ ॥ छ ॥ परिपूर्णमिदं त्रिषष्टिशलाकापुरुषचरितं महाकाव्यमिति ॥ शुभं भवतु लेखकपाठकयोः ॥ छ ॥

शिष्यो जम्बूमहामुनेः प्रभव इत्यासीदमुष्यापि च
श्रीशय्यम्भव इत्यमुष्य च यशोभद्राभिधानो मुनिः ।
सम्भूतो मुनिभद्रबाहुरिति च द्वौ तस्य शिष्योत्तमौ
सम्भूतस्य च पादपद्ममधुलिट् श्रीस्थूलभद्राह्वयः ॥ १ ॥

वंशक्रमागतचतुर्दशरत्नकोश..........तस्य दशपूर्वधरो महर्षिः ।
नाम्ना महागिरिरिति स्थिरतागिरीन्द्रो ज्येष्ठोऽन्तिपत् समजनिष्ट
विशिष्टलब्धिः ॥ २ ॥

शिष्योऽन्यो दशपूर्वभृन्मुनिनृपो नाम्ना सुहस्तीत्यभूद्
यत्पादांबुजसेवनात् समदितप्राज्यप्रबोधर्द्धिकः ।
चक्रे सम्प्रतिपार्थिवः प्रतिपुरग्रामाकरं भारते-
ऽस्मिन्नर्द्धे जिनचैत्यमण्डितमिलापृष्ठं समन्तादपि ॥ ३ ॥

अजनि सुस्थित-सुप्रतिबुद्ध इत्यभिधयाऽऽर्यसुहस्तिमहामुनेः ।
शमधनो दशपूर्वधरोऽन्तिपद् भवमहातरुभंजनकुंजरः ॥ ४ ॥

महर्षिसंसेवितपादसान्निधेः प्रचारभागालवणोदसागरम् ।
महान् गणः कोटिक इत्यभूत् ततो गंगाप्रवाहो हिमवद्गिरेरिव ॥ ५ ॥

तस्मिन् गणे कतिपयेष्वपि जातवत्सु साधूत्तमेषु चरमो दशपूर्वधारी ।
उद्दामतुम्बवनपत्तनवज्रखानिवज्रं महामुनिरजायत वज्रसूरिः ॥ ६ ॥

दुर्भिक्षे समुपस्थिते प्रलयवद् भीमत्वभाज्यन्यदा
भीतं न्यस्य महर्षिसंघमभितो विद्यावदातः पटे ।
योऽभ्युद्धृत्य करांबुजेन नभसा पुर्यामनैषीन्महा-
पुर्यां मंक्षु सुभिक्षधामनि तपोधाम्नामसीम्नां निधिः ॥ ७ ॥

तस्माद् वज्राभिधा शाखाऽभूत् कोटिकगणद्रुमे ।
उच्चनागरिकामुख्यशाखात्रितयसोदरा ॥ ८ ॥

तस्यां च **वज्र**शाखायां निलीनमुनिषट्पदः ।
पुष्पगुच्छायितो गच्छश्चन्द्र इत्याख्ययाऽभवत् ॥ ९ ॥

धर्मध्यानसुधासुधांशुरमलग्रन्थार्थरत्नाकरो
भव्याम्भोरुहभास्करः स्मरकरिप्रोन्माथकण्ठीरवः ।
गच्छे तत्र बभूव संयमधनः कारुण्यराशिर्यशो-
भद्रः सूरिरपूरि येन भुवनं शुभ्रैर्यशोभिर्निजैः ॥ १० ॥

श्री**मन्नेमि**जिनेन्द्रपावितशिरस्यद्रौ............संलेखनां
कृत्वाऽऽदौ प्रतिपन्नवाननशनं प्रान्ते शुभध्यानभाक् ।
तिष्ठन् शान्तमनास्त्रयोदश दिनान्याश्चर्यमुत्पादय-
न्नुच्चैः पूर्वमहर्षिसंयमकथाः सत्यापयामासिवान् ॥ ११ ॥

श्रीमान् **प्रद्युम्नसूरिः** समजनि जनितानेकभव्यप्रबोध-
स्तच्छिष्यो विश्वविश्वप्रथितगुणगणः प्रावृडंभोदवद् यः ।
प्रीणाति स्माखिलक्ष्मां प्रवचनजलधेरुद्धृतैरर्थनीरै-
रातत्य स्थानकानि श्रुतविषयसुधासारसघ्रंचि विश्वक् ॥ १२ ॥

सर्वग्रन्थरहस्यरत्नमुकुरः कल्याणवल्लीतरुः
कारुण्यामृतसागरः प्रवचनव्योमांगणाहस्करः ।
चारित्रादिकरत्नरोहणगिरिः क्ष्मां पावयन् धर्मराट्
सेनानी**र्गुणसेन**सूरिरभवच्छिष्यस्तदीयस्ततः ॥ १३ ॥

शिष्यस्तस्य च तीर्थमेकमवनेः पावित्र्यकृज्जंगमं
स्याद्वादत्रिदशापगाहिमगिरिर्विश्वप्रबोधार्यमा ।
कृत्वा **स्थानकवृत्ति-शान्तिचरिते** प्राप्तः प्रसिद्धिं परां
सूरिर्भूरितपःप्रभाववसतिः श्री**देवचन्द्रो**ऽभवत् ॥ १४ ॥

आचार्यो **हेमचन्द्रो**ऽभूत् तत्पादाम्भोजषट्पदः ।
तत्प्रसादादधिगतज्ञानसम्पन्महोदयः ॥ १५ ॥

जिष्णुश्चेदिदशार्णमालवमहाराष्ट्रापरान्तं कुरून्
सिन्धूनन्यतरांश्च दुर्गविषयान् दोर्वीर्यशक्त्या हरिः ।

चौलुक्यः परमार्हतो विनयवान् श्रीमूलराजान्वयी
तं नत्वेति कुमारपालपृथिवीपालोऽब्रवीदेकदा ॥ १६ ॥

पापर्द्धिद्यूतमद्यप्रभृति किमपि यन्नारकायुर्निमित्तं
तत् सर्वं निर्निमित्तोपकृतिकृतधियां प्राप्य युष्माकमाज्ञाम् ।

स्वामिन्नुर्व्यां निषिद्धं धनमसुतमृतस्याथ मुक्तं तथाऽर्ह-
च्चैत्यैरुत्तंसिता भूरभवमिति समः सम्प्रतेः सम्प्रतीह ॥ १७ ॥

अस्मत्पूर्वजसिद्धराजनृपतेर्भक्तिस्पृशोर्याच्ञया
सांगं व्याकरणं सवृत्ति सुगमं चक्रुर्भवन्तः पुरा ।

मद्धेतोरथ योगशास्त्रममलं लोकाय च द्व्याश्रय-
च्छन्दो-ऽलंकृति-नामसंग्रहमुखान्यन्यानि शास्त्राण्यपि ॥ १८ ॥

लोकोपकारकरणे स्वयमेव यूयं सज्जाः स्थ यद्यपि तथाप्यहमर्थयेऽदः ।
मादृग्जनस्य परिबोधकृते शलाकापुंसां प्रकाशयत वृत्तमपि त्रिषष्टेः ॥ १९ ॥

तस्योपरोधादिति हेमचन्द्राचार्यः शलाकापुरुषेतिवृत्तम् ।
धर्मोपदेशैकफलप्रधानं न्यवीविशच्चारुगिरां प्रपंचे ॥ २० ॥

जम्बूद्वीपारविन्दे कनकगिरिरसावश्नुते कर्णिकात्वं
यावद् यावच्च धत्ते जलनिधिरवनेरन्तरीयत्वमुच्चैः ।

यावद् व्योमाध्वपान्थौ तरणिशशधरौ भ्राम्यतस्तावदेतत्
काव्यं नाम्ना शलाकापुरुषचरितमित्यस्तु जैत्रं धरित्र्याम् ॥२१॥ छ॥

॥ मंगलमस्तु ॥ शुभं भवतु लेखकपाठकयोः ॥छ॥ संवत् १३२४ वर्षे मार्गवदि १३ रवावद्येह श्रीमदुज्जयन्यां श्रीमहावीरचरितपुस्तकं सा० देवसिंहेन मातुः श्रेयोर्थं लिखापितम् ॥ छ ॥

॥ ॐ ॥ मदनघनसमीरः शर्मणे सोऽस्तु वीरः
तदनु विदितधामा गौतमस्वामिनामा ।

अपहरतु परेषामापदं वैरिशाखा
सफलितजनिताशा विश्वविश्वप्रकाशा ॥ १ ॥

तस्यां शम्बरभास्वरः कुलगृहं लक्ष्म्या समालिंगित-
श्चंचच्चन्द्रसमोदयेन मुदित...........मुक्तालयः ।

नित्यं श्रीपतिकेलिमंदिरमसौ मुक्तो न मर्यादया
संपद्वृत्तघनोन्नतिर्विजयते **पंडेरगच्छांबुधिः** ॥ २ ॥

पूर्वं चाऽचलगच्छमंडनमणिः **पंडेरगच्छद्रुमो-**
त्पत्तेर्द्धामिनि कामकश्मलभुवा शाली नवांभोधरः ।
जज्ञे **शान्तिमुनीश्वरः** किल शराश्वाक्ष्यब्दवृंदे गते
यद्व्याख्यागलगर्जितैरजनि भूविश्वंभरा वैभवात् ॥ ३ ॥

आचार्यदीदस्तु(?)तदीयगच्छे........भूमंडलमंडनद्रु ।
लीलावतीलोचनवाणकामवीरं विनिर्जित्य बभूव शब्दः ॥ ४ ॥

समजनि मुनिरत्नं तस्य शिष्यावतंसः
सुरपतिललनाभिः सस्पृहं गीतकीर्त्तिः ।
सुकृतिभिरभिवंद्यः **श्रीयशोभद्रसूरि-**
र्नवजलधरधाराधोरणिधौतविश्वः ॥ ५ ॥

येषामाबालकालाद्विकृतिपरिहृतिर्मान्यता **मूलराजात्**
संघे मेघांबुवृष्टिः सकललिपिवचोवाचनेऽस्त्रानिषेधः ।
पंडेरे पल्लिकाज्यानयनमथनभो........वादिकानि
श्रुत्वा नानाद्भुतानि त्रिजगति कति नो ॥ ६ ॥

क्षेमर्षिरत्राजनि चान्तराले मराललीलायितमादधानः ।
वशीकृतानेकपराजहंसशुभ्रैर्यशोभिर्धवलीकृतात्मा ॥ ७ ॥

येनोत्तुंगविशालकम्बलगिरौ........... ॥ ८ ॥

........सूरिर्जज्ञे **सुमति**रिह स ब्राह्मणवरः ॥ ९ ॥

दशवैकालिकटीका कृता च मुक्तालता [येन] ॥ १० ॥

श्री**शान्तिसूरि**र्गुणरत्नसूरिः ।........ ॥ १२ ॥

सूरिः श्रीशान्तिनामा गणपतिरखिलप्राणि........
स्वेच्छापूर्वं मुमुक्षोः शिवपथि यततः साधुसार्थाधिपत्यम् ॥ १६ ॥

तस्मादत्र जितेन्द्रियः शमनिधिर्विद्यावधूदर्पणः
श्रीमा**नीश्वरसूरि**रित्यभिधया वाचंयमग्रामणीः ।

यो बालोऽपि धुरं बभार महतीं धौरेयवल्लीलया
धीरः पंचमहाव्रतं प्रणयिनीं वैराग्यवीतस्पृहः ॥ १७ ॥

नवोऽस्ति सुकृती पट्टे सूरिमंडलमंडनः ।
शालिसूरिरयं नामा गुणरत्नैकरोहणः ॥ १८ ॥

इह धर्कटवंशेऽभूद्वरदेवोऽभिधानतः ।
निश्चितं वरदेवोऽयं पुरुषः कुलभूषणम् ॥ १९ ॥

भार्या पूर्णमतिस्तस्य पूर्णापूर्णमतिर्मता ।
तत्कुक्षिसंभवाः पंच तनुजाः पांडवा इव ॥ २० ॥

आद्यो लक्ष्मीधराख्योऽभूद्द्वितीयो नागुलाभिधः ।
तृतीयः पासडः ख्यातश्चतुर्थः कालियाभिधः ॥ ३ ॥

पंचमो जगदेवाख्यः सुकृती कृतिवत्सलः ।
भार्या लक्ष्मीधरस्याभूत् कमलश्रीरिति नाम्ना ॥ ४ ॥

तत्कुक्षिमानसे राजहंसो राजाक इत्यभूत् ।
राजाकस्य मता भार्याऽभयश्रीरिति संज्ञया ॥ ५ ॥

तस्याः सुतद्वयं जज्ञे प्रथमोऽभयपालकः ।
द्वितीयो हरिचंद्राख्यश्चन्द्रवच्चारुकान्तिभाक् ॥ ६ ॥

पासडस्य हि भार्या तु जयश्रीरिति नामतः ।
तया सुतद्वयं जातं पुत्रिकाद्वितयं तथा ॥ ७ ॥

यथार्थेन स्वनामाऽभूत् कुलधरो धुरि कृती ।
द्वितीयो देवसिंहाह्वो देवधीर्गुरुभक्तिभाक् ॥ ८ ॥

पुत्रिका मोहिणिः ख्याता सदा धर्मपरायणा ।
द्वितीया सोहिणिर्जाता गुरुस्वजनवत्सला ॥ ९ ॥

कुलधरस्यापि भार्याऽऽसीत् देवश्रीरिति नामतः ।
रूपलावण्यसंयुक्तो नरसिंहः सुतोऽभवत् ॥ १० ॥

नरसिंहस्य भार्याऽस्ति नाम्ना लाडीति विश्रुता ।
कलत्रं देवसिंहस्य देवमतिरिति श्रुता ॥ ११ ॥

तस्याः सुतद्वयं जातं पुत्रिका त्रितयं तथा ।
आद्यो **नयणसिंहाख्यो** परः **पृथिमसिंहकः** ॥ १२ ॥
पुत्रिका **मयणूनाम्नी** द्वितीया **भीमिणिस्तथा** ।
तृतीया **आल्हका** जाता स्वाजन्यगुणवत्सला ॥ १३ ॥
कलत्रं **कालियाकस्य धनश्रीरिव** देहिनी ।
तस्याः कुक्षिसमुद्भूतौ पुत्रौ **धीणा-धरणिगौ** ॥ १४ ॥
मेड्णीति तथा पुत्री **हांसिका-सांसुके** परे ।
जगदेवस्य जायाऽस्ति **जगच्छ्रीरिति** संज्ञया ॥ १५ ॥
तस्याः कुक्षेस्तु संजातास्तनुजास्त्रय इहोत्तमाः ।
आद्यः **क्षेमसिंहस्तु** नांगुरश्च **व्रयजलः** ॥ १६ ॥
पुत्रिकात्रितयं जज्ञे **छाडी केल्हू** च **लीलुका** ।
भार्याऽस्ति **क्षेमसिंहस्य रूपिणीति** सुविश्रुता ॥ १७ ॥
जातं तत्पुत्रचतुर्थलक्षणो **हरदेवकः** ।
तृतीयो **हरपतिर्नाम** चतुर्थो **वेलुकाभिधः** ॥ १८ ॥
[.... ।]
पूडाभार्या च चाहुतु तत्पुत्रः **पद्मनामकः** ॥ १९ ॥
इत्थं कुटुम्बेन समं विचिन्त्य संसारसर्वस्वमनित्यमेव ।
स्वकीयमातुः परिपुण्यहेतुं श्रीवीरवृत्तं परिलेखयित्वा ॥
पुस्तकं चार्पयामास **देवसिंहो** महामतिः ।
नंदताद्यावच्चन्द्रार्कं संघेन सह सर्वथा ॥ शुभं भवतु ॥ छ ॥

*

No. 190 : Pariśiṣṭaparvan–Sthavirāvalīcarita–mahākāvya
परिशिष्टपर्व–स्थविरावलीचरित–महाकाव्यम्

Folios – 225
Language – Sanskrit
Author – Ācārya Hemacandra
Extent – Granthas 3500
Size – 23 × 2·2 inches
Condition – Good
General Remarks – Folios 215 to 225 written on paper, dilapidated in condition.

आदिः—

श्रीमते वीरनाथाय सनाथायाद्भुतश्रिया ।
महानन्दसरोराजमरालायार्हते नमः ॥ १ ॥
सर्वेषां वेदसामाद्यमादिमं परमेष्ठिनम् ।
देवाधिदेवं सर्वज्ञं श्रीवीरं प्रणिदध्महे ॥ २ ॥
कल्याणपादपारामं श्रुतगंगाहिमाचलम् ।
विश्वाम्भोजरविं देवं वंदे श्रीज्ञातनन्दनम् ॥ ४ ॥
पान्तु वः श्रीमहावीरस्वामिनो देशनागिरः ।
भव्यानामान्तरमलप्रक्षालनजलोपमाः ॥ ५ ॥
त्रिषष्टिशलाकापुंसां दशपर्वा विनिर्मिता ।
इदानीं तु परिशिष्टपर्वास्माभिः प्रतन्यते ॥ ६ ॥
अत्र च जम्बूस्वाम्यादिस्थविराणां कथोच्यते ।
विश्वस्य कण्ठालंकारकृते हारावली शुभा ॥ ७ ॥

अन्तः—

इत्याचार्यश्रीहेमचन्द्रविरचिते परिशिष्टपर्वणि स्थविरावलीचरिते महाकाव्ये आर्यरक्षितव्रतग्रहणपूर्वाधिगमवज्रस्वामिस्वर्गगमनतद्वंशविस्तारवर्णनो नाम द्वादशमः सर्गः समाप्तः ॥ समाप्तं परिशिष्टपर्व ॥ ग्रंथसंख्या ३५००

*

No. 191 : Triṣaṣṭiśalākāpuruṣacaritamahākāvya–Parvan I : Ṛṣabhadevacaritra

त्रिषष्टिशलाकापुरुषचरितमहाकाव्यम्–पर्व १ : ऋषभदेवचरित्रम्

Folios – 513 स्तो ल्ह ३ | Size – 15 × 2·2 inches

Language – Sanskrit | Condition – Good

Author – Hemacandrācārya | Age of MS. – First half of 13th cent. V. S.

General Remarks – Folio 100 नु, 200 स्त, 300 स्ता, 400 स्तो, 500 स्तो. A lecture was delivered at a village called *Ghūsaḍī* in V.S. 1240 on the basis of this ms. This ms., therefore, is written before this date.

अन्तः—

इत्याचार्यश्रीहेमचंद्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये प्रथमे पर्वणि मरींचिरुपभाविशलाकापुरुषभगवन्निर्वाणभरतनिर्वाणवर्णनो नाम सर्गः ॥

समाप्तं च श्रीऋषभस्वामिभरतचक्रवर्त्तिप्रतिबद्धं प्रथमं पर्व ॥ छ ॥ * ॥

॥ ॐ ॥

सुधर्मस्य ततो ज्ञान ज्ञानात्तस्य परिग्रहः ॥ १ ॥

तस्माद्भवंति श्रेयांसि स्थैर्यस्य........... ।
.....................तस्माद्धर्मपरिणतिः ॥ २ ॥

तस्माद्धर्मोपदेशश्चोपदेशाद्धर्मविस्तृतिः ।
ततोऽनेकभवं तीर्त्वा लभंते च परं पदम् ॥ ३ ॥

इत्यनेकगुणं ज्ञानं........................ ।
सर्वेषामेव धर्माणां ज्ञानदानफलं महत् ॥ ४ ॥ चतुर्भिः कलापकम् ॥

तथा ह्युक्तं च-

ज्ञानदानेन जानाति जंतुः स्वस्य हिताहितम् ।
वेत्ति...................च समश्नुते ॥ ५ ॥

ज्ञानदाता त्ववाप्नोति केवलज्ञानमुज्ज्वलम् ।
अनुगृह्याखिलं लोकं लोकाग्रमधिगच्छति ॥ ६ ॥

ऋते ज्ञानात्कथं जंतु................ ।
अज्ञानी जनुषांधवत् कथं वर्त्तेत सत्पथि ॥ ७ ॥

........माहात्म्यं ज्ञानदानस्य सद्गुरोरिति ।
श्रीसर्वाणंदसूरीणामुपासकेन सव........ ॥ ८ ॥

....................च घूसडीग्रामवासिना ।
लिखितं श्राद्धधर्मेण चरित्रमृषभप्रभोः ॥ ९ ॥

यावद्भूर्भूधरो मेरुर्यावच्चंद्रदिवाकरौ ।
यावाज्जिनेंद्र...............त् सुपुस्तकः ॥ १० ॥ छ ॥

मंगलं महाश्रीः ॥ छ ॥ वत्सरे श्रीविक्रमार्कद्वादशवेदांबराधिके (१२४०) । व्याख्यातं घूसडीग्रामे...........

*

No. 192 : Triṣaṣṭiśalākāpuruṣacaritamahākāvyam–Parvans II–III.

त्रिषष्टिशलाकापुरुषचरितमहाकाव्यम्—पर्व २–३

Folios – 224
Language – Sanskrit
Author – Hemacandrācārya

Size – 17 × 2·5 inches
Condition – Good
Age of MS. – V. S. 1295.

अन्तः––

इत्याचार्यश्रीहेमचंद्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये तृतीये पर्वणि श्रीशीतलस्वामिचरितवर्णनो नामाष्टमः सर्गः ॥ छ ॥ समाप्तं च तृतीयं पर्व । छ ॥ * ॥

श्रीसंभवप्रभृतितीर्थकृतां तृतीयेऽष्टानां चरित्रमिह पर्ववरेऽष्टसर्गे ।
ध्येयं पदस्थमिव वारिरुहेऽष्टपत्रेऽनुध्यायतो भवति सिद्धिरवश्यमेव ॥ छ ॥

मंगलं महाश्रीः ॥ छ ॥ संवत् १२९५ वर्षे अश्विन वदि २ रवौऽद्येह श्रीवीजापुरपत्तने समस्तराजावलीपूर्वकं तपाकीयश्रीपोपधशालायां चारित्रगुणनिधानसमस्तसिद्धांतकालान्मानेन पारगत तपा० देवभद्रगणिमलयकीर्त्ति पं० कुलचंद्र पं० देवकुमारमुनि नेमिकुमारमुनिप्रभृतिसमस्तसाधून् तच्चरणकमलान् भक्तपरमश्रावकसाधु० रतनपाल समस्तसिद्धांतपुस्तकानां पौषधशालाभारनिर्वाहक परमश्रावकश्रेष्ठि वील्हणद्वितीयभारनिर्वाहकसाधर्मिकानां वात्सल्यतत्परपरमश्रावक ठ० आसपालतृतीयभारनिर्वाहकनिरंतरं पुस्तकसिद्धांतनिर्विकल्पभक्त्या सारतत्परपरमश्रावकसाधु० लाहडप्रभृतीन् समस्तश्रावकैः त्रिषष्टिपुस्तकं समस्तसाधून् श्रावकाणां पठनवाचनपुण्यश्रेयोऽर्थं लिखापितम् ॥ छ ॥ लेखकपाठकानां शुभं भवतु ॥ छ ॥ मंगलं महाश्रीः ॥ * ॥ शिवमस्तु ॥ छ ॥ आचंद्रार्कमयं पुस्तकं नंदतु ॥ छ ॥ मंगलं महाश्रीः ॥ छ ॥ * ॥

*

No. 193 : Triṣaṣṭiśalākāpuruṣacaritamahākāvya : Parvan IV

त्रिषष्टिशलाकापुरुषचरितमहाकाव्यम्––पर्व ४

Folios – 293
Language – Sanskrit
Author – Hemacandrācārya

Size – 14·5 × 1·7 inches
Condition – Good
Age of MS. – c. Latter half of 13th cent. V. S.

*

No. 194 : Triṣaṣṭiśalākāpuruṣacaritamahākāvya-Parvan III

[From Sambhavajina to Śītalanātha]

त्रिषष्टिशलाकापुरुषचरितमहाकाव्य––पर्व ३ : सम्भवजिन––शीतलनाथ.

Folios – 127
Language – Sanskrit

Extent – Granthas 4660
Size – 15·7 × 2.2 inches

Author – Hemacandrācārya
Age of MS. – c. First half of 14th cent. V. S.
Condition – Good
General Remarks – Folios 6 7, 8, 15 and 16 missing

आदिः—

ॐ · अर्हं

त्रैलोक्यप्रभवे पुण्यसंभवाय भवच्छिदे ।
श्रीसंभवजिनेंद्राय मनोभवभिदे नमः ॥ १ ॥
धात्रीपवित्रीकरणं लवित्रं कर्मवीरुधाम् ।
चरित्रमथ वक्ष्यामि श्रीसंभवजिनेशितुः ॥ २ ॥

अन्तः—

इत्याचार्यश्रीहेमचंद्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये, तृतीये पर्वणि श्रीशीतलस्वामिचरितवर्णनो नामाष्टमः सर्गः ॥ छ ॥ समाप्तं च तृतीयं पर्व ॥

श्रीसंभवप्रभृतितीर्थकृतां तृतीयेऽष्टानां चरित्रमिह पर्ववरेऽष्टसर्गे ।
ध्येयं पदस्थमिव वारिरुहेऽष्टपत्रेऽनुध्यायतो भवति सिद्धिरवश्यमेव ॥ छ ॥

*

No. 195 : Triṣaṣṭiśalākāpuruṣacaritamahākāvya–Parvan VII : Munisuvrata-swāmicaritra & Rāmāyaṇa

त्रिषष्टिशलाकापुरुषचरितमहाकाव्य—पर्व ७ : मुनिसुव्रतस्वामिचरित्र तथा रामायण

Folios – 280
Language – Sanskrit
Author – Hemacandrācārya
Age of MS. – V. S. 1318
Extent – Granthas 2888
Size – 17 × 2 inches
Condition – Good

आदिः—

॥ अर्हं ॥ ॐ नमः सर्वज्ञाय ॥

अथ श्रीसुव्रतस्वामिजिनेंद्रस्यांजनद्युतेः ।
हरिवंशमृगांकस्य तीर्थे संजातजन्मनः ॥ १ ॥
बलदेवस्य पद्मस्य विष्णोर्नारायणस्य च ।
प्रतिविष्णो रावणस्य चरितं परिकीर्त्यते ॥ २ ॥

अन्तः—

इत्याचार्यश्रीहेमचंद्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये [सप्तमपर्वणि....

.......जयचक्रवर्त्तिचरितवर्णनो नाम त्रयोदशः सर्गः ॥छ॥ समाप्तं चेदं सप्तमं पर्व ॥छ॥
रामलक्ष्मणदशाननर्नेमिस्तीर्थकृच्च हरिषेणचक्रभृत् ।

चक्रभृच्च जय इत्यमुत्र षड् वर्णिताः श्रुतिसुखाय संतु वः ॥ छ ॥ ग्रंथाग्रंथ ३८८८ ॥ छ ॥ सं० १३१८ वर्षे ज्येष्ठशुदि २ रवावद्येह दंडाहीपथ............................ पतिमहाराजाधिराजश्रीअर्जुनदेवकल्याणविजयराज्ये तन्नियुक्तमहं० श्रीसोमप्रतिपत्तौ ठकु० वीकम्त्रसी...........................लिखितेयमिति ॥ छ ॥

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ छ ॥
लेखकपाठकयोः ॥ छ ॥

शिवमस्तु सर्वजगतः ॥ छ ॥ मंगलं महाश्रीः ॥ छ ॥ शुभं भवतु ॥ छ ॥

*

No. 196 : Triṣaṣṭiśalākāpuruṣacaritamahākāvya-Parvan X : Mahāvīracaritra
त्रिषष्टिशलाकापुरुषचरितमहाकाव्य—पर्व १० : महावीरचरित्र

Folios – 243
Language – Sanskrit
Author – Hemacandrācārya
General Remarks – Incomplete. Almost all the folios have stuck together.
Size – 16.7 × 1.7 inches
Condition – Injured
Age of MS. – c. Latter half of 13th cent. V.S.

*

No. 197 : Triṣaṣṭiśalākāpuruṣacaritamahākāvya-Parvan X : Mahāvīracaritra
त्रिषष्टिशलाकापुरुषचरितमहाकाव्य—पर्व १० : महावीरचरित्र

Folios – 327
Language – Sanskrit
Age of MS. – c. First half of 14th cent. V.S.
Size – 16.2 × 2.2 inches
Author – Hemacandrācārya
Condition – Good
General Remarks – Folios 23, 24, 26–30, 63, 66, 67, 75, 77, 79–81, 95, 102–104, 108, 111, 112, 125, 126, 142, 145, 148, 149, 153–160, 163, 164, 166, 167, 170, 189, 195, 196, 199, 200, 201, 203, 205, 207, 210, 211, 214, 221, 224, 226, 227, 229, 230, 236, 240, 243, 245, 252–256, 265, 269, 282, 285–287, 290–292, 295, 296, 302, 306, 307, 311–314, 316, 317, 322, 323, 325, 326 are missing.

अन्तः—

वणिजां भरतख्यातो धर्कटानां धरातले ।
वंशोऽस्ति चारुपत्रश्च सुपर्वैः समलंकृतः ॥ १ ॥

सार्द्धद्वादशसंख्येयाः ज्ञातयो **नगरा**भिधाः ।
बभूवुस्तस्माद्वंशा वटशाखेव विश्रुताः ॥ २ ॥

डिंड्वानकात्समुद्भूता वणिजत्वेऽपि **डिंडुहाः** ।
विख्याताः संति सर्वत्र गच्छोऽस्ति तत्पुराभिधः ॥ ३ ॥

आसीत्तस्मिन् वणिग्वंशे **नेमाकः** पुरुषाग्रणीः ।
देवश्रीवल्लभा तस्य पुत्रैकं द्वेच पुत्रिके ॥ ४ ॥

तदंगभूरभूच्चारुः श्रेष्ठी **पारस**नामकः ।
पद्मिनी दयिता तस्य सती साध्वी शुभाशया ॥ ५ ॥

शाकंभरीमंडलगगनभानुः श्री**धर्मघोषः** समजनि प्रबुद्धः ।
मिथ्यात्वविरतं सद्धर्मनिरतं परमार्हतं **पारसकं** चकार ॥ ६ ॥

सम्यक्त्वरत्नविभूषितांगे सर्वज्ञपूजनदानचंगे ।
नेमाकविग्रहजे प्रसिद्धे जाते सदा **पूर्निणि** सड्ढिकाख्ये ॥ ७ ॥

जज्ञाते नंदनौ द्वौ च ताभ्यां सद्धर्मतत्परौ ।
बोघाकः प्रथमो नाम **वाग्भटश्च** तथाऽपरः ॥

बोघाकस्य भवेद्भार्या **मल्हणदेवी**ति विश्रुता ।
प्रत्यक्षा कथ्यते आई जिनधर्मैकनिश्चला ॥ ८ ॥

जाता **वाग्भट**स्येव **मदनश्रीः** प्रथमा प्रिया ।
द्वितीयदयिता जज्ञे **देवी देसल**पूर्वकाः ॥ ८ ॥

लाडी साल्ही सुते स्यातां **पारस**स्य महात्मनः ।
बाल्स्याद्विधवा भूयात् **लाडी** सधर्मवत्सला ॥ ९ ॥

रत्नत्रयवत् संजातं वयं तस्याः सुतत्रयम् ।
काकटो नृपतिस्तेजा यथासंख्यममी सुताः ॥ १० ॥

देसलाया सुता जाताश्चतस्रो गुलमालयः ।
प्राच्यपाची प्रतीची च उदीची च यथाक्रमम् ॥ ११ ॥

लक्ष्मीवल्लक्ष्मीः प्रथमा **राजी** राजीवलोचना ।
तृतीया नयना चैव तुर्या **कर्पूरिका** स्मृता ॥ १२ ॥

काकटः प्रथमस्तेषां यः सदा पापसंकठः ।
विकटो धर्मसंग्राहे कंकटं सत्यभाषणे ॥ १३ ॥

परोपकारे निरतो निरंतरं दयापरो यः शुचिमानसः सदा ।
नृणां पतिः केन गुणेन वर्ण्यते दाने वृषे यस्य निरालसा मतिः ॥ १४ ॥

अकलितगुणगेहं यः सदा धर्मदेहं नरपतिरभिधानं सत्यशीलप्रधानः ।
जिनमुनिपदभक्तः सिष्टसंगे प्रयुक्तः अबुधजनवियुक्तः सम्यकत्वैकाचित्तः ॥१५॥

देवपूजार्चने नित्यं यस्य गच्छंति वासराः ।
श्रद्धावान् दर्शनासक्तः तेजाको भव्यश्रावकः ॥ १६ ॥

....

*

No. 198 : Triṣaṣṭiśalākāpuruṣacaritamahākāvya-Parvan X : Mahāvīracarita

त्रिषष्टिशलाकापुरुषचरितमहाकाव्य—पर्व १० : महावीरचरित

Folios – 4-295
Language – Sanskrit
Author – Hemacandrācārya

Size – 18 × 2.5 inches
Condition – Good
Age of MS. – c. First half of 14th cent. V. S.

General Remarks – Somewhat incomplete.

*

No. 199 : Śatapadī Vṛtti [शतपदीवृत्ति]

Folios – 200
Language – Sanskrit
Author – Dharmaghoṣasūri-Mahendrasūri
Age of MS. – c. Beginning of 14th cent. V.S.

Extent – Granthas 5200
Size – 15.7 × 2.5 inches
Condition – Good

General Remarks – Folio 1 contains an illustration of Bhagavān ; folio 2, of 14 dreams ; folio 199, of the four-fold Saṅgha comprising of male and female lay-followers of Jainism etc., listening to the exposition of the preceptor seated along with his disciples. Folio 200 has an illustration of the Samavasaraṇa. The background of all these four excellent pictures is red and white, yellow, green and black colours have been utilised therein.

आदिः—

ॐ ॥ नमः श्रीमद्देवगुरुपदपंकजेभ्यः ।

त्रिभुवनगृहप्रदीपः कल्याणनिधिर्भवोदधौ द्विपः ।
संशीतितिमिरभानुर्जयति श्रीमान् जिनो वीरः ॥ १ ॥

सार्द्धद्वादशसंख्येयाः ज्ञातयो **नगरा**भिधाः ।
बभूवुस्तस्माद्वंशा वटशाखेव विश्रुताः ॥ २ ॥

डिंड्वानकात्समुद्भूता वणिजत्वेऽपि **डिंडुहाः** ।
विख्याताः संति सर्वत्र गच्छोऽस्ति तत्पुराभिधः ॥ ३ ॥

आसीत्तस्मिन् वणिग्वंशे **नेमाकः** पुरुषाग्रणीः ।
देवश्रीवल्लभा तस्य पुत्रैकं द्वेच पुत्रिके ॥ ४ ॥

तदंगभूरभूच्चारुः श्रेष्ठी **पारस**नामकः ।
पद्मिनी दयिता तस्य सती साध्वी शुभाशया ॥ ५ ॥

शाकंभरीमंडलगगनभानुः श्री**धर्मघोषः** समजनि प्रबुद्धः ।
मिथ्यात्वविरतं सद्धर्मनिरतं परमार्हतं **पारसकं** चकार ॥ ६ ॥

सम्यक्त्वरत्नविभूषितांगे सर्वज्ञपूजनदानचंगे ।
नेमाकविग्रहजे प्रसिद्धे जाते सदा **पूनिणि** सड्ढिकाख्ये ॥ ७ ॥

जज्ञाते नंदनौ द्वौ च ताभ्यां सद्धर्मतत्परौ ।
बोधाकः प्रथमो नाम **वाग्भटश्च** तथाऽपरः ॥

बोधाकस्य भवेद्भार्या **मल्हणदेवी**ति विश्रुता ।
प्रत्यक्षा कथ्यते आई जिनधर्मैकनिश्चला ॥ ८ ॥

जाता **वाग्भट**स्येव **मदनश्रीः** प्रथमा प्रिया ।
द्वितीयदयिता जज्ञे **देवी देसल**पूर्वकाः ॥ ८ ॥

लाडी साल्ही सुते स्यातां **पारस**स्य महात्मनः ।
बालस्याद्विधवा भूयात् **लाडी** सधर्मवत्सला ॥ ९ ॥

रत्नत्रयवत् संजातं वयं तस्याः सुतत्रयम् ।
काकटो नृपतिस्तेजा यथासंख्यममी सुताः ॥ १० ॥

देसलाया सुता जाताश्चतस्रो गुलमाल्यः ।
प्राच्यपाची प्रतीची च उदीची च यथाक्रमम् ॥ ११ ॥

लक्ष्मीवल्लक्ष्मीः प्रथमा **राजी** राजीवलोचना ।
तृतीया नयना चैव तुर्या **कर्पूरिका** स्मृता ॥ १२ ॥

काकटः प्रथमस्तेषां यः सदा पापसंकठः ।
विकटो धर्मसंग्राहे कंकटं सत्यभाषणे ॥ १३ ॥

परोपकारे निरतो निरंतरं दयापरो यः शुचिमानसः सदा ।
नृणां पतिः केन गुणेन वर्ण्यते दाने वृषे यस्य निरालसा मतिः ॥ १४ ॥

अकलितगुणगेहं यः सदा धर्मदेहं नरपतिरभिधानं सत्यशीलप्रधानः ।
जिनमुनिपदभक्तः सिष्टसंगे प्रयुक्तः अबुधजनवियुक्तः सम्यकत्वैकाचित्तः ॥१५॥

देवपूजार्चने नित्यं यस्य गच्छंति वासराः ।
श्रद्धावान् दर्शनासक्तः तेजाको भव्यश्रावकः ॥ १६ ॥

....

*

No. 198 : Triṣaṣṭiśalākāpuruṣacaritamahākāvya–Parvan X : Mahāvīracarita

त्रिषष्टिशलाकापुरुषचरितमहाकाव्य—पर्व १० : महावीरचरित

Folios – 4–295
Language – Sanskrit
Author – Hemacandrācārya
Size – 18 × 2.5 inches
Condition – Good
Age of MS. – c. First half of 14th cent. V. S.

General Remarks – Somewhat incomplete.

*

No. 199 : Śatapadī Vṛtti [शतपदीवृत्ति]

Folios – 200
Language – Sanskrit
Author – Dharmaghoṣasūri–Mahendrasūri
Extent – Granthas 5200
Size – 15.7 × 2.5 inches
Condition – Good
Age of MS. – c. Beginning of 14th cent. V.S.
General Remarks – Folio 1 contains an illustration of Bhagavān ; folio 2, of 14 dreams ; folio 199, of the four-fold Saṅgha comprising of male and female lay-followers of Jainism etc., listening to the exposition of the preceptor seated along with his disciples. Folio 200 has an illustration of the Samavasaraṇa. The background of all these four excellent pictures is red and white, yellow, green and black colours have been utilised therein.

आदिः—

ॐ ॥ नमः श्रीमद्देवगुरुपदपंकजेभ्यः ।

त्रिभुवनगृहप्रदीपः कल्याणनिधिर्भवोदधौ द्विपः ।
संशीतितिमिरभानुर्जयति श्रीमान् जिनो वीरः ॥ १ ॥

पूर्वपक्षशतं कश्चित् सूरिश्चक्रे सदर्पधीः ।
विदधे श्रीधर्मघोषसूरिरुत्तरविस्तरम् ॥ २ ॥
सिद्धांतवचनैः प्रायः क्वचित्ताद्दक्षयुक्तिभिः ।
अपि प्रकरणैः क्वापि सिद्धांतार्थानुयायिभिः ॥ ३ ॥

ते च पूर्वपक्षा अमी ।

अन्तः—

इति शाश्वताष्टाह्निकाविचारः ॥ छ ॥ ११७ ॥ शिवमस्तु अध्यापयितृअध्येतृव्याख्यातृश्रोतृभ्यः । समाप्ता चेयं **शतपदिकाभिधाना** विषमविषमतरकतिपयविचाराणां प्रश्नोत्तरपद्धतिरिति ॥ छ ॥ इयं च विक्रमाद्गुणरसमाससंख्ये वर्षे १२६३ श्रीमदार्यरक्षितसूरिशिष्याणां श्रीमज्जयसिंहसूरीणां पट्टालंकृतिकर्तृभिः श्रीधर्मघोषसूरिभिर्विदब्धा । ततश्च तामतिगंभीरार्थत्वात् व्युत्पन्नमतीनामेव सुखावबोधां तदितरेषां तु किंचिदायासगम्यामवगम्य ततस्तेषामेव श्रीधर्मघोषसूरिणां श्रुतांतेवासिभिरपि तत्पट्टप्रतिष्ठितैः श्रीमहेन्द्रसिंहसूरिभिर्विक्रमादुदधिग्रहसूर्यसंख्ये संवत्सरे ॥ छ ॥ १२९४ सैव ग्रंथपद्धतिः क्वचिदाधानं क्वचिदुद्धरणं क्वचित् क्रमविरचनां च विधाय कानिचिदधिकान्यपि प्रश्नोत्तराणि प्रक्षिप्य सुकुमारमतीनामपि सुखावबोधा भवत्विति किंचिद्विस्तरवती विदधे ॥ छ ॥ भद्रमस्तु ॥ चतुर्विधस्य संघस्य ।

यावन्नंदति तीर्थं भरतक्षेत्रे जिनस्य वीरस्य ।
तावन्नंदत्वेषाऽपि वाच्यमाना सदा विबुधैः ॥ छ ॥

पंचश्लोकसहस्राणि तथोपरि शतद्वयम् । अस्मिन् शतपदिकाग्रंथे प्रमाणमिदमीरितम् ॥छ॥ अंकतोऽपि ग्रंथाग्रं ५२०० ॥ इति **शतपदिकाभिधाना प्रश्नोत्तरग्रंथपद्धतिः समाप्तेति** ॥ शुभं भवतु ॥ छ ॥

*

No. 200 : (1) Padmānandamahākāvya–Jinendracaritamahākāvya Part I : Ādināthacaritra

(१) पद्मानन्दमहाकाव्य-जिनेन्द्रचरितमहाकाव्य–प्रथम खंड : आदिनाथचरित्र

Folios – 319
Language – Sanskrit
Author –Amaracandrasūri Vāyaḍacacchīya

Size – 32.5 × 2.2 inches
Condition – Good
Age of MS. – c. Latter half of 14th cent. V.S.

General Remarks – Folio 1 contains an illustration of Śrī Ṛṣabhadevaswāmin, 3.1 × 2 inches in size. On folio 2 is an illustration, 2.9 × 2 inches in size, depicting Minister Padma requesting the Preceptor, Pt. Amaracandra, to compose the Padmānanda-kāvya. A monk is seen behind the Preceptor.

आदिः—

॥ स्वस्ति श्रीजयोऽभ्युदयश्च ।

अर्हं नौमि सदार्हंत्यकारणं सकलार्हतः ।
स्वस्तिंश्रीजयदं श्रीमन्महानंदमहोदयम् ॥ १ ॥

मुदाऽर्हामि तदार्हन्त्यं भूर्भुवःस्वस्त्रयेश्वरम् ।
यदाराध्य ध्रुवं जीवः स्यादर्हन् परमेश्वरः ॥ २ ॥

अर्हतः स्थापनानामद्रव्यभावैश्चतुर्विधाः ।
चतुर्गति भवोद्भूतं भयं भिंदंतु भाविनाम् ॥ ३ ॥

जयत्यादिमतीर्थेशस्त्रिलोकीमंगलद्रुमः ।
श्रेयःफलं सदा लोका यदालोकादुपासते ॥ ४ ॥....

हित्वा संसारहेतूनि यो रत्नानि चतुर्दश ।
स्वीचक्रे मुक्तिदां रत्नत्रयीं शांतिः स वोऽवतात् ॥ १९ ॥........

पायाद्वः पूरयन् पांचजन्यं नेमिजिनेश्वरः ।
वलानुजवलाटोपकीर्त्तिं कवलयन्निव ॥ २५ ॥........

मौलौ फणिफणाः सप्त नयश्रीभिः करा इव ।
धृताः शांतरसास्वादे यस्य पार्श्वः स पातु वः ॥ २६ ॥

यदंह्रिस्पर्शनान्मेरुर्विलोलैः सानुबाहुभिः ।
धन्यंमन्यो ननर्त्तेव तं वीरस्वामिनं नुमः ॥ २७ ॥........

श्रीनागेंद्रकुलाराममंडनं चंदनद्रुवत् ।
गच्छः श्रीवायटीयोऽस्ति गौरसौरभगौरवः ॥ ३२ ॥

गच्छेऽस्मिन् समजायंत श्रीमद्रासिलसूरयः ।
न च कुर्यद्गुणाः केषां जिह्वादोलासु खेलनम् ॥ ३३ ॥

सूरिः श्रीजीवदत्ताह्वस्तत्पट्टोदयपर्वतम् ।
प्राप्यार्कवद्भवां भारैर्जगद्भाव.नभासयत् ॥ ३४ ॥

सूरिः श्रीजिनदत्ताख्यः प्रख्यातस्तत्पदेऽभवत् ।
भव्यानां भवदावार्तिर्ययौ यद्वचनामृतैः ॥ ३५ ॥

नामभिस्त्रिभिरेभिः स्युर्भूयो भूयोऽपि सूरयः ।
गच्छेऽस्मिन् वत्सरे वर्षाशीतोष्णाः समया इव ॥ ३६ ॥

आनुपूर्व्याऽनया श्रेयोराशिः श्रीरासिलोर्गुरुः ।
भूयो भवद्भवारण्ये पुण्यवाणीसुधासरः ॥ ३७ ॥

ते कदापि चतुर्मासकल्पकल्पनया स्थितिम् ।
अकल्पयन्निलाकल्पकल्पेऽणहिल्लपत्तने ॥ ३८ ॥

तत्र श्रीरासिलाचार्यास्तांश्चतुर्मासकस्थितान् ।
भव्या विज्ञपयामासुरिदं विशदवासनाः ॥ ३९ ॥

चतुर्विंशतितीर्थेशचरित्राणि यतिप्रभो ! ।
मासैश्चतुर्भिरस्माकं नय श्रोत्रसुधोर्मिताम् ॥ ४० ॥

कर्ण्यमाकर्ण्य तद्वाक्यं मुनिर्मुद्वल्लिमंजरीम् ।
श्रवणाभरणीचक्रे भाविनामिति भारतीम् ॥ ४१ ॥

सूरेः श्रीजिनदत्तस्य मद्गुरोः शिष्यपुंगवः ।
श्रयत्यमरचंद्राह्वो मम सब्रह्मचारिताम् ॥ ४२ ॥

श्रीपद्मेनार्थितः स श्रीजिनेन्द्रचरिताह्वया ।
वाक्सहायो महाकाव्यं मिर्ममे निर्ममेश्वरः ॥ ४३ ॥

तत्रोक्ताऽस्ति चतुर्विंशत्यर्हतां चरितावली ।
श्रावकाः श्रावयेतां वः श्रवणामृतसारणिम् ॥ ४४ ॥

श्रीपद्ममंत्री कुत्रासौ वंशे मुक्तामणीयते ? ।
इत्युक्ते श्रावकैः सूरिरूरीचक्रे पुनर्वचः ॥ ४५ ॥

अत्रैवाऽणहिल्लपुरे वायटज्ञातिसंभवः ।
वासुपूज्यः सतां पूज्यः समभून्मंत्रिवृत्रहा ॥ ४६ ॥

तथा कर्णपथायातैर्जगच्चित्तानि यद्गुणैः ।
पूर्णान्यमांत एवांतर्यथा जिह्वासु तेऽलसन् ॥ ४७ ॥

तद्भूरभूद्धियांधाम **रामदेव** इति श्रुतः ।
यन्ममौ यन्मनोऽणौ खं तत्कीर्त्तिस्तत्र मातु किम् ॥ ४८ ॥

आसीत्तस्य सुतः शांतस्वान्तः **शांतड**संज्ञया ।
मुखाब्जमधुवाग् यस्य बुधालिप्रीणनं व्यधात् ॥ ४९ ॥

आसलः कथयामास तत्सूनुः सकलाः कलाः ।
पर्वेन्दुरिव किं त्वस्या नश्वरी कीर्त्तिकौमुदी ॥ ५० ॥

अहिदेवीति तस्याऽऽसीत् पत्नी यस्या मनोऽविशत् ।
न दुर्वृत्ततमोदीप्रप्रत्यंह्निनखदीपकम् ॥ ५१ ॥

तयोर्जयति श्रीसद्म **पद्मनामा** तनूद्भवः ।
धर्मः श्रित्वा शरण्यं यं कलित्रस्तोऽस्तभीरभूत् ॥ ५२ ॥

पद्मस्य स्मेरता युक्तं यन्मित्राभ्युदये भवेत् ।
राजप्रसादतो रेजे·यदस्य श्रीस्तदद्भुतम् ॥ ५३ ॥

लक्ष्मीं पुष्णाति **पद्मस्य** धर्मः प्राग्भवसेवितः ।
तत्कृतज्ञस्तमेवासो तद्दानादेव सेवते ॥ ५४ ॥

श्रेयांसि बहुविघ्नानि तस्य नासन् यतोऽकृत ।
श्रेयोन्तराय घाताय श्रेयोंऽतरशतानि सः ॥ ५५ ॥

यथा तेनार्थितोऽत्यर्थमकरोद**मरो मुनिः** ।
चरित्राणि जिनेन्द्राणां शृणुत श्रावकास्तथा ॥ ५६ ॥

अर्हच्चरितशुश्रूषासुभगं भावुकाशयः ।
अमरेंदुमुनिं पद्मः स कदाप्यब्रवीदिदम् ॥ ५७ ॥

भवसंभारसंस्कारभावितो भवतामहम् ।
न विभिन्नो भवाम्येव भवभाजां स्वभाववत् ॥ ५८ ॥

कृपावंतो भवंतोऽपि कदापि हि न मां हृदः ।
बहिः कुर्वन्ति सर्वज्ञसिद्धांतमिव तात्त्विकाः ॥ ५९ ॥

भवलक्षप्ररूढस्य प्रौढपुण्यतरोः फलम् ।
साधुमूर्द्धन्य ! धन्यस्य भवत्संगोऽभवन्मम ॥ ६० ॥

चतुर्विंशतितीर्थेशचरित्रश्रवणोत्सवः ।
मत्पुण्यवनपर्जन्यः पूर्यतां त्वत्प्रसादतः ॥ ६१ ॥

निशम्य तद्वचः सम्यगमरो मुनिरब्रवीत् ।
हृद्वर्त्तिशमपीयूषपयोधिलहरीं गिरम् ॥ ६२ ॥

तीर्थकरचरित्राणां तीर्थकरजुषामपि ।
तीर्थकरागमार्थानां प्रथा धर्मकथा मता ॥ ६३ ॥

संवेगं विंदते नांगी निर्वेदं नैव विंदति ।
संवेदयति नानंदशर्म धर्मकथां विना ॥ ६४ ॥

तत्त्वं सात्त्विकताकंदमहानंदमहोदयाः ।
कथ्यमाना मया तथ्याः पथ्या धर्मकथाः शृणु ॥ ६५ ॥

चतुर्विंशतिरर्हन्तो व्यधिका दश चक्रिणः ।
प्रत्येकं नव बलिनो विष्णवः प्रतिविष्णवः ॥ ६६ ॥

त्रिषष्टिरवसर्पिण्यां शलाकापुरुषा इति ।
इहासन् भरतक्षेत्रे भूतसंभाविसिद्धयः ॥ ६७ ॥

अन्तः—

इति जिनदत्तसूरिशिष्यपंडितश्रीमदमरचंद्रविरचिते श्रीपद्मानंदापरनाम्नि श्रीजिनेन्द्रचरिताभिधाने महाकाव्ये वीरांके श्रीआदिनाथचरिते मरीचिस्वरूपभगवन्निर्वाणवर्णनो नामाष्टदशमः सर्गः ॥

सोऽव्याद्वो वृषभप्रभुर्भवततौ सेवां बभारेव या
तां संत्यज्य चिराद्विरागललितो लोकस्थितिं यद्यपि ।
एकः शाश्वतमुक्तिशर्म किमपि प्रापत् पदं यः परं
सांतर्भावभृता तथाऽपि किल यं ज्ञाने निलीनान्वगात् ॥ १ ॥

देवा यांत्यमृताशनैरमरतां श्रीपद्म वेद्मि ध्रुवं
श्रीदेवी समदा कदापि न ततस्त्वां मोक्तुमुत्कंठते ।
येनासौ सुकृतामृतैः प्रतिपदं संतर्पमाणान्वया
संप्राप्नोत्यजरामरत्वमतुलं तत्त्वां कुतो मोक्ष्यति ॥ २ ॥ छ ॥

ग्रंथाग्रं श्लोक ३३६ ॥

यदक्षरपरिभ्रष्टं मात्राहीनं च यद्भवेत् ।
क्षंतुमर्हथ विद्वांसः ! कस्य न स्खलिता मतिः ॥ शुभं भवतु ॥ छ ॥

*

(2) Padmānandamahākāvya–Jinendracaritamahākāvya–Part II : Abridged Caturviṁśatijinacarita etc.

(२) पद्मानन्दमहाकाव्य–जिनेन्द्रचरितमहाकाव्य–खंड २ : संक्षिप्त चतुर्विंशतिजिनचरितादि

Folios – 99
Extent – Granthas 2000
Language – Sanskrit
Size – 32·5 × 2·2 inches
Author – Amaracandrasūri Vāyaḍagacchīya
Condition – Good
Age of MS. – c. Latter half of 14th cent. V. S.
General Remarks – Folio 98 contains an illustration of Bhagavān Mahāvīraswāmin, 3·3 × 2·2 inches in size. On folio 99 is depicted Śrī Amaracandrasūri expounding the Padmānandacarita to Minister Padma, 3.2 × 2.2 inches in size.

आदिः—

ॐ ॥ स्वस्तिश्रीर्जयोऽभ्युदयश्च ॥

श्रेयोवल्लिवनांकुराः कुजननश्रेणीपिधानेऽर्गला
मोहद्रोहणमुद्गराः शिवसुखारोहे महारज्जवः ।
अंहःसंहतिजैत्रधर्मविजयस्तंभाः शुभं भाविनां
पुष्यासुर्वृषभप्रभोः पदनखप्राप्तोदया रश्मयः ॥ १

पूर्व श्रीऋषभादीनामर्हतां चरितानि ते ।
पुरः श्रीपद्म ! संक्षेपाद् वक्ष्ये विस्तरतस्ततः ॥ २
श्रीपद्म ! प्रथयिष्यामि प्रथमं पुरतस्तव ।
श्रीमद्वृषभचरित्रं त्रयोदशभवाद्भुतम् ॥ ३

अन्तः—

आनंदास्वादसीमा सुजनजनहृदां भाग्यसौभाग्यसीमा
विश्वालीलोचनानां परमशमरसस्याद्भुतैश्वर्यसीमा ।
धर्मस्योल्लाससीमा शिवसुखपटलीसंश्रयोपायसीमा
श्राद्धानां शर्म संवर्द्धयतु जिनविभोर्वर्द्धमानस्य मूर्त्तिः ॥ २८० ॥

इत्याचार्यश्रीजिनदत्तसूरिशिष्यपंडितश्रीमदमरचंद्रविरचितानि चतुर्विंशतिजिनेन्द्रचरितानि समाप्तानि ॥ छ ॥ * ॥ ग्रंथाग्रं श्लोकसंख्या १८०२ अक्षर १६ ॥ छ ॥

अथ प्रशस्ति:—

श्रीमद्वायटनाम्नि सारसुकृतश्रीधाम्नि पुण्ये महा-
स्थाने माननिदानमानसरसाः श्रीवायटीया द्विजाः ।
स्तोमस्तोमसमुत्थधूमनिवहैर्मालिन्यमालंवया-
मासुर्यां वणिजो जिनार्चनघनोद्यद्धूपधूमोत्करैः ॥ १ ॥

ध्वजमिषभुजमूलस्थूलकुंभैकवक्षोरुहमहह महीयोऽधःकृतस्फाटिकाद्रिः ।
विलसति वणिजां सत्कीर्त्तिधर्मार्द्धनारीश्वरवपुरिव तत्र श्रीमहावीरचैत्यम् ॥२॥

श्रीश्वेतांबरमौलिमौक्तिकमणिस्तस्मिन् जिनेन्द्रालये-
ऽधिष्ठाता जिनदत्तसूरिरजनि ज्ञानैकवैज्ञानिकः ।
श्रेयस्तुंगयदंगसंगमसमुद्भूतप्रभूतस्फुर-
त्पुण्यैः पश्य गुणैर्गतं दिवि सितच्छायैरुडुच्छद्मना ॥ ३ ॥

तत्पट्टोर्वीधरवरमणिर्व्योममणिद्योतजैत्रै-
स्तेजःपुंजैः किमपि ककुभोऽपूरि रासिल्लसूरिः ।
यस्य व्योमच्छलकलशिभृत्कीर्तिधारापयोभि-
र्गोभिःभुक्ताःक्क न जनमनःकामने मोहवल्ल्यः ॥ ४ ॥

सुरगजरजनीभुजंगगंगाभुजगपतिप्रतिशूरकीर्त्तिपूरः ।
तदनु मुनिपतिर्मतिप्रतिष्ठाजनितरसोऽजनि जीवदेवसूरिः ॥

वयस्याद्विद्याभिः खलु सह कलाभिर्गुणगणाः
सहेलं खेलंतो बहुमतिलते यत्तनुवने ।
यशःश्रीपुष्पस्रक्चयसुरभयः संशयमयीं
महादोलां मुक्त्वा सुकृतरसवापीषु विहृताः ॥ ८ ॥

महायोगी भोगिप्रभुनिभभुजस्तस्य शमिनः
सभायामायातः क्वचिदहनि कश्चिद्दहनदृग् ।
असावुद्यद्विद्याचयजयपताकामिव सुखं
मुखाज्जिह्वां क्लृप्त्वा कृतपरिकरोऽग्रे न्यवीशत ॥ ९ ॥

प्रीतिव्यालोलमौलिच्छलचलकमलासुच्छलन् न्युंछनालि-
व्याजभ्राजिष्णुवीचिं स्तिमिततिमिसदृक्दृक्कलाकेलिकम्राम् ।

अक्षुभ्यंस्तत्प्रभावादपि सुकृतसुधासिंधुधाराधरोऽयं
दूरं सूरिः पुपूरे सर इव वरवाग्वृष्टिभिः संसदं सः ॥ १० ॥

अथ सुकृतकथांते गंतुमिच्छन् रसज्ञां
न स परिकरबंधात् क्रष्टुमीष्टे स्म योगी ।

भपण इव तदस्मिन्नुल्लसद्दीनशब्दे
किमिदमिति जनेनापृष्टमाचष्ट सूरिः ॥ ११ ॥

शक्तेः पातयितुं नभस्तलफलं हुंकारतोऽर्कं क्षमो
मूलस्तंभमपि त्रिलोकभवने भंक्तुं भुजंगेश्वरम् ।

योगीन्द्रोऽद्भुतभूरिसिद्धिरसिकोऽसौ मत्कपालाप्तये
प्राप्तः स्तंभनमाचरन् मयि मया द्राक् प्रत्युत स्तंभितः ॥ १२ ॥

वक्त्राग्रलंबितलसद्रसनाववद्धपर्यस्तिकोऽत्र मदमर्पदवानलेन ।
कुंजार्धनिसृतमहोरगवेष्टितांगः शाखीव शुष्यतुतरामयमित्थमेव ॥ १३ ॥

जिनेश्वरमतामृतार्ण्णववितंद्रचंद्रोदय प्रमोदय दयां हृदि क्रुधमसुं च मुंच प्रभो ।
सदः सदि वदत्यदस्तदनु साधुवर्गे गुरुं क्षितौ खटिकयाऽक्षराण्यलिखदेप
योगी तदा ॥ १४ ॥

उपकृतिमुपकर्त्तुः सर्वतः कुर्वते ये कति धरति न धात्री तानसौ मानसौंडान् ।
अपकृतिकृति यस्तामेव कुर्वीत गुर्वीं वहति सततमुर्वीमुद्विवेकः स एकः ॥ १५ ॥

आमृश्यैवं स यतिपतिना कृष्णभोगीव योगी
बंधान् मुक्तः क्रुधमधिवहन् निःश्वसन् निस्ससार ।

यातो यस्यां दिशि रिपुरसौ गम्यतां नाथ तस्या-
मस्मद्वर्ग्यैरिति च वचनं स्पष्टमाचष्ट सूरिः ॥ १६ ॥

रतिरिव पतिनाशे श्रीरिवास्थैर्यदोषे
स्ववशगकविदौस्थ्ये वागिवापन्नतं या ।

नगरबहिरगच्छद् गच्छसाध्वी न्यवेशि
स्वतनुमनु च तेन द्रोहिणा मोहिता सा ॥ १७ ॥

मत्वेत्यथो कुशम तमयं मुनीशः
कृत्वा ततान वितते तपनस्य तापे ।

स प्रस्फुरज्ज्वरभरोऽथ विहाय साध्वीं
 लूनांगुलिर्गलितगर्वगुणो जगाम ॥ १८ ॥
अयमुदयदमंदव्यक्तशक्तिर्व्यनक्ति
 क्वचन वचनसंगी नास्य सादृश्यसंगीः ।
सततमिति यतींदोस्तस्य नर्नर्त्ति कीर्त्ति-
 र्जगति जगति गंगार्णस्तरंगांगहारैः ॥ १९ ॥
पूर्वोर्वीधरगंधसिंधुरशिरःसिंदूरपूरप्रभां
 बिभ्राणे तरणौ कदाचन कृतप्राभातिकप्रक्रियः ।
सूरिर्भूरिभिरेत्य तत्पुरचरैः सम्मान्य मान्यः सतां
 प्रीतिश्रीरसभावितैर्निजसभावर्त्ती बभाषे द्विजैः ॥ २० ॥
गौरेका पतिता कथंचन मृता श्रीब्रह्मशालांतरे
 न म्लेच्छाः प्रविशंति तत्र न मृतं कर्षन्ति विप्राः पशुम् ।
धर्माधारकृपाधुरीण ! तरसा तस्मादहो कस्मला-
 दस्मानन्यपुरप्रवेशकलयैवोत्कर्षतः कर्ष तत् ॥ २१ ॥
मंत्राकृष्टविशिष्टचेटकवयत्रातांगयष्टिर्यति-
 स्वामी सोऽन्यपुरप्रवेशनमथ ध्यानं दधौ शुद्धधीः ।
सा गौरुच्छ्वसिता ततो जिनमतस्यापि प्रभावप्रभा
 सा श्रीब्रह्मगृहाद्बहिर्निरगमद्दुःखं द्विजानां हृदः ॥ २२ ॥
स्वस्थानस्थापितात्मा तदनु मुनिरसावुत्सवेन द्विजेन्द्रै-
 रानिन्ये ब्रह्मशालामथ च पृथुमदैर्व्रायटादित्यदैवम् ।
हैमं यज्ञोपवीतं तदिह सह महास्थानवंटेन दत्त्वा
 जैनोऽपि ब्रह्ममुख्यस्त्वमसि शर्मनिधेऽस्माकमेवं जगे च ॥ २३ ॥
जलद इव तडित्वान् मेरुशृंगाप्तसेतु-
 र्जलधिरिव करीवाबद्धकल्याणकक्षः ।
ध्वनिभरभृतादिक्को लब्धनिष्कोपवीत-
 स्तदनु मुनिरकार्षीद्धर्मकर्मोपदेशम् ॥ २४ ॥

पदपदमदगायद्गायनस्तोमनृत्य-
न्नटपटलकजलपद्धंदिवृंदाद्भुतेन ।
मुदितजनमुदश्रुस्निग्धसांद्रेण सूरिः
स्वमठमथ पथाऽगाज्जग्मुरन्येऽप्यथैकः ॥ २५ ॥

यतींदोस्तस्याथोल्लसदसमशक्तेः परपुर-
प्रवेशावेशर्द्धिः परमतममुत्कर्षमगमत् ।
अमुक्तस्वांगोऽपि स्वसनसुभगस्यापि यदसा-
वनेकस्याऽप्येकः समसमयमेवांतरविशत् ॥ २६ ॥

यन्मार्गाग्रतृणालिरिक्षुलतिका यद्वालुकामंडलं
खंडो यत्तटगर्त्तनीरममृतं यत्कर्करा शर्करा ।
यत्फेनप्रचयः सुधारुचिरयं यत्संरवोऽनाहत-
ध्वानस्ताः शतशोऽस्फुरन् क नयते तस्य प्रबंधापगाः ॥ २७ ॥

तेनाकारि पुरारिपर्वतशिरोधिक्कारिधात्रीतला-
लंकारि स्फुटपापहारि भुवने वृंदं जिनेंद्रौकसाम् ।
आरोपोन्नमितेन यस्य नियतं दंडोच्चयेनोच्चकैः
विद्धं व्योम दधाति किं न परितश्छिद्राण्युडुच्छद्मना ॥ २८ ॥

गांभीर्ये च गुरुत्वे च माधुर्ये च ध्वनौ च कः ।
पर्यन्ताब्धेर्जलाधार इव तस्यैतु तुल्यताम् ॥ २९ ॥

श्राद्धान् श्रद्धाभाजनमुदितसभाजनविराजिनो विप्रान् ।
पौरांश्च भक्तिगौरान् कदाचिदाचष्ट स मुनीन्द्रः ॥ ३० ॥

ग्रहीतुमतुलाग्रहः परपुरप्रवेशव्यसोः कपालमपपालनाद्वपुष एकखंडं मम ।
सयोगिपुरुषोऽकृत प्रमृतगोप्रयोगं मया स्वरक्षणविचक्षणान्वघटि चेटकानाघटाः ॥३१॥

भुवनविजयविद्यां शुद्धकर्मण्यवद्यामममुदसुविनाशैः साधयिष्यन् स योगी ।
चिरविरचितयत्नो मत्कपालग्रहार्थं विहरति परितो मन्मृत्युकालप्रतीक्षः ॥ ३२ ॥

व्यसोर्नगरनिर्गमे डमरकध्वनिर्व्योमनि स्फुटः स्फुरति तद्यदा मम शिरोऽस्थि चूर्ण्य तदा ।
इतीद्धमतिलीलया समुदमुद्वहन् मुञ्चितां चिराय परिपूरयत्यगुरुचंदनौघैः पुरा ॥ ३३ ॥

इति विरचितशिक्षः स क्षमी ध्यानशुद्धि-
त्रुटितविकटकर्मा निर्मलीभूतचित्तः ।
अमृगयत नटंतीरष्टसिद्धीः कदाचि-
द्दिशि विदिशि कदाचिद्रीःश्रियौ युक्तपाणी ॥ ३४ ॥

नेत्रे निमील्यति चेद्भवबृद्धिहेतुर्भूलोकदर्शनभिया स पतिर्यतीनाम् ।
तद्भूरिभावभरभासुरभूतिमालमालोकते त्रिजगतीमपि किं करोतु ॥ ३५ ॥

इति सुकृतनिधानध्यानानिर्धारितायुः भुवमिव दिवमात्माध्यासपूतां स चक्रे ।
जनमनसि स जीवन्नेव रेजे तु तत्तन्मतिविफलितताहगृदुष्टयोगिप्रयोगः ॥ ३६ ॥

अमीभिस्त्रिभिरेव श्रीजिनदत्तादिनामभिः ।
सूरयो भूरयोऽभूवंस्तत्प्रभावास्तदन्वये ॥ ३७ ॥

एकः प्रौढविवेकविभ्रमलतापुष्पेषु पुष्पेषुजित्
तेषु श्रीजिनदत्तसूरिरुदयद्भूरिप्रभावोऽभवत् ।
ताहग्विस्तृतहृन्निपीतनभसो यस्योचितं दिद्युते
धीरांभोधरसिंधुसिंधुरजयी व्याख्यासु शंब्दो गुणः ॥ ३८ ॥

श्रीविवेकविलासाद्यैर्यत्प्रबंधैः सहस्रशः ।
हृतमोहतमोऽकारि करैरिव रवेर्जगत् ॥ ३९ ॥

आयुष्यं कथयंति जंतुषु पयःसारः पयोधेः पुनः
पीयूषं पृथिवीजुषामनिमिषीभावाय संभाव्यते ।
विघ्नः श्रीजिनदत्तसूरिवचनं सारः सुधानामपि
व्यक्तं मुक्तिमपि प्रयच्छति सतां यत्पीतमुत्प्रीतिकृत् ॥ ४० ॥

श्रीजीवदेवसूरीणां त एव परमाणवः
जग्मुर्यदंगतां भेजे तद्गुणैस्तद्धियेव सः ॥ ४१ ॥ इतश्च—

श्रीवायटप्रवणवंशमणिर्महस्वी श्रीवासुपूज्य इति मंत्रिवरो विरेजे ।
येनाऽणहिल्लपुरपौरपरंपराणां चूडामणित्वमुररीक्रियते स्म शश्वत् ॥ ४२ ॥

रामदेव इति तत्सुतोऽभवद्यद्यशःप्रसरदुग्धवारिधौ ।
लक्ष्मलक्ष्यदरसोमशुक्तिजा मौक्तिकाल्य इवोडुपंक्तयः ॥ ४३ ॥

तस्य मानसनिवासिनी प्रिया पद्मिनी सुदिवसोद्गमास्मिता ।
श्रीगृहांह्रिनन करांह्रिनीरजा जातरूपरुचिरा व्यराजत ॥ ४४ ॥

तस्य सूनुरजनिष्ट शांतडः शांतलक्ष्मशशलक्ष्मसन्निभः ।
यस्य निस्तमसि मानसे गुणैः शर्मधर्मनृपतिर्लसन् लसौ ॥ ४५ ॥

कलिकालकरालवल्गितैः गतसंज्ञं सुकृतामृतोर्मिभिः ।
सहजी समजीवयत्तमां दयिता तस्य पतिव्रताव्रतम् ॥ ४६ ॥

आसलः कलयति स्म कौशलं कासु कासु न कलासु तत्सुतः ।
केवलं स्वगुणभाषणार्थिनां रक्षणे परविभाषणेऽल्पधीः ॥ ४७ ॥

तस्याहिदेविरतिदेहधरेव गेहलक्ष्मीः प्रिया कलविलक्षणलक्षणाऽऽसीत् ।
यस्या वरांह्रिनखरत्नधरो मनोब्धिः केनापि नैव कलितो विमलात्मवृत्तिः ॥४८॥

श्रीपद्म इत्यभिधया धियां निधिः पुत्रस्तयोर्जयति मंत्रिवृत्रहा ।
श्रीः प्राप्य तीर्थमिव यं सरस्वतीपूतं स्वपापचपलत्वमत्यजत् ॥ ४९ ॥

कश्चिद्वैरगुणोऽस्ति यः स कलितोन्मादं विवादं मया
दत्तामित्यखिलेपु यस्य यशसा विश्वेषु विस्फूर्जितम् ।
क्वाप्येतत् प्रतिमल्लतां कलयते कोपीनकोपीत्यदात्
ब्रह्मेंदुं जयपत्रमस्य पुरतः संलक्ष्य लक्ष्माक्षरम् ॥ ५० ॥

सत्पात्रप्रसराश्रयः शुचिगणप्राग्भारगौराशयः
सद्वृत्तौ द्विजराजहंससुखकृद्दोषाकरे न्यग्मुखः ।
श्रीमद्विश्वलदेवविश्वविभुना प्रोद्भास्य तेजोभरैः
श्रीपद्मस्तपनेन पद्मवदयं सद्मश्रियो निर्ममे ॥ ५१ ॥

श्रीमद्विश्वलमेदिनीश्वरकृतप्रौढप्रसादादसौ
व्यापारानधिगम्य कानपि कदाऽप्युत्सेकदावांबुदः ।
श्रीपद्मो नृपतिप्रजार्थयुगलीं कृत्वाऽर्थशास्त्रार्थतः
स्वार्थं सारपरोपकारकरणव्यापारमेवाकरोत् ॥ ५२ ॥

श्रीपद्मः समभूषयज्जिनविभुं हृन्नंदनैश्चंदनैः
कर्पूरैः कुसुमोत्करैः सुरभिभिः शुभ्रैर्यशोभिर्जगत् ।

सिद्धांतस्यापि देष्टारोऽर्थतस्तीर्थकरा मताः ।
अतः पावयतात्मानं तदीयचरितामृतैः ॥ ३० ॥

एतेष्वप्यधुना वक्ष्ये स्वपरोकृतेः कृते ।
चरितं **शांतिनाथस्य** चक्रिणो धर्मचक्रिणः ॥ ३१ ॥ तथा हि—

अन्तः—

....

पूर्वोदयाद्रिरत्नं कमलोल्लासी जगत्त्रितयदीपः ।
सुदिनोदयाय भवतु श्री**शांतिः**सकललोकस्य ॥ १ ॥

कल्याणमूर्त्तिर्विबुधो........................ ।
........................मेरुप्रतिमः समस्ति ॥ २ ॥

पुत्रस्तस्याऽप्यजनि जनतानंदकंदः सदैव
न्यायोपात्तं स्वधनमनिशं दत्तवान् दानशौंडः ।
लोके लोकं........................

*

No. 202: Śāntināthacaritramahākāvya—Padya

शान्तिनाथचरित्र महाकाव्य—पद्य

Folios – 189
Language – Sanskrit
Author – Munidevasūri

Extent – Granthas 4855
Size – 30·7 × 2 inches
Condition – Good
Date of Composition – V. S. 1322

Age of MS. – V. S. 1338.

अन्तः—

धीरोदात्तचरित्रवानधिगतश्चक्रिश्रियं तत्र यद्
भोगेऽप्यस्य न संगमंगति मतिस्तद्धीरशांतो ध्रुवम् ।
शूरः क्रूरतरश्च मोहनिहंतौ धीरोद्धतो नायकः
सिद्धो बद्धरतिश्च धीरललितः **शांतिः** शिवायास्तु वः ॥ १ ॥

बार्हस्पत्याधिपत्यस्य पातने प्रथितोद्यमः ।
अपूर्वः कोऽपि लोकेऽस्मिन् **देवसूरिः** कृतोदयः ॥ २ ॥

यो वादीश्वरदेवसूरिसुगुरोर्मूलक्रमे सूरिणा
चक्रे श्रीमदनेंदुना निजपदे तेनाग्रवृत्तश्रिता ।
काव्ये श्रीमुनिदेवसूरिकविना श्रीशांतिवृत्ते कृते
श्रीप्रद्युम्नमुनींदुधीरुचिशुचिः सर्गोऽगमत् सप्तमः ॥ ३ ॥ छ ॥
निर्वृतिप्राप्तिर्नाम ॥ छ ॥

प्रभाधिनाथैर्मुनिभिः कलाभृन्मुख्यैरुपेतो गुरुतारकौघैः ।
अनंतलीलाकलितः किलाऽऽस्ते गच्छो बृहद्गच्छ इति प्रतीतः ॥ १ ॥

तत्र चित्रचरितः परितापं हर्तुमब्द इव भव्यजनानाम् ।
सस्यवृद्धिकरसंवरवानप्युज्ज्वलोऽजनि गुरुर्मुनिचंद्रः ॥ २ ॥

दुःषमाजलधौ येन मग्ना सुविहितस्थितिः ।
हेलयैव समुद्दध्रे धरित्री वादिपोत्रिणा ॥ ३ ॥

श्रीजैनशासनसरोजविकाशभानुः श्रीदेवसूरिरिति तस्य बभूव शिष्यः ।
दुर्वादिकौशिकचयप्रतिभादृशांध्यं यो वाग्मरीचिनिचयै रचयांचकार ॥ ४ ॥

येषां दूरीकृतया कीर्त्यावल्याऽपि कुमुदचंद्रस्य ।
विदधे विजयस्तज्जयमहिमा को नाम तेषां स्यात् ॥ ५ ॥

तद्भद्रासनविंध्यभूभृति यशः श्रीपूर्वगंगाभृति-
श्रीभद्रेश्वरसूरयः समभवन् भद्रेभशोभाभृतः ।
यैः प्रज्ञाप्रसरेण शास्त्रगहनं संशोध्य दुःसंचरं
शिष्याणां मतयः करेणव इव प्रौढप्रचाराः कृताः ॥ ६ ॥

तत्पदेऽभयदेवस्य प्रभोः कल्पद्रुकल्पताम् ।
कथैव कथयत्येषा प्ररूढा रत्नमंजरी ॥ ७ ॥

सूरिर्मदनचंद्राख्यो मुख्यो मार्दवशालिनाम् ।
तत्पट्टमुकुटो रेजे शिष्यरत्नैः समुज्ज्वलैः ॥ ८ ॥

मत्वा छिन्ने येन नाम्नी स्वकीये लब्ध्वा सद्यो पुष्पचापद्विजेशौ ।
नेशौ मन्ये मुख्यकर्तुं विरुद्धाऽन्येकोऽनंगः कृश्यदंगः परोऽभूत् ॥ ९ ॥

तत्पट्टैकविशेषको गणभृतः प्रद्युम्नतः कोविद-
स्तद्बंधोर्जयसिंहसूरिसुगुरोर्योगादीनिर्णीतधीः ।

शास्त्रेषु प्रचितो मनीषिभुवनात् पद्माकरेणैधितः
काव्यं श्रीमुनिदेवसूरिरत श्रीशांतिवृत्तं नवम् ॥ १० ॥

द्विद्वित्र्येकसमासु १३२२ मासि सहसिश्वेताद्वितीया वुधे
द्वेधाऽप्यत्र यदाश्रयं श्रितवता काव्यं मयेदं कृतम् ।

श्रीप्रद्युम्नमुनीश्वरः स विशदं सद्यः प्रसद्य व्यधाद्
ज्ञैरन्यैरपि शोधनीयमसमं धृत्वा ममत्वं मयि ॥ ११ ॥

ग्रं० ४१६ एवं ग्रं० ४८५५ ॥ छ ॥
प्रत्यक्षरं च संख्यानात् पंचपंचाशताऽधिका ।
अस्मिन्ननुष्टुभामष्टचत्वारिंशच्छती ध्रुवम् ॥ छ ॥

मंगलमस्तु ॥ छ ॥ सं० १३३८ वर्षे आषाढ शुदि १५ शनौ ॥ छ ॥

ॐ ॥ नमः सर्वज्ञाय ॥

स श्रीशांतिः श्रिये वोऽस्तु योऽपूर्वो मृगलांछनः ।
अविनाशिरुचिच्छायः सदोद्योतः प्रकाशकः ॥ १ ॥

सश्रीकं जिनमावहन् लवणिमालीलागृहं रत्नसू
राज्ञः पूर्णकलामवाप्य मुदितस्तन्वन्नदीनां स्थितिम् ।
शश्वद्गोत्रप्रतिष्ठारुचिरसनिलयः साधुवृत्तः समग्रः-
सत्त्वाधारः समुद्रोपम इह जयति प्राग्वाटनामाऽन्वयः ॥ २ ॥

तदन्वयेऽभूद्धनदानुकारी सन्मार्गशाखीव परोपकारी ।
धनेश्वरो धर्मधुरीणदेहस्तस्यांगजोऽभूद्धनदाकनामा ॥ ३ ॥

काशहृदे वरनगरे धनदाकेनादिनाथजिनभवने ।
मूलप्रतिमाऽभिनवाऽस्थाप्यत शुद्धेन चित्तेन ॥ ४ ॥

श्रेष्ठिनो धनदाकस्य ब्रह्मदेवः सुतः शुभः ।
वाग्भटश्च सुता चैका लक्ष्मणिः शीलशालिनी ॥ ५ ॥

पुत्रो गोगाकनामाऽभूद्वाहडस्य गुणश्रियः ।
गां(? गो)गाकस्यमलापत्नी तयोः पुत्रत्रयं क्रमात् ॥ ६ ॥

ऊथिग-धांधु-आकडसुख्या साल्हू तथा दुहिता ।
सौभाग्य-श्रीदेवी द्वाभ्यां पत्न्यौ सुभाकारे ॥ ७ ॥

भार्याऽभूद्ब्रह्मदेवस्य मंदोदरी शुभाशया ।
तयोः पुत्राश्चतुस्संख्याः धर्मकर्मणि कर्मठाः ॥ ८ ॥

आल्हाकः सकलः कलंकरहितः स्वच्छाशयो धर्मधीः
माल्हाको महिमानिधानमतुलो वाक्येन सन्नंदकः ।
राल्हाको गुरुपादपद्मभसलः सर्वज्ञपूजारतः
साल्हाकः सबलः सलीलगमनः सत्यव्रतालंकृतः ॥ ९ ॥

राल्हाककुमरदेव्योः पुत्रत्रितयं तु ब्रह्मणागाद्यः ।
काल्हूक-रत्नसिंहौ ब्रह्मी-सोहगसुते द्वे च ॥ १० ॥

आल्हाकोऽर्जितवित्तादाभरणं श्रीयुगादिदेवस्य ।
आरात्रिकं च मंगलदीपयुतं कारयामास ॥ ११ ॥

आल्हाकरत्नदेव्यो रत्नत्रयधारकास्त्रयः पुत्राः ।
समधरगुणधरयशधरमुख्याश्चाहणि सुता चैका ॥ १२ ॥

समधरभार्याकर्मणिपुत्राः सप्त क्रमेण कोलाकः ।
आसा-ऽऽसपाल-सेढा-पूना-हरिचंद्र-वयराख्याः ॥ १३ ॥

गुणधरभार्या स्वच्छा शीलतपोदानभावधर्मरता ।
राजमतिरंगजातास्तयोर्जैनानंदकाः सस्याः ॥ १४ ॥

पार्श्वभटो वीराकः आंबा-लींबाक-सोमदेवाश्च ।
शील्ह-हीरलदुहिते जिनधर्मसदोद्यतेऽत्यंतम् ॥ १५ ॥

पासडभार्यासाजिणिपुत्रौ द्वौ विजयसिंह-नयणाकौ ।
वीरापत्नीराजश्रीसूनुत्रयं तु जगपालः ॥ १६ ॥

हरपाल-देवपालौ आंबाभार्या च ललतुका श्रेष्ठा ।
नरपालसुतश्चैको लींबाकस्याऽ-णपमाख्या ॥ १७ ॥

विजयश्री-यशधरयोर्नरसिंहसूनुरतिथिजनभक्तः ।
पातो दुहिता चैका कुटुंबमेतच्च सुविशालम् ॥ १८ ॥

श्रीभुवनरत्नपूज्याः पारींद्रा वादिकुंजरे ।
एकांतरा निर्वृतिका गच्छाधाराः शुभाचाराः ॥ १९ ॥

आनंदप्रभुसूरीन्द्रास्तत्पट्टांभोजभानवः ।
सिद्धान्तजलधिपारं प्रापुः प्रज्ञाप्रकर्षेण ॥ २० ॥
तत्पट्टे [सु]विशुद्धे श्रीमंतो **वीरदेवसूरीन्द्राः** ।
तत्पट्टे सच्चरिताः धीमंतः **कनकदेवाख्याः** ॥ २१ ॥
ससुतो **गुणधर**श्राद्धः पार्श्वे श्री**कनकदेव**सूरीणाम् ।
धर्मोपदेशमतुलं शुश्रावेत्थमघापहम् ॥ २२ ॥
गुणानां सर्वेषां जगति जयिनी संपदनिशं
यया दोषाः सर्वे झगिति गुणतां यांति गृहिणाम्
न चेद्भाग्याद्दृश्या जलधिजलकल्लोलचपला
सा केषांचिद्व्यसननिकरे धर्मकार्येऽ परेषाम् ॥ २३ ॥
जिनबिंबभवनपुस्तकतुर्यविधिसंघसप्तक्षेत्रेषु ।
यो वपति वित्तबीजं लभते हि परत्र स वहुफलं ॥ २४ ॥
[तत्र च] मुनिक्षेत्रांतर्विशेषपुण्याय पुस्तकक्षेत्रम् ।
पुस्तकलिखनप्रभावाद्भवंति धर्मोपदेष्टारः ॥ २५ ॥
कलिकालकालविलसिततमसा पिहिते च धर्मवररत्ने ।
श्रुतलिखितपुस्तकमये दीपे तत्प्रकटनं भविनाम् ॥ २६ ॥
केवलज्ञानपरिस्पर्द्धिश्रुतज्ञानमुदीरितिम् ।
अतस्तल्लेखने पुण्यमगण्यं गदितं जिनैः ॥ २७ ॥
इत्थं श्रुत्वा पुत्रसाहाय्यतोऽसौ श्रेष्ठी न्यायोपात्तवित्तेन हृद्यम् ।
शांतेर्वृत्तं लेखयामास शुद्धं पित्रोः श्रेयस्कारणं हर्षपूर्णः ॥ २८ ॥
अष्टत्रिंशत्तमवर्षे **पोसीनकपुरे** वरे ।
पुस्तकं वाचयामास गुरोः **कनकसूरि**तः ॥ २९ ॥
क्षेत्रज्ञानांकुराणां निविडतमतमस्कांडचंडांशुबिंबं
....स्तापांबु[प्र]वाहः कुमतमयिमलासंगगंगाप्रवाहः ।
श्रेयः श्रीवश्यमंत्रः शिवपथपाथिकश्रेणिपीयूषसत्रं
दुःखार्त्तद्वैतमिद्धं जयति जिनगिरां सारणिः पुस्तकोऽयम् ॥ ३० ॥
शुभं भवतु ॥ छ ॥

No. 203 : Munisuvrataswāmicaritramahākāvya-Padya

मुनिसुव्रतस्वामिचरित्रमहाकाव्य-पद्य

Folios – 193
Language – Sanskrit
Author – Muniratnasūri
Age of MS. – c. First half of 14th cent.V.S.
General Remarks – Folios 140, 142, 172 and 177 missing.

Extent – Granthas 6806
Size – 33.5 × 2 inches
Condition – Good

आदिः—

॥ ॐ नमः सर्वज्ञाय ॥

पायात् पदनखश्रेणिर्मणिस्वच्छा जिनस्य वः ।
धर्मस्य दशरूपस्य या क्रीडादर्पणायते ॥ १ ॥

पादाग्रजाग्रनिर्व्याजराजमौलिमणिद्युतिः ।
देवदेवः स वः पातु नवः श्रीवृषभध्वजः ॥ २ ॥

श्रीशांतेः शांतिकं पादाः स्फुरत्सौवस्तिकश्रियः ।
तन्वतां जगतां प्रेंखन्नखज्योतिर्जलप्लवैः ॥ ३ ॥

हरिवंशसरोनीलोत्पलश्रीः श्रीनिकेतनम् ।
देवेंद्रनेत्ररोलंबचुंबितः पातु सुव्रतः ॥ ४ ॥

उपास्ते यं क्षमाभारोद्धारवैमुख्यदुर्यशः ।
स्वस्यापनेतुं कूर्मेशस्तीर्थेशः सोऽस्तु वः श्रिये ॥ ५ ॥

यत्पादौ भक्तलोकानां द्वेधा दौर्गत्यवारणौ ।
निधी नव्याविवाशेषसुरासुरनिषेवितौ ॥ ६ ॥

आश्रितौ शंखमकरपद्मैस्तैर्निधिनिर्जितैः ।
लक्ष्मणच्छद्मना प्रेक्ष्य कच्छपोऽप्याश्रयद् ध्रुवम् ॥ ७ ॥

कल्याणकदलीकंदानुल्लासयतु वश्चिरम् ।
स्फुरत्तेजोघनच्छायः स श्रीमान् मुनिसुव्रतः ॥ ८ ॥ त्रिभिर्विशेषकम् ।

तरलोऽपि ततः किंचिच्चरित्रं निजशक्तितः ।
मुनिसुव्रतनाथस्य वक्ष्ये तद्भक्तिलुब्धधीः ॥ ९ ॥

अन्तः—

एतत्कुंडलवस्तुवर्णघटितं श्रीसुव्रतस्य प्रभो-
वृत्तं वृत्तमनोहरं दधति ये कर्णे सकर्णाश्चिरम् ।
चित्रं नात्र यदेककुंडलकला तेषां समुज्जृंभते
तच्चित्रं त्वनुरागजागरभुवः स्युर्यत्पुमर्थश्रियः ॥ ७७ ॥
उत्प्रेंखन्नखरत्नदीपमसितप्रौढांशुदूर्वांकुरं
नम्राखंडलमौलिमौक्तिकरुचि श्रीखंडपिंडस्थिति ।
श्रीर्नीराजनभाजनं क्रमयुगं चंचत्कटाक्षाक्षतं
बिभ्राणो मुनिसुव्रतस्य कुरुताद्वोऽनर्गलं मंगलम् ॥ ७८ ॥
निःसारोऽपि गिरां ममैष सुतरां गुंफस्त्रिलोकीपतेः
सारैः सच्चरितैर्युतः कृतधियामादृत्यतामेष्यति ।
मृत्पिंडश्चरणाहतिस्थितिरपि श्रीराजमुद्रांकितः
प्रीत्योल्लास्य महाधनैरिह जनैर्मौलौ न किं स्थाप्यते ॥ १८३ ॥

इत्याचार्यश्रीमुनिरत्नविरचिते श्रीमुनिसुव्रतचरिते महाकाव्ये अश्वावबोधस्कंदकाचार्यकार्त्तिकपथाविस्तारिविहारस्वामिनिर्वाणस्वरूपवर्णनस्त्रयोविंशः सर्गः ॥ छ ॥ ग्रं० १८५ । समाप्तं चेदं श्रीमुनिसुव्रतचरितम् ॥ छ ॥ मंगलं महाश्रीः ॥ शुभं भवतु लेखक[पाठकयोः] छ ॥ सर्वांक श्लोक ६८०६ ॥

*

No. 204 : Neminäthacaritra (from Bhavabhāvanāvṛtti)

नेमिनाथचरित्र (भवभावनावृत्त्यन्तर्गत)

Folios – 276
Extent – Gathas 5100
Language – Prakrit
Size – 18.5 × 2.2 inches
Author – Maladhārī Hemacandrācārya
Condition – Good
Age of MS. – c. Beginning of 13th cent. V.S.
Date of Composition – 1170 V.S.

General Remarks – Though this itself is a part of the Svopajña Vṛtti of Bhavabhāvanāprakaraṇa, some additions are made at the beginning of the work in order to account for its being preserved as a separate work. In a manuscript of the same work, preserved in the Palm Leaf Jñānabhaṇḍāra established by the Kharatara Ācārya Śrījinabhadrasūri at Jesalmer, has even a Praśasti inserted in it.

*

No. 205 : Mahāvīracaritra : महावीरचरित्र

Folios – 169
Language – Prakrit
Author – Nemicandrasūri
Age of MS. – 1197 V.S.
Extent – Gāthās 2400 ; Granthas 3000
Size – 11·7 × 2 inches
Condition – Good
Date of Composition – 1141 V.S.

अन्तः—

इय एवं संखेवा वीरजिणिंदस्स साहियं चरियं ।
संपइ जेण णिबद्धं एत्तो एयं पवक्खामि ॥

सिरि जंबुणामसिरिपभवसूरिसेज्जंभवाइसूरीणं ।
परिवाडीए जाओ चंदकुले वड्डगच्छंमि ॥

सिरिउज्जोयणसूरी उत्तमगुणरयणभूसियसरीरो ।
वेहारुयमुणिसंताणगयणवरपुन्निमाइंदो ॥

सोमत्तणेण सोमं खमं खमाए य जो अभिक्खिवइ ।
थिरयाए मेरुगिरिं गंभीरत्तेण मयरनिहिं ॥

जंमि य गच्छे आसी सिरिपज्जुन्नाभिहाणसूरि त्ति ।
सिरिमाणदेवसूरी सुपसिद्धो देवसूरी य ॥

उज्जोयणसूरिस्स उ सीसो अह अम्बदेवउज्झाओ ।
खममद्दवऽज्जवाईगुणकलिओ सोममुत्ती य ॥

तस्स विणेएण इमं वीरजिणिंदस्स साहियं चरियं ।
पावमलस्स खयट्ठाय सूरिणा नेमिचंदेण ॥

जं एत्थ अणागमियं लक्खणछंदेहिं दूसियं जं च ।
रइयमणाभोगेणं मिच्छामिह दुक्कडं तस्स ॥

जो पढइ इमं चरियं वक्खाणइ सुणइ वायए वा वि ।
वीरस्स उ भत्तीए सो पावइ परमकल्लाणं ॥

अणहिलवाडपुरंमी सिरिकन्नराहिवंमि विजयंते ।
दोहट्टिकारियाए वसहीए संठिएणं च ॥

वाससयाणं एक्कारसस्स विक्कमनिवस्स विगयाणं ।
अगुयालीसे संवच्छरंमि एयं निबद्धं ति ॥ छ

ग्रंथाग्रं श्लोकतो ज्ञेयं सहस्रात्रितयं त्विदम् ।
तिष्ठतः पुष्पदंतौ च यावत्ताव........... ॥

गाथा २४०० श्लोक ३००० । संवत् ११९७ आसोय वदि १० सोमे मघानक्षत्रे शुक्रयोगे च महावीरचरितं समाप्तम् ॥

*

No. 206 : Pārśvanāthacaritra : पार्श्वनाथचरित्र

Folios – 323
Size – 27.5 × 2.2 inches
Language – Prakrit
Condition – Good
Author – Devabhadrasūri
Date of Composition - 1168 V.S.
Age of MS. – c. First half of 13th Cent. V.S.
General Remarks – Folio 323 contains three very nice picture-decorations in black ink.

आदिः—

॥ ॐ नमो वीतरागाय ॥

धम्ममहामहिसुद्धरिउमिच्छुणो जस्सं विहियसत्तसिरो ।
दाउं साहेज्जं पिव उवट्ठिओ सहइ भुयगवई ॥

तं पणयपूरियासं तिजयपयासं विमुक्कभवपासं ।
पणमह जिणिंदपासं कयकमठासुरसिरीनासं ॥

तं चेव पुणो पणमह दुजीहसहसक्खयं भुयगसक्का ।
जस्स गुणत्थुइमुहपेहणेण मण्णंति कयकिच्चं ॥
नमह नमंतसुरासुरनारिंदमणिमउडपडियपडिबिंबं ।
भुवणजणुद्धरणकए कयबहुरूवं व उसभजिणं ॥

निज्जियदुज्जयमयणा अमोहवयणा भयत्तजणसरणा ।
सिरिअजियनाहपमुहा सेसा वि जयंति जिणवसभा ॥

उत्तसियरसियविलसियवियसियचंकमियरमियरम्माहिं ।
जो संगमयपियाहिं न मोहिओ जयइ सो वीरो ॥

सिद्धंतो जयइ समुल्लसंतबहुभंगहेउदिट्ठंतो ।
फारफुरंतनिरंतरतरंगनिवहो समुद्दो व्व ॥

करकलियकमलसोरभमिलियालिरवच्छलेण कइवसहा ।
जं मग्गंति वरं पिव मणिच्छियं जयइ सा वाणी ॥

सिस्साण सिसूणं पिव विचित्तसत्थोसहीरसं दाउं ।
वइवित्थरं जणंता जयंति गुरुणो वि गुणगुरुणो ॥

अन्तः—

एवं च निव्वुइगए जिणनाहे गणहरप्पबंधे य ।
अड्ढाइयवरिससयाइं जाव तित्थं पवित्थरियं ॥
तो तिहुयणेकतिलओ मंगलनिलओ जिणो **महावीरो** ।
उप्पन्नो अच्छेरयभूयमहासत्तसंपन्नो ॥
तित्थम्मि वहंते तस्स भयवओ तियसवंदणिज्जम्मि ।
चंदकुलम्मि पसिद्धो विउलाए **वइरसाहाए** ॥
सिरि**वद्धमाणसूरी** अहेसि तवनाणचरणरयणनिही ।
जस्सऽज्ज वि सुमरंतो लोगो रोमंचमुव्वहइ ॥
स्सासि दोन्नि सीसा जयविक्खाया दिवायरससि व्व ।
आयरिय**जिणेसर-बुद्धिसागरा**यरियनामाणो ॥
तेसिं च पुणो जाया सीसा दो महियलम्मि सुपसिद्धा ।
जिणचंदसूरिनामो वीओऽ**भयदेव**सूरि त्ति ॥
सिद्धंतवित्तिविरयणपगरणउवयरियभव्वलोयाण ।
को ताण गुणलवं पि हु होज्ज समत्थो पवित्थरिउं ॥
तेसि विणेयस्स **पसन्नचंद**सूरिस्स सव्वगुणनिहिणो ।
पयपउमसेवगेहिं **सुमइ**उवज्झायसिस्सेहिं ॥
संवेगरंगसालाराहणसत्थं जगम्मि वित्थरियं ।
रइयं च **वीरचरियं** जेहिं **कहारयणकोसो** य ॥
सोवन्निडयमंडियमुणिसुव्वय-वीरभवणरमणीए ।
भरुयच्छे तेहिं ठिएहिं मंदिरे **आमदत्त**स्स ॥
सिरि**देवभद्दसूरी**हिं विरइयं **पासनाहचरियमिमं** ।
लिहियं पढमिल्लुयपोत्थयम्मि गणि**अमलचंदेण** ॥
इहइं जे उवयरिया मुणिगिहिणो ते सया वि नंदंतु ।
काराविंयं च एयं जेहिं ते पुण निसामेह ॥

जयपयडवियडव्वायडकुलमंदिरजयपडायपडितुल्लो ।
कप्पडवाणिज्जपुरे सेट्ठी गोवद्धणो आसि ॥

वावन्नसिहरमणहरसुवन्नवरकलससोहमाणसिरं ।
जिणवासुपुज्जभवणं जेणं काराविरं तुंगं ॥

तस्स सुओ सोड्ढाकुच्छिसंभवो सेट्ठिजज्जणागो त्ति ।
छत्तावल्लिनिवासी अहेसि सावयगुणाणुगओ ॥

तस्स सुया सुंदरिकुच्छिसंभवा सिद्धसेट्ठि वीरो य ।
अन्नो य भाइणेज्जो सुओ व्व जसणागसेट्ठि त्ति ॥

जिणभवणबिंबपोत्थयसंघत्थसुतित्थजत्तकरणेण ।
नियजम्मजीवियाणं फलमुवलद्धं जए जेहिं ॥

अह हेममयं व विभूसणेहिं णेगेहिं सेट्ठिवीरेण ।
सिरिपासनाहबिंबं सुट्ठु पइट्ठावियं लट्ठं ॥

पित्तियसुयगग्गयसेट्ठिआमसाहिएण परमरिद्धीए ।
काऊण तित्थजत्तं निव्विग्घं संघजुत्तेणं ॥

वीरसुएण य जसदेवसेट्ठिणा नन्नठक्कुरेणं च ।
कारवियं सुहबोहं परमेसरपासचरियमिमं ॥

काले वसुरसरुद्दे ११६८ वच्चंते विक्कमाओ सिद्धमिमं ।
अणुचियमिह सूरीहिं खमियव्वं सोहियव्वं च ॥

इय विमलकेवलाभोयलोइयालोयलोयभावस्स ।
बहुसत्थसमुद्धरिए पासजिणिंदस्स वरचरिए ॥

नेव्वाणलाभनामो विहुणियसव्वंगिवग्गसंतावो ।
पंचमओ पंचमओ समत्थिओ एस पत्थावो ॥

निप्पत्तिमुवगयमिमं मुणिसुव्वयसामिणो पसाएण ।
अंबा-सुदरिसणा-बंभसंति-सुयदेवयाणं च ॥

एयं तिलोयपहुपासजिणेसरस्स जे सुंदरं चरियमेक्कमणा कहिंति ।
जे वा पढंति निसुणंति धरंति चित्ते भत्तिब्भरेक्कहियया सइ संथुणंति ॥

ते रोगसोगधणनासपवासवेरिभूयाइसंभवमहादुहविप्पमुक्का ।
भोत्तूण वंछियसुहाइं जणेण पुज्जा सज्जो लहंति सुरलोयसिरिं सिवं च ॥ छ ॥

मंगलमस्तु ॥ इति श्रीप्रसन्नचंद्रसूरिपादसेवकदेवभद्राचार्यविरचितं पार्श्वनाथचरितं समाप्तम् ॥ छ ॥ छ ॥

*

No. 207: Pārśvanāthacaritramahākāvya—Padya

पार्श्वनाथचरित्र महाकाव्य—पद्य

Folios – 187
Language – Sanskrit
Author – Māṇikyacandrasūri
Age of MS. – 14th cent V.S.

Extent – Granthas 5278
Size – 32 × 2·5 inches
Condition – Good
Date of Composition – 1276 V.S.

आदिः—

ॐ नमो विश्वमित्राय जैत्राय परमात्मने ।
लोकः कोक इवास्तोकप्रीतिः संपद्यते यतः ॥ १ ॥

ज्ञानरंगैकदेशेऽपि यस्य लोकत्रयी नटी ।
भावैरनन्तैर्नृत्यन्ती भाति पायाज्जिनः स वः ॥ २ ॥

अन्तः—

इत्याचार्यश्रीमाणिक्यचन्द्रविरचिते० महाकाव्ये श्रीपार्श्वनाथविहारानिर्वाणवर्णनो नाम दशमः सर्गः समाप्तः ॥ छ ॥

सद्वृत्तलक्ष्मीरचलप्रतिष्ठानिकेतनस्फारसरस्वतीकः ।
मनुष्यलोकप्रतिमः पृथिव्यां श्रीकोटिकः स्फीतगणः समस्ति ॥ १ ॥

सदापिनाकिश्रितपादभूमेः कैलाशकान्तेरिह वज्रसूरेः ।
सदोषधीभेदविभासमाना वज्राह्वया सन्ततिचूलिकाऽस्ति ॥ २ ॥

अस्ताघलक्ष्मीसुभगंभविष्णुः कलाविलासिद्विजपुण्डरीकः ।
श्रीराजगच्छः शुचिमानसश्रीस्तत्रास्ति गच्छः पृथिवीपवित्रः ॥ ३ ॥

पुंसां विग्रहजं विकारमखिलं निर्मूलमुन्मूलयं-
स्तत्राद्यः समभूद्भवामयभिषक् प्रद्युम्नसूरिर्गुरुः ।
येन स्वेदयता प्रयुज्य तरलां तर्कोज्ज्वलां भारतीं
वादीन्द्राः प्रविलापिनो घनतरं दर्पज्वरं त्याजिता ॥ ४ ॥

दिगम्बरसमाक्रान्तावेकपट्टं समाददे ।
यः प्रत्यक्षं नरेन्द्रस्य जगतस्तद्यशः पुनः ॥ ५ ॥

तर्कग्रन्थविचारदुर्गमवनीसंचारपंचानन-
स्तत्पट्टेऽभयदेवसूरिरजनि श्वेतांबरग्रामणीः ।
सद्वाक्यश्रुतिलालसा मधुकरी कोलाहलाशंकिनी
हित्वा विष्टरपंकजं श्रितवती ब्राह्मी यदीयाननम् ॥ ६ ॥

दृग्निम्नगाः सत्पथभेदमेता ध्रुवं करिष्यन्ति जडैः समेताः ।
इतीव रोधाय चकार तासां ग्रन्थं नवं वादमहार्णवं यः ॥ ७ ॥

विद्वन्मंडलमौलिमंडनमणिः प्रेंखत्तपोऽहर्म्मणि-
र्निर्ग्रंथोऽपि जिनेश्वरः समजनि श्रीमांस्ततः सद्गुरुः ।
यः स्फूर्जद्गुणपुंजमुंजजगतीजिष्णोः पुरः प्रज्ञिलान्
वादे वादिवरान् विजित्य विजयश्रीसंग्रहं संव्यधात् ॥ ८ ॥

तत्पट्टपूर्वपर्वतमण्डनमार्त्तण्डमण्डलश्रीकः ।
श्रीअजितसेनसूरिर्भूरितमस्तोमहृज्जातः ॥ ९ ॥

तर्कग्रन्थपथप्रथापृथुमतिः क्ष्मापीठवाचस्पतिः
सूरिर्भूरिनयस्ततः समजनि श्रीवर्द्धमानाह्वयः ।
आस्थाने विदुषां यदीयवचनैरुत्कंटके वादिभि-
र्लेशेनापि भियेव नाम न पदोल्लापप्रयासः कृतः ॥ १० ॥

श्रीसिद्धान्तव्यवहृतिपटुस्तत्पदाम्भोजभृंगः
सूरिः श्रीमानजनि जगतीमंडनं शीलभद्रः ।
अंगोद्धृत्या सकलसुमनःसाक्षिकं दीयमाना-
ऽप्यस्तव्याजं यदमलवचःसंपदाप प्रवृद्धिम् ॥ ११ ॥

अतुच्छराजगच्छश्रीसमुल्लासनलालसः ।
सूरिः कृपांबुधिरभूत्तत्पदे भरतेश्वरः ॥ १२ ॥

द्राक्षे ! ख्यापय शक्तिमात्मविभवं पीयूष ! पोषं नय
प्रख्याता भव सर्करे ! तव मधो ! माधुर्यमस्तु स्फुटम् ।

खर्जूर ! प्रभव प्रपंचय रसं सत्काव्य ! येनाधुना
न श्रोत्राणि पवित्रयन्ति कृतिनामस्मद्गुरूणां गिरः ॥ १३ ॥
तत्पट्टपूर्णकलशाः श्रीवैरस्वामिसूरयो गुरवः ।
विकिरन्तु दुरितनिकरं वितरन्तु समीहितां सिद्धिम् ॥ १४ ॥
ज्योतिःशास्त्रमहर्निशं गणयतां नैमित्तिकान् पृच्छतां
चर्चां शाकुनिकैः समं कलयतां क्लेशो भवेत् केवलः ।
पूज्यानां यदि नाममंत्रकलनामैत्रीपवित्रीकृता
नो मिथ्या शृणुताऽऽप्नुवन्ति परमां ते कार्यसिद्धिं जनाः ॥ १५ ॥
षट्तर्कीललनाविलासवसतिश्चंचत्तपोऽहर्पति-
स्तत्पट्टोदयचन्द्रमाः समजनि श्रीनेमिचन्द्रप्रभुः ।
निःसामान्यगुणैर्भुवि प्रसृमरैः प्रालेयशैलोज्ज्वलै-
र्यश्चक्रे कणभोजिनो मुनिपतेर्व्यर्थं मतं सर्वतः ॥ १६ ॥
यस्य श्रोत्रसुधाकिरः शुचिगिरः श्रीभारती शृण्वती
कामं कंपयति स्म विस्मयरसाकीर्णाऽपि न स्वं शिरः ।
मंदारप्रभृतिप्रभूतकुसुमस्रग्दामलीनालिनां
यद्वाणीश्रवणान्तरायजननः कोलाहलः खेलति ॥ १७ ॥
यत्र प्रातिभशालिनामपि नृणां संचारमातन्वतां
संदेहैः प्रतिभाकिरीटपटली सद्यः समुत्सार्यते ।
नीरंध्रं विषमप्रमेयविटपिव्रातावकीर्णे सदा
तस्मिंस्तर्कपथे यथेष्टगमना जज्ञे यदीया मतिः ॥ १८ ॥
शिष्यस्तस्य प्रशस्यः समजनि जगदानन्दकंदाम्बुदश्रीः
सूरिः श्रीसागरेन्दुर्वचनरसभरैर्यस्य सिक्तां जनौघः ।
रोमोद्भेदांकुराढ्यां शिरसि युतकरांभोजपत्रां प्रमोदा-
दस्रांभोबिंदुपुष्पां सुकृतफलवतीं कायवल्लीं बिभर्त्ति ॥ १९ ॥
निर्व्याजं घनदानयोग्यजडतावस्त्वन्विता मन्मति-
र्यत्पादप्रभवप्रसादविलसत्पद्याक्षरैः स्वीकृतैः ।

संदेहोल्वणशौल्किकैः प्रतिपदं वाधामनासादिता
ग्रन्थालीपथकान्तराणि परितः स्पष्टं समुल्लंघते ॥ २० ॥

गुरुप्रसादविगलज्जाडिमैकतमस्तमः ।
सूरिर्माणिक्यचंद्रोऽभूत्तत्पादाब्जमधुव्रतः ॥ २१ ॥

वंशः सत्त्वगुरुस्थितिः समहिमा सद्धर्मकर्मोदया-
दस्ति स्वस्तिनिवंधनं मतिमतां श्री**भिल्लमालाह्वयः** ।

आमूलं भुवनाद्भुतैकगुणभूः श्रीमेहिलस्यांगजो
वीरस्तत्र पवित्रवृत्तसदनं मुक्ताफलश्रीरभूत् ॥ २२ ॥

विमलमतिमृणालिनीमरालः सकलकलाकमलावलीविवस्वान् ।
निरुपममहिमाहिमावनीभृत् समजनि सूनुरमुष्य **वर्द्धमानः** ॥ २३ ॥

कुमारपालक्ष्मापाला**जयपाल**महीभुजोः ।
यः सभाभूषणं चित्रं जैनं मतमरोचयत् ॥ २४ ॥

त्रिभुवनपालः श्रीमान् **मल्हः** सच्चक्रनंदकः ।
प्रियसत्यः श्रीदेहड इत्याख्याः पुरुषोत्तमाः ॥ २५ ॥

सतीसीमंतमाणिक्यश्री**माढू**कुक्षिसंभवाः ।
सच्चरित्रास्त्रयः पुत्रास्तस्य शस्यधियोऽभवन् ॥ २६ ॥

प्रज्ञावता सत्कविपुंगवेन श्रीपल्हणेनाऽऽत्मसुतेन साकम् ।
माणिक्यसूरिं गुरुमन्यदेति श्रीदेहडोऽजल्पदनल्पभक्तिः ॥ २६ ॥

नीरागतानिधी **राजगच्छ**भूर्गुणवारिधिः ।
सूरिः **प्रद्युम्नसूर्याख्यः** पूर्वं वः पूर्वजोऽभवत् ॥ २७ ॥

सपादलक्षगोपाल**त्रिभुवनगिर्या**दिदेशगोपालान् ।
यश्चतुरधिकाशीत्या वादजयै रंजयामास ॥ २८ ॥

श्री**अभयदेवसूरि**स्तच्छिष्यस्तर्कभूरभूत् ।
भग्नासनाऽलितुमुलाद् गीर्यदास्यमशिश्रियत् ॥ २९ ॥

जडोल्लासेन सन्मार्गभेदिनी हृत्तरंगिणी ।
रोद्धुं चकार स नवं ग्रंथं **वादमहार्णवम्** ॥ ३० ॥

तदाम्नायजुषां युष्मादृशानामपि युज्यताम् ।
सद्ग्रंथकरणे स्फीतपरोपकरणे मतिः ॥ ३१ ॥

माणिक्यचंद्राचार्येण तस्येति प्रार्थनावशात् ।
श्री **पार्श्वनाथचरितं** वाचां पथि विपंचितम् ॥ ३२ ॥

गगनवसनमाशायंत्रगं शीतरोचिःसितक्रमिजगुलुंछादात्तरुक्तंतुजालैः ।
विरचयति विरिंचिर्यावदुल्लासितारांकुसुमकमिह शास्त्रं नंदतात्तावदेतत् ॥ ३३ ॥

तमो विघटयन्नलिप्रतिममम्बरारामतः सदा दिनमुखे निशाविकसदृक्षपुष्पोत्करम् ।
करैः किरणमालिकश्चुटति यावदुल्लासिभिर्मतं जिनपतेर्मतं जयतु तावदेतत्
क्षितौ ॥ ३४ ॥

श्रीसंघेन मयि क्रमांवुजरजःकल्पे पयःकल्पया
दृष्ट्यावाप इव प्रसादविटपी न्यस्तः परं पुष्यताम् ।
यस्माद्विश्वजनानुरागमहिमश्रीमंजरीसद्यशः-
पुष्पोल्लासि परोपकारकरणैश्वर्यं फलं चाप्यते ॥ ३५ ॥

रसर्षिरवि १२७६ संख्यायां समायां दीपपर्वणि ।
समर्थितमिदं वेलाकूले श्रीवटकूपके ॥ ३६ ॥ छ ॥ ग्रन्थाग्रं ५२७८ ॥
अष्टसप्तत्यधिकशतद्वयोपेतपंचसहस्राः ॥ छ ॥ मंगलमस्तु लेखकपाठकयोः ॥ छ ॥

॥ ॐ नमः श्रीपार्श्वनाथाय ॥

यत्राऽनेकवुधा अनेककवयो धिष्ण्यानि भूयांस्यलं
चन्द्रस्योपचयः कलंकविकलः संजायते सर्वदा ।
वक्रः कोऽपि न दृश्यते न च गुरुर्मित्रोदये निष्प्रभः
पल्लीपालजनान्वयो नवनभोलक्ष्मीं दधानोऽस्ति सः ॥ १ ॥

तत्रोल्लासितलोकभूरिकमलः श्लिष्यत्प्रतापाकृती
राज्ञो मंडलवृद्धिकारणतया प्रीतिं समुत्पादयन् ।
दोषातिक्रमजातकान्तिसुभगो विभ्रत्सुवृत्तां तनुं
मार्त्तंडो जसदृर्धनी समभवन्नंदाणिपूर्मंडनम् ॥ २ ॥

तद्भार्या योषितां वर्या परिचर्यापरायणा ।
जिनेशचरणद्वन्द्वे शोभना **शोभना**ऽजनि ॥ ३ ॥

महाव्रतानीव सुताः स्युस्ताभ्यां पंच विश्रुताः ।
गुप्तित्रयमिवानिंद्यं पुत्रीत्रयं च जज्ञिरे ॥ ४ ॥

तेषां च ज्येष्ठः किल **पूर्णचन्द्रो** धर्मानुरक्तो **यशश्चन्द्रनामा** ।
औचित्यचर्याचतुरस्त्व**आभडो नाहडजाल्हणश्च** तथा परे ॥ ५ ॥

शीलमती च **सहजू रत्नी** च श्रावकव्रतम् ।
श्री**यशोभद्र**सूरीणां चरणांते प्रपेदिरे ॥ ६ ॥

केल्हणाल्हणरत्नाश्च राजपालश्चतुर्थकः ।
पूर्णस्यागण्यपुण्यस्य तनयाः सुनया अमी ॥ ७ ॥

केल्हणाल्हणरत्नानां सुताः संति यथाक्रमम् ।
अजयोऽथारिसिंहश्च गुरुदेवार्चने रतो ॥ ८ ॥

सुगणः सुवर्णशाली विश्राणो नैव गुरुगणाक्रमणम् ।
सुकवेः श्लोक इव स्तनंधयस्तिहुणपालोऽभूत् ॥ ९ ॥

यशश्चन्द्राज्जगद्देवोऽभूत्ततोऽपि **वरदेवः** ।
आभडः श्रीमानतुंगचरणांभोजषट्पदः ॥ १० ॥

आभडस्य सुता एतेऽभयश्रीकुक्षिसंभवाः ।
पांडवा इव विख्याताश्चित्रं कौरवसंगताः ॥ ११ ॥

प्रथमः **पद्मसिंहाख्यो वीरचंद्रो** द्वितीयकः ।
आसलो मूलदेवश्च **देदल**श्चाथ पंचमः ॥ १२ ॥

चतुरश्चतुरो बिभ्रत् पुरुषार्थान् नयानिव ।
बभूव **नाहड**स्तुर्यो **नाउका** तस्य गेहिनी ॥ १३ ॥

मुक्तिमार्गा इव श्लाघ्या जज्ञिरे नंदनास्तयोः ।
त्रयोऽपि विशदाचाराः पितुराज्ञाविधायिनः ॥ १४ ॥

आद्यस्तेषां तु **शोभाख्यः** पुत्रत्रयविराजितः ।
— —आसडनामा स्तत्रकीदृशः ॥ १५ ॥

स्फटिकनिर्मले यस्य मानसे सद्गुणांबुजे ।
राजहंसा इवाजस्रं वसंति परमेष्ठिनः ॥ १६ ॥

जिनसमयसुधाजलधौ सततं श्रुतदेवतेव रममाणा ।
आसमतीत्यभिधाना दयिता तस्यास्ति शीलवती ॥ १७ ॥

जनकोऽजायत तस्या   धीमान् ।
यशोमतीति च माता विजू इत्यस्त्यपराभिधा ॥ १८ ॥

अभूच्च पार्श्ववीराख्यस्तनुजो धर्मवत्सलः ।
द्वितीयस्तु पार्श्वचन्द्रः स्वकुलाम्भोधिचन्द्रमाः ॥ १९ ॥

विनीता शीलसंपन्ना धर्मवेत्ता प्रियंवदा ।
मोही खेतू जयतुका च पुत्र्यस्ताभ्यामनिंदिता ॥ २० ॥

.... ।
.... ॥ २१ ॥

अथैकदा गुणाढ्यानां गुरूणां धर्मदेशनाम् ।
शुश्राव जनन्या सार्द्धं ज्ञानदानप्रकाशिकाम् ॥ २२ ॥

पार्श्ववीरस्तु चरितं लेखयामास पुस्तके ।
स्वपित्रोः श्रेयसे नव्यं सुकृती मंगलप्रदम् ॥ २३ ॥

श्रीपार्श्वनाथचरितं पार्श्ववीरेण धीमता ।
श्रीधर्मघोषसूरीणां दत्तं व्यालेख्य सद्भक्त्या ॥ २४ ॥

तथा च—

दिक्सोपानयुते द्युपल्वलतटे लोकांतपालावृते
तारापद्मचयेऽत्रिनेत्रजनकस्थानस्थलीराजिते ।
यावद् व्योमनि   द्युतिजलं प्रोदंचति स्वेच्छया
तावन्नंदतु पुस्तिकोऽयमनघः पापठ्य........ ॥ २५ ॥

श्रीपार्श्वनाथचरितं श्रीधर्मघोषसूरयः श्रीपार्श्ववीरश्च चिरं नंदताम् । शुभं संघस्य ॥ छ ॥

*

No. 208 : Amamaswāmicaritramahākāvya—Padya

अममस्वामिचरित्रमहाकाव्य—पद्य

Folios – 282
Language – Sanskrit
Author – Muniratnasūri

Extent – Granthas 10,000
Size – 27·2 × 2·5 inches
Condition – Good

Age of MS. – c. Latter half of 13th cent. V.S. Date of Composition – 1252 V.S.
General Remarks – First two folios and last three folios are torn on one side.

आदिः—

॥ अर्हं ॥ भव्यांबुजन्मनां गोभिर्बोधलक्ष्मीप्रदाः सदा ।
सर्वक्षेत्रेषु युगपज्जिनादित्याः पुनंतु वः ॥ १ ॥

सुखयतु स जिनो यदंसदेशद्वयवसतिः पृथुसंहतिर्जटानाम् ।
मृगमदलिखितेव पत्रलेखाविरतिव विरेजे ॥ २ ॥

श्रीशांतये नमस्तस्मै राज्यवत् संयमेऽपि यम् ।
सुवर्णवारिजव्याजादन्वयुर्निधयो नव ॥ ३ ॥

सदानवानंदकरः शंखचक्रांकितक्रमः ।
देयादिष्टां श्रियं नेमिर्नवीनः पुरुषोत्तमः ॥ ४ ॥

श्रीपार्श्वः स जिनो जीयाद्यस्य दैत्यजयोत्सवे ।
चित्रं जैत्रं फणच्छत्रं फणींद्रः स्वयमुद्दधे ॥ ५ ॥

अंतर्वैरिवारवीरः स श्रीवीरजिनः श्रिये ।
यत्सिंहनादः प्रत्यूहव्यूहाभिद्वल्गु वल्गति ॥ ६ ॥

श्रीसद्म पद्मनाभस्य पादपद्मद्वयं स्तुमः ।
यद्यावन्नीयते चित्रमिंद्रैर्मूर्द्धावतंसताम् ॥ ७ ॥

द्वादशोऽतिद्वादशार्कतेजास्तेजांसि वः सदा ।
तन्यादन्यातिशायीति सममोऽप्यममो जिनः ॥ ८ ॥

मुनींद्रवंदनानत्याप्यार्जितात्युन्नतश्रिये ।
ए........कृते श्रीमदममस्वामिने नमः ॥ ९ ॥

जयति नवकेतकोदरदलावदातद्युतिर्गिरांदेवी ।
कविहृदयवार्द्धिसंवासलग्नघनफेनपटलेव ॥ १० ॥

श्रीजिनालंकृतः शश्वत्सारसारस्वतप्रसूः ।
जीयाद्गिरींद्रैरक्षोभ्यो नवः सिद्धांतवारिधिः ॥ ११ ॥

श्रीगुरुभ्योनमस्तेभ्यो येभ्यो विद्याश्चतुर्दश ।
अमंदरागैर्म प्यंते रत्नवत् सदा ॥ १२ ॥

स्तौमि श्रीगौतमादींस्तानेकादश महाकवीन् ।
यैरपूरि द्वादशांगैः समस्या त्रिपदी गुरोः ॥ १३ ॥

शय्यंभवोऽस्तु वो भूत्यै चक्रे सर्वांगमूर्तिभृत् ।
येन दुःप्रसभाचार्यकालिकं दशकालिकम् ॥ १४ ॥

श्रीभद्रबाहुर्वः प्रीत्यै सूरिः शौरिरिवास्तु सः ।
यस्माद्दशानां जन्माऽऽसीन्निर्युक्ती नाम्न............ ॥ १५ ॥

वाक्यैर्विशेषातिशयैर्विश्वसंदेहहारिभिः ।
जिनमुद्रं जिनभद्रं, किं क्षमाश्रमणं स्तुवे ॥ १६ ॥

उमास्वातेर्वाचकस्य वाचः कस्य न चेतसि ।
ध्वनंत्यद्यापि घंटावत्तारटंकारसुंदराः ॥ १७ ॥

उदितोऽर्हन्मतव्योम्नि सिद्धसेनदिवाकरः ।
चित्रं गोभिः क्षितौ जह्रे कविराजबुधप्रभाः ॥ १८ ॥

स्तौमि श्रीहरिभद्रं ईद्धीर्महत्तरा ।
चतुर्दशप्रकरणशत्याऽगोप्यत मातृवत् ॥ १९ ॥

व्योम्नश्च भद्रकीर्त्तेश्च प्रेंखत्तारागणस्य कः ।
बहुधामराजमित्राराद्धस्यावैतु वैभवम् ॥ २० ॥

अद्याप्युपमितिग्रंथच्छलाद्यज्जयडिंडिमः ।
विश्वे ध्वनत्यसौ जीयात् सिद्धर्षिः कविकुंजरः ॥ २१ ॥

पालित्तसूरिः स श्रीमान् अपूर्वः श्रुतसागरः ।
यस्मात्तरंगवत्याख्यकथाश्रोतो विनिर्ययौ ॥ २२ ॥

मानतुंग-देवभद्रसूरी स्तुत्यौ मरालवत् ।
ऊषतुर्मानसे यौ श्रीशातवाहन-भोजयोः ॥ २३ ॥

गुरुर्गूर्जरराजस्य चातुर्विद्यैकसृष्टिकृत् ।
त्रिषष्टिनरसद्वृत्तकविर्वाचां न गोचरः ॥ २४ ॥

गोभिर्दर्शनशुद्धिं योऽकषायस्वादुभिर्व्यधात् ।
सोऽपूर्वाभ्युदयः श्रीमान्नंद्याच्चन्द्रप्र[भः प्रभुः] ॥ २५ ॥

चैत्रवद् धनपालो न कस्य राजप्रियः प्रियः ।
सत्कर्णाभरणी यस्माज्जज्ञे तिलकमंजरी ॥ २६ ॥

जयंतु सूरयोऽन्येऽपि येषां वाग्ब्रह्मवैभवम् ।
ग्रंथसृष्टौ महाकाव्यसर्गेषु च नवं नवम् ॥ २७ ॥

वंद्यास्ते रामवत् संतो यैर्व्यस्तपरदूषणैः ।
क्रियते विबुधैः सेव्या निष्कलंका कृतिः कवेः ॥ २८ ॥

नरोत्तमः स वैकुंठः — — रातिश्च शंकरः ।
धाता पद्मासनस्तत्स्मात् समानः केन सज्जनः ॥ २९ ॥

वृत्तरम्येण पीयूषवर्षिणा सत्कलावता ।
नेंदुनाऽपि समः साधुः कालकूटसजन्मना ॥ ३० ॥

अनेकपस्य भद्रस्य गर्जतश्च स्थिरैः पदैः ।
साधोः कुर्यात् सुवंशस्य किं श्वेव पिशुनो भषन् ॥ ३१ ॥

अन्तः—

ख्यातस्याममसंज्ञया जिनभवे कृष्णस्य तद्वप्तुर-
प्येतन्मूलहरेः कुलस्य च कथां ग्रंथस्य लक्षेण याम् ।
ग्रथ्नाति स्म स भद्रबाहुगणभृन्माति स्म साब्धेः समा
यत्रावीव कृतौ ममेह महिमा श्रीपार्श्वनाथस्य सः ॥ ३८ ॥

उत्प्रेंखन्नखरत्नदीपमसितप्रौढांशुदूर्वांकुरं
नम्राखंडलमौलिमौक्तिकरुचि श्रीखंडपिंडस्थिति ।
श्रीर्नीराजनभाजनं क्रमयुगं चंचत्कटाक्षाऽक्षतं
श्रीपार्श्वस्य दधत्यनर्गलमलं पुष्णातु वो मंगलम् ॥ ३९ ॥

अममचरिते भाविन्येवं तयोः सहजन्मनो-
र्जिननृपतया षष्ठो भावी भवः शिवशर्मवान् ।
तदनुचरयोः सीरिश्रीशार्ङ्गिणो— — —भवः
किमपि कथितः स्वाहा श्रोत्रद्वयाय मया सताम् ॥ ४० ॥

इत्याचार्यश्रीमुनिरत्नविरचिते महाकाव्ये श्रीअममस्वामिचरिते भाविश्रीअममस्वामि-संघादिसंख्यानिर्वाणमहोत्सवतद्भ्रातृबलदेवजीवनिर्वाणतत्समयभाविविष्णुबलदेवस्वरूपवर्णनो

विंशः सर्गः ॥ छ ॥ संपूर्णं चेदं श्रीअममस्वामिचरितं महाकाव्यम् ॥ ग्रंथाग्रं १५१ ॥

अपूर्वा यस्य पूर्वेयं चतुर्वर्णमनोहरा ।
चकास्ति क्ष्माशिलापट्टे श्रीवीरः सोऽस्तु वः श्रिये ॥ १ ॥

जयतात्तत्पंचमगणनायकसंताननंदनप्रभवात् ।
कोटिकगणकल्पद्रोः प्रसृता श्रीवज्रमुनिशाखा ॥ २ ॥

अतुच्छः पुष्पगुच्छश्रीश्चंद्रगच्छस्तदुद्भवः ।
नंद्यात् सौरभ्यसंलुभ्यत्साधुरोलंबचुं– – ॥ ३ ॥

श्रीमांश्चंद्रप्रभः सूरिस्तस्माद्वार्धेरिवोदगात् ।
चक्रे कलाभिर्यः पूर्णः पूर्णिमां प्रकटां जनः(ने) ॥ ४ ॥

सूरिः श्रीधर्मघोषोऽभूत्तत्पट्टे देवताकृतिः ।
सिद्धराजस्तुतः कर्त्ता स्वमूर्त्तेः सूरिविंशतेः ॥ ५ ॥

निष्ठामतीतविषयामपि वर्त्तमाने व्युत्पादयन् विरचयन् गुणवत्सु वृद्धिम् ।
सूत्रार्थयुक्तिकलनासुविशुद्धबुद्धिर्यः शब्दसिद्धिमक – – – – – –कारम् ॥६॥

तेन स्वगच्छे प्राधान्यं दत्त्वाचार्यपदे स्वयम् ।
प्रतिष्ठितः श्रीसमुद्रघोषसूरिरजायत ॥ ७ ॥

यो मालवोपात्तविशिष्टतर्कविद्योऽनवद्योपशमप्रधानः ।
विद्वज्जनालिश्रितपादपद्मः केषां न विद्यागुरुतामधत्त ॥ ८ ॥

धारायां नरवर्मदेवनृपतिं श्रीगोह्रदक्ष्मापतिं
श्रीमत्सिद्धपतिं च गूर्जरपुरे विद्वज्जने साक्षिणि ।
स्वैर्यो रंजयति स्म सद्गुणगणैर्विद्यानवद्याशयो
लब्धीः प्राक्तनगौतमादिगणभृत्संवादिनीर्धारयन् ॥ ९ ॥

मुख्यस्तदीयशिष्येषु कवींद्रेषु बुधेषु च ।
सूरिः सूरप्रभः श्रीमानवंतीख्यातसद्गुणः ॥ १० ॥

दुर्वादिकैरवकुले ददताऽस्य मुद्रामन्वर्थतां गमयता निजमत्र नाम ।
गोभिर्न भव्यकमलाकर एव बोधं सच्चक्रपर्षदपि हर्षमलंभि येन ॥ ११ ॥

अथापरः श्री**मुनिरत्नसूरि**नामा निकामाद्भुतमूर्त्तिकीर्त्तिः ।
कैः पौनरुक्त्येन न यद्गुणौघः श्लाघाचलन्मौलिभिरभ्यवर्णि ॥ १२ ॥

सिद्धांतसाहित्यपदप्रमाणस्कंधत्रयज्योतिपशास्त्ररूपान् ।
सप्तापि वार्द्धीन् भजतो यदीये स्पर्द्धानुबंधादिव बुद्धिकीर्त्ती ॥ १३ ॥

तार्त्तीयिकः श्री**तिलकचंद्र**सूरिरजायत ।
सूरिस्तिलकयामास नभोयुद्बुद्धिनिर्जितः ॥ १४ ॥

पट्टे स्वे **जिनसिंहसूरि**सुगुरुं **सूरप्रभ**स्य प्रभोः
पट्टे किं च **जिनेश्वरा**भिधगुरुं संस्थाप्य मध्ये तयोः ।
आसीनो **मुनिरत्नसूरि**गणभृद्रेजे जगन्नंदिनो-
मेरुः सूर्यशशांकयोरिव लसज्जात्याश्रयोर्वा रथः ॥ १५ ॥

इतश्च—

वाराहीं नगरीं तनूमिव शुचिर्मुक्तोपमो भूपयन्
श्री**श्रीमालकुले यशोधवल** इत्यासीत् स कोशाधिपः ।
निश्छिद्रोऽपि गुणान्वितस्ततलसत्तेजाः सुवृत्ताग्रणी-
र्य**श्चौलुक्यपुर**श्रियो विहितवान् सीमंतशृंगारणम् ॥ १६ ॥

तत्सूनुर्द्धिषणानिरस्तधिषणारंभोऽस्ति दंभोज्झित-
स्त्रैविद्यो विदुषां स्थितो धुरि **जगद्देवो** नृदेवार्चितः ।
बालत्वे स्वकवित्वरंजितहृदः श्री**हेमसूरे**र्मुखा-
द्वैतीयीकमवाप बालकविरित्युद्दामसन्नाम यः ॥ १७ ॥

प्राक् चक्रे किल **धर्मघोष**गणभृद्यान् षोडश श्रावकान्
गच्छे स्वे व्रतिनां जिनागमविधिं व्यालुंपतां शासकान् ।
धर्मस्थायविशारदो नयपटुर्विद्याब्धिपारंगम-
स्तेष्वप्येष ययावशेषविबुधानुल्लंघ्य वाग्मुख्यताम् ॥ १८ ॥

यत्प्रश्नाशंकया शंके सरस्वत्यपि पुस्तकम् ।
हस्ते यत् सर्वदा धत्ते तत् सूरीणां कथैव का ॥ १९ ॥

आचार्याः कति नाम नामरगुरुस्पर्द्धिष्णवः प्रज्ञया
विद्यंते प्रभु**धर्मघोषगणभृ**द्गच्छे गुणैरुल्वणैः ।

किंतु श्रीमुनिरत्नसूरिसुगुरोर्वृत्तैरुदाचैर्द्विधा
चेतः केतकसौरभैर्भ्रमरवद्यस्याध्यवास्यद्भुतम् ॥ २० ॥

श्रीरुद्रस्य कुमारभूपतिमहामौहूर्तिकस्यात्मजो
मंत्री निर्नय इत्युदात्तचरितो विप्रोऽपि सुश्राद्धवत् ।

प्रकटितसकलांगो मोहसैन्याप्रधृष्यो विबुधपतिनिषेव्यः श्रीमदानंदसूरिः ॥७॥

समुन्नत्याधारः स्वरगतलसल्लक्षणधरः
श्रुतिश्रेयानंशिर्दधदपरचिह्नानि नितराम् ।
विनिर्यत्सद्धेतौ सुविषममहावादिसमरे
स्फुरत्तेजोदृप्यत्तरलनयनोऽश्वश्च निरगात् ॥ ८ ॥

श्रीनेमिचन्द्रसूरिः यः कर्त्ता प्रस्तुतप्रकरणस्य ।
सर्वज्ञागमपरमार्थवेदिनामग्रणीः कृतिनाम् ॥ ९ ॥

अन्यां च सुखावगमां यः कृतवानुत्तराध्ययनवृत्तिम् ।
लघुवीरचरितमथ रत्नचूडचरितं च चतुरमतिः ॥ १० ॥

शश्वत्पंडितमंडलीकुमुदिनीकांताप्रमोदावहः
सर्वज्ञागमदेशनामृतकरैर्निर्वापयन् मेदिनीम् ।
भास्वत्सन्मुनितारकेषु नियतं सन्नायकत्वं दधत्
स श्रीमानुदियाय यो निजकुलव्योमांगणालंकृतिः ॥ ११ ॥

सूरिः श्रीजिनचंद्रश्चन्द्रो निःशेषजनमनोदयितः ।
सौम्यत्वकलावित्त्वप्रभृतिगुणानां स्वकुलभवनम् ॥ १२ ॥

तच्छिष्यः प्रथमपदे श्रीपदवानाम्रदेवसूरिरभूत् ।
अपरोऽपि तत्कनिष्ठः श्रीमान् श्रीचंद्रसूरिरभूत ॥ १३ ॥

इतश्च—

यो मेदपाटाध्युषितोऽपि धीमान् दयाधनो धार्मिकमध्यवर्त्ती ।
सत्साधुताधर्मकृताभिलाषः सुश्रावकत्वं परिपाति सम्यक् ॥ १४ ।

मारावल्ल्या अल्लकश्रेष्ठिवर्यो मुक्त्वा स्वीयं धाम हेतोः कुतश्चित् ।
आयातोऽसावर्बुदाधःप्रदेशे तत्राप्यासीत् स्वैर्गुणैः सुप्रसिद्धः ॥ १५ ॥

किंच—

कासहृद्धाम्नि निजं धर्म्यं धाम प्रवर्त्तितं येन ।
पोषधशाला सच्छ्रावकादिधर्मार्थमत्यर्थम् ॥ १६ ॥

आजन्माऽपि जिनेश्वरस्य सदने बिंबे जिनाभ्यर्च्चने
तीर्थानामभिवंदने जिनमतव्यालेखनेऽलंकृतौ ।
श्रीमत्सूरि-महत्तरापद-जनप्रव्राजनादौ शुभं
धर्मार्थं व्ययतो धनं सफलतां यस्यागमद्धीमतः ॥ १७ ॥

स **सिद्धनागः** .... सुलब्धजन्मा सदाकृतिर्धर्मविशुद्धकर्मा ।
पुत्रोऽभवत्तस्य जनप्रसिद्धः पुण्यानुभावाच्च सदा समृद्धः ॥ १८ ॥

तस्मादपि दौस्थित्यात् कुतोऽपि **धवलक्कके** समायातः ।
श्रेष्ठी स **सिद्ध**नामा तत्रापि जने गुणैः प्रथितः ॥ १९ ॥

अन्यच्च येन कारितमतिरम्यं भव्यजनमनोहारि ।
सीमंधरजिनबिंबं रमणीये **मोढचैत्यगृहे** ॥ २० ॥

त्यागी भोगी देवगुर्वादिभक्तो जैने धर्मे प्रेमरागानुरक्तः ।
वार्द्धक्येऽभूदेक **उद्योतना**ह्वः पुत्रस्तस्य त्यक्तदुष्टद्विजिह्वः ॥ २१ ॥

श्रीनेमिचंद्रसूरेर्वाक्यात्तदनु स्वशिष्यभणनाच्च ।
उद्योतनसच्छ्रावकविशेषसद्भक्तिवचनाच्च ।
तत्रैव **बृहद्गच्छे** रत्नाकरसन्निभे प्रसूतेन ।
प्राकृतमणिकल्पेन श्रुतगुरुबहुमानसहितेन ॥ २३ ॥
श्रीपदसंगतनाम्ना श्रीमज्जिनचंद्रसूरिशिष्येण ।
रचिताऽऽम्रदेवमुनिपेन वृत्तिरेषा स्वबोधेन ॥ २४ ॥

व्याख्याप्रज्ञप्ताविव लब्धवरायामिहापि सद्वृत्तौ ।
श्रुतिसुखदवर्णरुचिरा विचित्रगमभंगरमणीयाः ॥ २५ ॥
सुव्यक्तमेकचत्वारिंशदनूना भवेयुरधिकाराः ।
तत्र सतानी च विचारश्रुता अभ्यवृत्ताश्च(?) ॥ २६ ॥

सत्स्वपि नानारूपेषु पूर्वकविभिर्विशिष्टमतिविभवैः ।
रचितेषु शास्त्रविवरणकथाप्रबंधेषु सरसेषु ॥ २७ ॥

कीदृगिदं मत्काव्यं तदापि ग्राह्यं कृतप्रचुरकरणैः ।
मयि वल्लभमाध्यस्थ्ये माध्यस्थ्यगुणान्वितैः सद्भिः ॥ २८ ॥

छंदोलक्षणविकलं समयोत्तीर्णं च यत् किमपि लिखितम् ।
तच्छोध्यं विद्वद्भिः कृतांजलिः प्रार्थये भवतः ॥ २९ ॥

अन्यच्च **नेमिचंद्रा गुणाकराः पार्श्वदेव**नामानः ।
एते त्रयोऽपि गणयो विपश्चितो मुख्यानिजशिष्याः ॥ ३० ॥

साहाय्यं कृतवंतो मम लेखनशोधनादिकृत्येषु ।
आधानोद्धरणे च प्रमादविकलाः कलाकुशलाः ॥ ३१ ॥

नवत्या युक्तेषु प्रथितयशसो विक्रमनृपा-
च्छतेषु क्रांतेषु त्रिनयनसमानेषु शरदाम् ११९० ।
अजय्ये सौराज्ये जयति **जयसिंहस्य** नृपते-
रियं स्थानीयेऽगाद्धवलकपुरे सिद्धिपदवीम् ॥ ३२ ॥

श्रेष्ठियशोनागस्याऽऽरब्धा वसतावबस्थितैः सद्भिः ।
वसतां सम्यगवसिता वसतावच्छुप्तसत्कायाम् ॥ ३३ ॥

भुवनानीव चतुर्दश धातुर्मम रम्यवर्णपदभाजि ।
अक्षरगणनाद् ग्रंथो जातोऽनुष्टुप्सहस्राणि ॥ ३४ ॥

मानसगर्भे स्थित्वा लक्षणयुगयं सपादनवमासैः ।
आख्यानकमणिकोशः सुत इव समपादि सद्वृत्तिः ॥ ३५ ॥

यावच्चंद्रश्च सूर्यश्च यावन्मेरुर्महीतलम् ।
स्वर्गापवर्गवत्तावन्नंद्यादेषाऽपि मत्कृतिः ॥ ३६ ॥ ग्रंथाग्रं १४००० ॥छ॥

इति श्रीमद्रामदेवसूरिविरचितवृत्ताख्यानकमणिकोशवृत्तिः समाप्तेति ॥ छ ॥ मंगलं महाश्रीः ॥ छ ॥

शिवमस्तु सर्वजगतः परहितनिरता भवंतु भूतगणाः ।
दोषाः प्रयांतु नाशं सर्वत्र सुखी भवतु लोकः ॥ छ ॥

प्राग्वाटवंशतिलकोऽजनि पूर्णदेवस्तस्यात्मजास्त्रय इह प्रथिता बभूवुः ।
दुर्वारमारकरिकुंभविभेदसिंहस्तत्रादिमः **सलखणो**ऽभिधया बभूव ॥ १ ॥

द्वितीयकोऽभूद् **वरदेव**नामा तृतीयकोऽभूज्जिनदेवसंज्ञः ।
सोऽन्येद्युरादत्त जिनेन्द्रदीक्षां निर्वाणसौख्याय मनीषिमुख्यः ॥ २ ॥

अज्ञानध्वांतसूर्यः सरभसविलसच्चंगसंवेगरंग-
क्षोणी क्रोधादियोधप्रतिहतिसुभठो ज्ञातनिःशेषशास्त्रः ।
निर्वेदांभोधिमग्नो भविककुवलयोद्बोधनाधानचंद्रः
कालेनाऽऽचार्यवर्यः स समजनि **जगच्चंद्र** इत्याख्यया हि ॥ ३ ॥

वरदेवस्य संजज्ञे **वाल्हेवि**रिति गेहिनी ।
याऽभूत् सदा जिनेंद्रांह्रिकमलासेवनेऽलिनी ॥ ४ ॥

पुत्रास्तयोः **साढलनामधेया-ऽरिसिंहइत्याह्वयवजसिंहाः** ।
विवेकपात्री **सहजू** च पुत्री कुशीलसंसर्गतरोर्लवित्री ॥ ५ ॥

साढलस्य प्रिया जज्ञे **राणू**रिति महासती ।
पुत्रास्तु पंच तत्राद्यो **धीणा**ख्यः शुद्धधर्मधीः ॥ ६ ॥

द्वितीयः **क्षेमसिंहा**ख्यो **भीमसिंह**स्तृतीयकः ।
देवसिंहाभिधस्तुर्यो लघुर्**महणसिंहकः** ॥ ७ ॥

क्षेमसिंहाभिधो **देवसिंह**श्च भवभीरुकः ।
श्रीजगच्चंद्रसूरीणां पार्श्वे व्रतमशिश्रियत् ॥ ८ ॥

धीणाकस्य कडूर्नाम पत्नी **मोढा**भिधः सुतः ।
अन्येद्युः सुगुरोर्वाक्यं **धीणाकः** श्रुतवानिति ॥ ९ ॥

भोगास्तुंगतरंगभंगभिदुराः संध्याभ्ररागभ्रमो-
पम्या श्रीर्नलिनीदलस्थितपयोलोलं खलु प्राणितम् ।
तारुण्यं तरुणीकटाक्षतरलं प्रेमा तडित्सन्निभो
ज्ञात्वैवं क्षणिकं समं विदधतां धर्मं जनाः ! सुस्थिरम् ॥ १० ॥

सज्ज्ञानयुक्तो नियतनृपोऽपि भवेन्महानंदपदप्रदायी ।
तत्रापि च स्वाऽन्यविबोधकारीत्याहुः श्रुतज्ञानमिहोत्तमं हि ॥ ११ ॥

तच्च कालमतिमांद्यदोषतः पुस्तकेषु भुवनैकवत्सलैः ।
पूर्वसूरिभिरथो निवेशितं तद् वरं भवति तस्य लेखनम् ॥ १२ ॥
एवं निशम्य तेन न्यायोपार्जितधनेन धन्येन ।
आख्यानकमणिकोशस्य पुस्तकोऽयं व्यधायि मुदा ॥ १३ ॥
यावद्दारुणदुःखलक्षजलदप्रध्वंसचंडानिलो
रागद्वेषमदांधसिंधुरहरिः स्वर्गापवर्गप्रद्रः ।
अज्ञानद्रुमपावको विजयते श्रीजैनराजागम-
स्तावन्नंदतु पुस्तकोऽयमनिशं वावच्यमानो बुधैः ॥ १४ ॥

मंगलं महाश्रीः ॥ छ ॥

*

No. 234 : <u>Upadeśamālākathākośa</u>

उपदेशमालाकथाकोश

Folios – 152
Language – Prakrit
Author – Jinabhadrasūri
Age of MS. – c. Latter half of 13th cent. V. S.

Extent – Gāthās 2890 ; Granthas 3613
Size – 12.5 × 2.5 inches
Condition – Fair
Date of Composition – 1232 V.S.

General Remarks – Folios 2, 9-16, 22, 25, 31, 37, 38, a piece of 39, 54, 60, a piece of 62, 63, 65, a piece of 66, 67, 68, a piece of 69, 74-77, 79, 81, 94, 125, 130, a piece of 132 are missing. Thus in all 35 folios are missing—of which pieces of 5 folios are preserved.

आदिः—

अरहंतमरिहमरुहं पणमिय सिरिवीरवद्धमाणजिणं ।
संखेवेणं वुच्छं कहाउ उवएसमालाए ॥ १ ॥

अन्तः—

जमालिकथा ॥ छ ॥

नीसेसभुवणपंडियसिरोमणी जयउ धम्मदासगणी ।
उवएसमालकारी सिस्सो सिरिवीरनाहस्स ॥ १ ॥
उवमिइभवप्पवंचाकहा कया जेण निरुवमा लोए ।
विवरणकारस्स सया तस्स नमो सिद्धसूरिस्स ॥ २ ॥
सुगुरुगुणरयणसायरसिरि........गसूरिसिस्साणं ।
सुयचरणपवरसिरिसालिभद्दसूरीण सिस्सेहिं ॥ ३ ॥

सिरिजिणभद्दमुणिंदेहिं सुहयरो विवरणाणुसारेणं ।
उवएसमालपगरणकहासमासो कओ एस ॥ ४ ॥

वत्तीसाहियवारसवरिससएसुं १२३२ गएसु विक्कमओ ।
निप्फन्नो सुच..............य आणंदगणिस्स साहिज्जा ॥ ५ ॥

गाहाण दो सहस्सा इह अट्ठ सयाणि नवइसहियाणि ।
तिन्नि सहस्सा छ सया तेरसअहिया सिलोगाणं ॥ ६ ॥

एयं पढंति अभिओगजुया गुणंति जाणंति जे उवइसंति परेसि सम्मं ।
जे वा सुणंति हिययंमि विभावयंति तेसिं हविज्ज अभिवंछियधम्मसिद्धी ॥७॥

मंगलं महाश्रीः ॥

दुव्वारमोहतिमिरप्पसरं हरंतो, सूरु व्व विप्फुरइ जाव जयंतरिक्खे ।
धम्मो जिणिंदभणिओ गयसव्वदोसो, कोसो कहाणमिह नंदउ ताव एसो ॥८॥

*

No. 235 : Pañcamīkathāsaṅgraha — पंचमीकथासंग्रह

Folios – 144
Language – Prakrit
Author – Maheśvarasūri
Age of MS. – 1214 V. S.
Extent – Gāthās 2000
Size – 15.7 × 2 inches
Condition – Good

आदिः—

॥ ॐ नमो वीतरागाय ॥

पंचिंदियनिरवेक्खं पंचनमोक्कारहेउयं तह य ।
पंचमगइसाहणयं पंचमनाणं नमंसेउं ॥

दुविहाए पंचमीए कालं पुरिसं विहाणगहणं च ।
पंचमितवफलभावं गाहाहिं महेसरो भणइ ॥

सक्कयकव्वस्सऽत्थं जेण न जाणंति मंदवुद्धीया ।
सव्वाण वि सुहवोहं तेणेयं पाइयं रइयं ॥

अंतः—

दोपक्खुज्जोयकरो दोसासंगेण वज्जिओ अमओ ।
सिरिसज्जणउज्झाओ अउव्वचंदो व्व अक्कत्थो ॥

सीसेण तस्स कहिया दस वि कहाणा इमे उ पंचमिए ।
सूरिमहेसरएणं भवियाणं बोहणट्ठाए ॥

सद्दगयं अत्थगयं जं किं पि वि दूसणं मए रइयं ।
तं सव्वं विउसेहिं खमियव्वं सोहियव्वं च ॥

विरयंतेणं एयं जं कम्मं अज्जियं मए सुहयं ।
तेण जणो मलरहिओ सव्वो वि महेसरो होउ ॥

मिलियाणं च दसाण वि एत्थ कहाणाण होइ विन्नेयं ।
गाहाणं माणेणं दोण्णि सहस्साइं गंथग्गं २००० ॥ छं ॥

इति महेश्वरसूरिविरचितं पंचमीफलमाहात्म्यसंसूचकं भविष्यदत्ताख्यानकं समाप्तम् ॥ छ ॥

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ छ ॥

मंगलं महाश्रीः ॥ संवत् १२१४ वर्षे मार्ग० शुदि ५ शुक्रे ॥ छ ॥

*

No. 236 : Nāgakumāracaritra–Pañcamīmāhātmya Padya of Five Sargas

नागकुमारचरित्र—पंचमीमाहात्म्य पद्य पंचसर्गात्मक

Folios – 14
Language – Sanskrit
Author – Ratnayogīndra-Digambara
Age of MS. – c. 14th cent. V. S.
Extent – Granthas 500
Size – 15.7 × 2.5 inches
Condition – Fair

आदिः—

॥ ॐ नमः सिद्धेभ्यः ॥

श्रीमान् व्यवहितारोऽपि वृतिं धर्मरथस्य यः ।
चक्रे चांतेर्विनाक्रांतस्तं नेमीनं नमाम्यहम् ॥

अथ दिग्वसनांभोजमंडनेन मनोमुदम् ।
प्रतन्वता प्रसादेन सहसा लब्धजन्मना ॥

द्युसदूदुंदुभिनादेन नभस्तलविसर्पिणा ।
दिव्यगंधभरेणेव मंडपस्थानवायुना ॥

अंतः—

ततोऽसौ श्रेणिकः श्रीमान् नत्वा त्रैलोक्यपूजितम् ।
देवं श्रीवर्द्धमानाख्यमगमत् स्वास्पदं मुदा ॥
श्रीपंचम्युपवासस्य फलोदाहरणात्मकम् ।
एवं नागकुमारस्य समाप्ति चरितं ययौ ॥ छ ॥
इति श्रीरत्नयोगींद्रेणोपसंहृत्य कीर्त्तितम् ।
सहस्रार्द्धमितग्रंथमेतच्चरितमुच्चकैः ॥

इति नागकुमारचरिते श्रीपंचमीमहोपवासफलोदाहरणे पंचमः सर्गः ॥ मंगलं महाश्रीः ॥

*

No. 237 : (1) Siddhahemaśabdānuśāsanasūtrapāṭha upto Adhyaya VIII
(१) सिद्धहेमशब्दानुशासनसूत्रपाठ अष्टमाध्यायपर्यन्त

Folios – 97	Size – 15 × 2 inches
Language – Sanskrit	Condition – Good
Author – Hemacandrācārya	Age of MS. – 1293 V. S.

अन्तः—

शेषं संस्कृतवत् सिद्धम् ॥ छ ॥ इत्याचार्यश्रीहेमचंद्रानुस्मृते सिद्धहेमचंद्रनाम्नि शब्दानुशासनेऽष्टमस्याध्यायस्य चतुर्थः पादः समाप्तः ॥ छ ॥ अष्टमोऽध्यायः समाप्तः ॥ छ ॥ समाप्तं चेदं सिद्धहेमचंद्राभिधानशब्दानुशासनमिति ॥ छ ॥

(2) Haimaliṅganuśasana (२) हैमलिङ्गानुशासन

Folios – 97-113	Size – 15 × 2 inches
Language – Sanskrit	Condition – Good
Author – Hemacandrācārya	Age of MS. – 1293 V.S.

अन्तः—

निःशेषनामलिंगानुशासनान्यभिसमीक्ष्य संक्षेपात् ।
आचार्यहेमचंद्रः समहभदनुशासनानि लिंगानाम् ॥ छ ॥ लिंगानि समाप्तानि ॥ छ ॥

(3) Haimadhātupāṭha (३) हैमधातुपाठ

Folios – 113-138	Size – 15 × 2 inches
Language – Sanskrit	Condition – Good
Author – Hemacandrācārya	Age of MS. – 1293 V. S.

(4) Haima Uṇādisūtrapāṭha (४) हैम उणादिसूत्रपाठ

Folios – 139-161
Size – 15 × 2 inches
Language – Sanskrit
Condition – Good
Author – Hemacandrācārya
Age of MS. – 1293 V. S.
General Remarks – The extent of all the four Mss. of this bundle together is of 2090 Granthas.

अन्तः—

अनसो वहेः क्विप् सश्च डः ॥ छ ॥ इत्याचार्यश्रीहेमचंद्रानुस्मृता उणादयः समाप्ताः ॥ छ ॥ ग्रंथाग्रं २०९० ॥ छ ॥ संवत् १२९३ वर्षे अश्विन शुदि १५ सोमे स्तंभतीर्थे श्रीनरेश्वरियोग्या श्रीहेमव्याकरणसूत्रपुस्तिका लिखापिता ॥ छ ॥

*

No 238: (1) Siddhahemaśabdānuśāsana Sūtrapāṭha–up to Pada 4 of Adhyāya VII

(१) सिद्धहेमशब्दानुशासन सूत्रपाठ–सप्तमाध्यायचतुर्थपादपर्यन्त

Folios – 85
Size – 12.2 × 1.7 inches
Language – Sanskrit
Condition – Good
Author – Hemacandrācārya
Age of MS. – c. Latter half of 13th cent. V.S.

आदिः—

॥ ॐ ॥ अर्हं । सिद्धिः स्याद्वादात् । लोकात् । औदन्ताः स्वराः ।

अन्तः—

समर्थः पदविधिः । इत्याचार्यश्रीहेमचन्द्रानुस्मृतौ सिद्धहेमचन्द्रनाम्नि शब्दानुशासने सप्तमस्याध्यायस्य चतुर्थः पादः ॥ छ ॥ सप्तमोऽध्यायः समाप्तः ॥

(2) Haimadhātupāṭha

(२) हैमधातुपाठ

Folios – 86–121
Size – 12.2 × 1.7 inches
Language – Sanskrit
Condition – Good
Author – Hemacandrācārya
Age of MS. – c. Latter half of 13th cent. V. S.
General Remarks – Slightly incomplete

आदिः—

ॐ भू सत्तायाम् । पां पाने । घ्रां गन्धोपादानयोः ।

अन्तः—

धृषण् प्रसहने । हिसुण् हिंसायाम् । गर्हण् विनि........

*

No. 239 : (1) Siddhahemaśabdānuśāsana Sūtrapāṭha

(१) सिद्धहेमशब्दानुशासन–सूत्रपाठ

Folios – 83
Language – Sanskrit
Author – Hemacandrācārya
Age of MS. – 1292 V. S.
Extent – Granthas 815
Size – 13 × 2 inches
Condition – Good

अंतः—

इत्याचार्यश्रीहेमचन्द्रानुस्मृते सिद्धहेमचन्द्रनाम्नि शब्दानुशासने सप्तमस्याध्यायस्य चतुर्थः पादः समाप्तः ॥ छ ॥ सप्तमोध्यायः समाप्तः ॥ छ ॥ ग्रं. ८१५ ॥ छ ॥

(2) Haimadhātupāṭha

(२) हैमधातुपाठ

Folios – 84–113
Language – Sanskrit
Author – Hemacandrācārya
Size – 13 × 2 inches
Condition – Good
Age of MS. – 1292 V. S.

हिसुण् हिंसायाम् । गर्हण् विनिंदने । षहण् मर्षणे । परस्मै भाषा ॥ छ ॥ वहुलमेतन्निदर्शनम् ॥ छ ॥ इत्याचार्यश्रीहेमचन्द्रानुस्मृताश्चुरादयो णितो धातवः समाप्ताः ॥ छ ॥ संवत् १२९२ ज्येष्ठ सुदि १ लिषितम् ॥ छ ॥

*

No. 240 : Siddhahemaśabdānuśasana—the Sūtrapāṭha of Adhyāya VIII

सिद्धहेमशब्दानुशासन—अष्टमाध्यायसूत्रपाठ

Folios – 98–127
Language – Sanskrit
Author – Hemacandrācārya
Age of MS. – c. First half of 14th cent. V.S.
Size – 14.5 × 1.7 inches
Condition – Good

अन्तः—

शौरसेनीवत् । व्यत्ययश्च । शेषं संस्कृतवत् सिद्धम् ॥ छ ॥ इत्याचार्यश्रीहेमचंद्रानुस्मृते सिद्धहेमचंद्रनाम्नि शब्दानुशासनेऽष्टमस्याध्यायस्य चतुर्थः पादः । अष्टमोऽध्यायः समाप्तः ॥ छ ।' छ ॥ समाप्तं चेदं सिद्धहेमचंद्राभिधानशब्दानुशासनम् ॥ छ ॥ ॥ छ ॥ मंगलं महाश्रीः ॥ शुभं भवतु लेखकपाठकयोः ॥ मंगलमस्तु ॥ छ ॥

आसीद् विशांपतिरमुद्रचतुःसमुद्र-
मुद्रांकितक्षितिभरक्षमबाहुदंडः ।
श्रीमूलराज इति दुर्द्धरवैरिकुंभि-
कंठीरवः शुचिचुलुक्यकुलावतंसः ॥

*

No. 241 : Siddhahemaśabdānuśāsana with the author's own Bṛhadvṛtti– up to Sūtra 89 of Pāda 2 of Adhyāya II

सिद्धहेमशब्दानुशासन–स्वोपज्ञबृहद्वृत्तिसह–द्वितीयाध्याय द्वितीयपाद ८९ सूत्रपर्यन्त

Folios – 354
Size – 15 × 1.5 inches
Language – Sanskrit
Condition – Fair
Author & Commentator – Hemacandrācārya
Age of MS. – c. beginning of 14th cent. V. S.

*

No. 242 : Siddhahemaśabdānuśāsana with the author's own Bṛhadvṛtti– from II. 3 to III. 2

सिद्धहेमशब्दानुशासन स्वोपज्ञबृहद्वृत्तिसह : अ० २ पा० ३ – अ० ३ पा० २

Folios – 228
Size – 9.7 × 2.2 inches
Language – Sanskrit
Condition – Good
Author & Commentator – Hemacandrācārya
Age of MS. – c. Latter half of 13th cent. V. S.

आदिः—

|| ॐ || अर्हं || नमस्पुरसो गतेः कखपफि रः सः || गतिसंज्ञकयोर्नमस् पुरस् इत्येतयोः सम्बन्धिनो रेफस्य कखपफेषु परेषु सकारादेशो भवति ।

अन्तः —

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनवृत्तौ तृतीयस्याध्यायस्य द्वितीयः पादः समाप्तः || छ || ॐ ||

श्रीमद्दुर्लभराजस्य प्रतापः कोऽपि दुःसहः ।
प्रसरं वैरिभूपेषु दीर्घनिद्रामकल्पयत् || छ ||

*

No. 243 : Siddhahemaśabdānuśāsana with the authorś own Bṛhadvṛtti : II. 3 to III. 2 along with Annotations

सिद्धहेमशब्दानुशासन स्वोपज्ञ बृहद्वृत्तिसह : अ० २ पा० ३—अ० ३ पा० २ : टिप्पणीसह

Folios – 254
Size – 17 × 2.2 inches
Language – Sanskrit
Condition – Good
Author & Commentator – Hemacandrācārya
Age of MS. – c. First half of 14th cent. V. S.
General Remarks – Folios 62–63 missing.

*

No. 244 : Siddhahemaśabdānuśāsana with the author's own Bṛhadvṛtti : upto III. 2

सिद्धहेमशब्दानुशासन–स्वोपज्ञबृहद्वृत्तिसह : तृतीयाध्याय द्वितीयपाद पर्यन्त

Folios – 300
Size – 14.5 × 2.2 inches
Language – Sanskrit
Condition – Fair
Author & Commentator – Hemacandrācārya
Age of MS. – c. Latter half of 14th cent. V. S.

*

No. 245 : Siddhahemaśabdānuśāsana-Svopajña-Bṛhadvṛtti III. 2—IV. 4.81 : Ākhyatavṛtti

सिद्धहेमशब्दानुशासन–स्वोपज्ञबृहद्वृत्ति : तृतीयाध्याय–द्वितीयपाद—अ० ४-४-८१ सूत्रपर्यन्त : आख्यातवृत्ति

Folios – 208
Size – 16.7 × 2.2 inches
Language – Sanskrit
Condition – Good
Author & Commentator – Hemacandrācārya
Age of MS. – c. Beginning of 14th cent. V. S.
General Remarks – Folio 1 missing.

*

No. 246 : Siddhahemaśabdānuśāsana with the author's own Bṛhadvṛtti : III. 2 toV. 4 : Ākhyatavṛtti and Kṛdvṛtti

सिद्धहेमशब्दानुशासन–स्वोपज्ञबृहद्वृत्तिसहित : तृतीयाध्याय द्वितीयपाद—पंचमाध्याय चतुर्थपाद पर्यन्त : आख्यातवृत्ति तथा कृद्वृत्ति

Folios – 253
Size – 15.2 × 2.2 inches
Language – Sanskrit
Condition – Good
Author & Commentator – Hemacandrācārya
Age of MS. – c. First half of 14th cent. V. S.
General Remarks – Folio 158 missing.

*

No. 247 : Siddhahemaśabdānuśāsana–the author's own Bṛhadvṛtti : Adhyāya V : Kṛdvṛtti

सिद्धहेमशब्दानुशासन–स्वोपज्ञबृहद्वृत्ति : पञ्चमाऽध्यायः कृद्वृत्ति

Folios – 198
Size – 15.2 × 2.2 inches
Language – Sanskrit
Condition – Good
Author – Hemacandrācārya
Age of MS. – 1300 V. S.

अन्तः—

अतादर्थ्यार्थमक्रियोपपदार्थे चेदं प्रस्तूयत इति ॥ छ ॥ इत्याचार्यश्रीहेमचंद्रविरचितायां सिद्धहेमचंद्राभिधानस्वोपज्ञशब्दानुशासनवृत्तौ पंचमस्याध्यायस्य चतुर्थः पादः। पंचमोऽध्यायः समाप्तः ॥ छ ॥

क्षुण्णाः क्षोणिभृतामनेन कटका भग्नाऽथ धारा ततः
कुण्ठस्सिद्धपतेः कृपाण इति रे मा मंसत क्षत्रियाः।
आरूढप्रबलप्रतापदहनः संप्राप्तधारश्चिरात्
पीत्वा मालवयोषिदश्रुसलिलं हंतायमेधिष्यति ॥ छ ॥

संवत् १३०० वर्षे वीजापुरपोषधशालायां समस्तश्रावकैः कृतबृहद्वृत्तिपुस्तिका लिखापिता सा० रत्नपाल श्रे० वील्हण ठ० आसपाल सा० लाहडेन लिखापितम्।

*

No. 248 : Siddhahemaśabdānuśāsana with Bṛhadvṛtti : Adhyāyas VI–VII : Taddhitavṛtti

सिद्धहेमशब्दानुशासन–स्वोपज्ञबृहद्वृत्तिसह–षष्ठ-सप्तम अध्यायः तद्धितवृत्ति

Folios – 330
Size – 15 × 2.2 inches
Language – Sanskrit
Condition – Good
Author & Commentator – Hemacandrācāryā
Age of MS. – c. First half of 14th cent. V. S.

*

No. 249 : Siddhahemaśabdānuśāsana with Bṛhadvṛtti : Adhyāya VI : Taddhitavṛtti Part I

सिद्धहेमशब्दानुशासन–स्वोपज्ञबृहद्वृत्तिसह : षष्ठ अध्याय : तद्धितवृत्ति–पूर्वखंड

Folios – 197
Size – 15.2 × 2.2 inches
Language – Sanskrit
Condition – Good
Author & Commentator – Hemacandrācārya
Age of MS. – 1298 V.S.

अन्तः—

ऋत्विजमर्हति आर्त्विजीनो यजमानः। ऋत्विक्कर्म आर्त्विजीनः। ऋत्विगेव ॥ छ ॥ इत्याचार्यश्रीहेमचंद्रविरचितायां सिद्धहेमचंद्राभिधानस्वोपज्ञशब्दानुशासनवृत्तौ षष्ठाध्यायस्य चतुर्थपादः समाप्तः ॥

भूमिं कामगवि स्वगोमयरसैरासिंच रत्नाकर
मुक्तास्वस्तिकमातनु त्वमुडुप त्वं पूर्णकुंभीभव।

धृत्वा कल्पतरोर्दलानि सरलैर्दिग्वारणास्तोरणा-
न्याधत्त स्वकरैर्विजित्य जगतीं नन्वेति सिद्धाधिपः ॥ ४ ॥

संवत् १२९८ वर्षे द्वितीयभाद्रपद वदि ७ गुरौ लिखितेयम् । शुभं भवतु । बीजापुरे पोषधशालायां तद्धितप्रथमखंडं समस्तश्रावकैर्लिखापितम् ॥ छ ॥ तद्धितः ॥

*

No. 250 : Siddhahemaśabdānuśāsana Laghuvṛtti up to Adhyāya III, Pāda 2 : Catuṣkavṛtti

सिद्धहेमशब्दानुशासन स्वोपज्ञलघुवृत्ति तृतीयाध्याय द्वितीयपादपर्यन्त–चतुष्कवृत्ति

Folios – 212
Size – 8.2 × 1.7 inches
Language – Sanskrit
Condition – Good
Author & Commentator – Hemacandrācārya
Age of MS. – c. First half of 14th cent. V. S.
General Remarks – Folios 122, 125, 132, 142, 205, 206–209 missing.

*

No. 251 : Siddhahemaśabdānuśāsana with Laghuvṛtti : up to Adhyāya III, Pāda 2 : Catuṣkavṛtti

सिद्धहेमशब्दानुशासन स्वोपज्ञलघुवृत्तिसह–तृतीयाध्याय द्वितीयपादपर्यन्त–चतुष्कवृत्ति

Folios – 142
Size – 14.5 × 2.2 inches
Language – Sanskrit
Extent – Granthās 1600
Author & Commentator – Hemacandrācāryā
Condition – Good
Age of MS. – c. Latter half of 13th cent. V.S.

आदिः—

ॐ ॥ अर्हं ॥ प्रणम्य परमात्मानं श्रेयः शब्दानुशासनम् ।
आचार्यहेमचन्द्रेण स्मृत्वा किंचित् प्रकाश्यते ॥

अन्तः—

॥ इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासन-लघुवृत्तौ तृतीयस्याध्यायस्य द्वितीयः पादः ॥ छ ॥ ग्रंथ १६००॥ छ ॥ शिवमस्तु ॥ छ ॥

*

No. 252 : Siddhahemaśabdānuśāsana with Laghuvṛtti : up to II. 3. 79.

सिद्धहेमशब्दानुशासन स्वोपज्ञलघुवृत्तिसह : द्वितीयाध्याय–तृतीयपाद सूत्र ७९ पर्यन्त

Folios – 90
Size – 15 × 1.7 inches
Language – Sanskrit
Condition – Good

Author & Commentator – Hemacandrācārya
Age of MS. – c. Latter half of 13th cent. V.S.

अन्तः—

प्रणिवहति । प्रणिशाम्यति । प्रणिचिनोति । प्रणियाति । प्रणिवाति ।

*

No. 253 : Siddhahemaśabdānuśasana Avacūrṇikā : Durgapadavṛtti

सिद्धहेमशब्दानुशासन अवचूर्णिका : दुर्गपदवृत्ति

Folios – 298 Size – 14 × 1.5 inches
Language – Sanskrit Condition – Good
Age of MS. – 1264 V.S.
General Remarks – First three folios and last three folios are dilapidated in condition.

आदिः—

सर्वज्ञं सर्वदेवार्च्यं प्रणम्य विवृणोम्यहम् ।
हैमव्याकरणादभ्रवृत्तिदुर्गपदावलीम् ॥ १ ॥

तत्रादौ तावदभिमतदेवतानमस्कारस्य शास्त्रसंबंधप्रयोजनयोश्च प्रतिपादनाय वृत्तिकारः श्लोकमेकमकार्षीत् । **प्रणम्य परमात्मान**मित्यादि । इह हि शिष्टाः क्वचिदिष्टे वस्तुनि प्रवर्त्तमानाः शिष्टसमयपरिपालनार्थं प्रारब्धेष्टवस्तुनिर्विघ्नपरिसमाप्त्यर्थं च इष्टदेवतानमस्कार-पुरस्कारेणैव प्रवर्त्तन्ते । अयमपि च श्रीमदाचार्यहेमचंद्रश्चौलुक्यचंद्रश्रीमत्कुमारपाल-भूपालवंदितपादारविंदः शिष्टसमयपरिपालनार्थं प्रारब्धश्रीसिद्धहेमचंद्राभिधानस्वोपज्ञ-शब्दानुशासनवृत्तिनिर्विघ्नपरिसमाप्त्यर्थं च श्लोकस्य पादद्वयेनाभिमतदेवतानमस्कारं श्रोतृ-जनप्रवृत्त्यर्थं च शास्त्रस्य संबंधप्रयोजने प्रत्यपीपदत् । तत्र प्रणम्येति प्रातेः क्वचिदिति डे । पिपर्त्तेः पृणातेर्वा खुरक्षुरेति निपातनात् । प्रशब्दः साधुः । तस्माच्च सेर्लुपि प्रत्ययाश्रितत्वेन बहिरंगोऽपि प्रकृत्याश्रितत्वेनांतरंगमपि समासं बाधित्वा प्रथममेव भवति । बहिरंगाऽपि लुप् अंतरंगान् विधीन् बाधत इति न्यायात् । ततः प्रपूर्वान्नमेः समासे सति प्राक्काले इत्यनेन क्त्वाप्रत्ययः । नन्वत्र अहन्पंचमस्य क्विक्ङिति अनेन दीर्घत्वं परत्वेन कृताकृत-प्रसागत्ववशान्नित्याद्यवादेशात् प्रागेव मा भूत् परा .... यदुच्यते । ज्ञापयत्यंतरंगाणां यया भवति बाधनम् ॥ इत्यतो दीर्घत्वात् प्रथ........................
........नमित्यत्र कर्मणि कृत इति षष्ठी प्राप्नोति । सा च तृन्नुदंतेत्यादिना निषिध्यते । श्रेय ....स्यस्य श्र इत्यादेशविधानबलात् क्रियाशब्दत्वेन अगुणांगादपि प्रशस्य-

शब्दादीयस् नैकस्वरस्येति निषेधात् ऋत्यस्वरादेरिति नांत्यस्वरादेर्लोपः । अवर्णेवर्णस्येत्यपि न । ऋत्यस्वरादेरनेकस्वरस्येति एकसूत्राकरणात् । शब्दानुशासनमित्यत्र कथं कृतीति षष्ठीसमासः । तृतीयायामिति निषेधात् । सत्यम् । प्रत्यासत्तिन्यायेन यं कृतं अपेक्ष्य षष्ठी तमेव कृतमपेक्ष्य यदि तृतीया स्यात्तदा आचार्यहेमचंद्रेणेति तृतीयासद्भावात् आश्चर्यो गवां दोहो गोपालकेनेतिवत् षष्ठीसमासनिषेधः स्यात् । अत्र तु प्रकाश्यत इत्यपेक्षया तृतीया । अनुशासन इत्यपेक्षया तु षष्ठीति न समासनिषेधः । आचर्यते सेव्यते विनयार्थं विद्याग्रहणार्थं वा शिष्यैरिति घ्यण् १ । आचारे साधुरिति तत्र साधौ यः २ । आचारान् यातीति कश्चित् डः ३ । आचारानाचष्ट इति णिज् बहुलं नास्तीति णिजि आचारयतीति शिक्यस्योयेति सो निपात्यते ४ । आचारान् गृह्णाति ग्राहयति वा पृषोदरादित्वात् साधुः ५ । किमपि चिनोतीति क्विप् १ । किमः सर्वविभक्त्यंतात् चिच्चनाविति वा २ । किंचिदित्यखंडमव्ययं वा ३ । अत्र सर्वपार्षदत्वात् व्याकरणस्य परमात्मानमित्यनेनानिर्दिष्टनाम्ना सामान्येन देवताया निर्देशः कृतः । सर्वैरपि हि स्वकीयः २ देवता परमात्मेत्युच्यते । नमस्कार्यश्च स एव भवति यस्य पूजातिशयवचनातिशय-ज्ञानातिशयाऽपायापगमातिशयलक्षणमतिशयचतुष्टयं भवति । तत्र परमात्मानमित्यनेन पूजातिशयः प्रकाशितः । अत एव सन्महत्परमेत्यनेन पूजायां समासः ।

अन्तः—

कडारा । जैमनि कडार इति । जेमंतीति विच् जेमामिनः जेमिनः यद्वा जिमेर्विपिना-जिनादय इतीने जिमिनस्तस्यापत्यं ऋषित्वेऽपि बाह्वादेराकृतिगणत्वादिञि । जैमिनिः । गडुलगालव इति । गडुरस्यास्ति सिध्मादि० लगडोरपत्यं ऋष्यण्० ऋफिडादित्वाल्लः ॥ छ ॥ धर्मार्थी विपूयविनीयजित्या इति । यादृश एव गणे दृष्टस्तादृश एव प्रयोगः न तु विनीयविपूयजित्यादयः । जित्याशब्दस्यैव पूर्वपरभावः ॥ छ ॥ लघ्वक्षरा । अक्षरशब्देन स्वरोऽभिधीयते । शरशीर्षमिति पाठः । शरशीर्षमिति तु पाठे प्राणित्त्वयेति स्वैरभावात् समाहाराप्राप्तिः । श्रद्धामेधे इति । अर्थग्राहिणी श्रद्धा शब्दग्राहिणी मेधा श्रद्धामूलत्वादभि-प्रेतार्थसिद्धेरर्च्यत्वं । दीक्षा तपसीत्यादिषु दीक्षाश्रद्धामेधानां बहूपकारकत्वान्मूलभूतत्वाच्चार्चित-त्वात् परत्वात् पूर्वनिपातः । मातापितराविति । अनुभूतगर्भादिक्लेशत्वात् पितृतो माताऽभ्यर्हिता । एवं स्त्रीप्रधानत्वाद्विवाहस्य वराद्वधूरिति । एकस्यैव यथाप्राप्तमिति । दुंदुभिशब्दादिदंतात् परत्वादल्पस्वरत्वात् शंखवीणाशब्दयोर्युगपत् पूर्वनिपातप्राप्तावेकग्रहणादेकस्यैव क्रमेण पूर्वनिपातः । शेषाणां त्विति । शंखवीणाशब्दयोः अश्वइंद्रशब्दयोरेव युगपत् पूर्वनिपातप्राप्तौ

Author & Commentator – Hemacandrācārya
Age of MS. – c. Latter half of 13th cent. V.S.

अन्तः—

प्रणिवहति । प्रणिशाम्यति । प्रणिचिनोति । प्रणियाति । प्रणिवाति ।

*

No. 253 : Siddhahemaśabdānuśasana Avacūrṇikā : Durgapadavṛtti

सिद्धहेमशब्दानुशासन अवचूर्णिका : दुर्गपदवृत्ति

Folios – 298
Size – 14 × 1.5 inches
Language – Sanskrit
Condition – Good
Age of MS. – 1264 V. S.
General Remarks – First three folios and last three folios are dilapidated in condition.

आदिः—

सर्वज्ञं सर्वदेवार्च्यं प्रणम्य विवृणोम्यहम् ।
हैमव्याकरणादभ्रवृत्तिदुर्गपदावलीम् ॥ १ ॥

तत्रादौ तावदभिमतदेवतानमस्कारस्य शास्त्रसंबंधप्रयोजनयोश्च प्रतिपादनाय वृत्तिकारः श्लोकमेकमकार्षीत् । **प्रणम्य परमात्मान**मित्यादि । इह हि शिष्टाः क्वचिदिष्टे वस्तुनि प्रवर्त्तमानाः शिष्टसमयपरिपालनार्थं प्रारब्धेष्टवस्तुनिर्विघ्नपरिसमाप्त्यर्थं च इष्टदेवतानमस्कार-पुरस्कारेणैव प्रवर्त्तन्ते । अयमपि च श्रीमदाचार्यहेमचंद्रश्चौलुक्यचंद्रश्रीमत्कुमारपाल-भूपालवंदितपादारविंदः शिष्टसमयपरिपालनार्थं प्रारब्धश्रीसिद्धहेमचंद्राभिधानस्वोपज्ञ-शब्दानुशासनवृत्तिनिर्विघ्नपरिसमाप्त्यर्थं च श्लोकस्य पादद्वयेनाभिमतदेवतानमस्कारं श्रोतृ-जनप्रवृत्त्यर्थं च शास्त्रस्य संबंधप्रयोजने प्रत्यपीपदत् । तत्र प्रणम्येति प्रातेः क्वचिदिति डे । पिपर्त्तेः पृणातेर्वा खुरक्षुरेति निपातनात् । प्रशब्दः साधुः । तस्माच्च सेर्लुपि प्रत्ययाश्रितत्वेन बहिरंगोऽपि प्रकृत्याश्रितत्वेनांतरंगमपि समासं बाधित्वा प्रथममेव भवति । बहिरंगाऽपि लुप् अंतरंगान् विधीन् बाधत इति न्यायात् । ततः प्रपूर्वान्नमेः समासे सति प्राक्काले इत्यनेन क्त्वाप्रत्ययः । नन्वत्र अहन्पंचमस्य क्विक्ङिति अनेन दीर्घत्वं परत्वेन कृताकृत-प्रसागत्ववशान्नित्याद्यवादेशात् प्रागेव मा भूत् परा .... यदुच्यते । ज्ञापयत्यंतरंगाणां यथा भवति बाधनम् ॥ इत्यतो दीर्घत्वात् प्रथ................................ ....नमित्यत्र कर्मणि कृन इति षष्ठी प्राप्नोति । सा च तृन्नुदंतेत्यादिना निषिध्यते । श्रेय इत्यत्र प्रशस्यस्य श्र इत्यादेशविधानवलात् क्रियाशब्दत्वेन अगुणांगादपि प्रशस्य-

शब्दादीयस् नैकस्वरस्येति निषेधात् त्र्यंत्यस्वरादेरिति नांत्यस्वरादेर्लोपः । अवर्णेवर्णस्येत्यपि न । त्र्यंत्यस्वरादेरनेकस्वरस्येति एकसूत्रीकरणात् । शब्दानुशासनमित्यत्र कथं कृतीति षष्ठीसमासः । तृतीयायामिति निषेधात् । सत्यम् । प्रत्यासत्तिन्यायेन यं कृतं अपेक्ष्य षष्ठी तमेव कृतमपेक्ष्य यदि तृतीया स्यात्तदा आचार्यहेमचंद्रेणेति तृतीयासद्भावात् आश्चर्यो गवां दोहो गोपालकेनेतिवत् षष्ठीसमासनिषेधः स्यात् । अत्र तु प्रकाश्यत इत्यपेक्षया तृतीया । अनुशासन इत्यपेक्षया तु षष्ठीति न समासनिषेधः । आचर्यते सेव्यते विनयार्थं विद्याग्रहणार्थं वा शिष्यैरिति घ्यण् १ । आचारे साधुरिति तत्र साधौ यः २ । आचारान् यातीति क्वचित् डः ३ । आचारानाचष्ट इति णिज् बहुलं नास्तीति णिजि आचारयतीति शिक्यस्योयेति सो निपात्यते ४ । आचारान् गृह्णाति ग्राहयति वा पृषोदरादित्वात् साधुः ५ । किमपि चिनोतीति क्विप् १ । किमः सर्वविभक्त्यंतात् चिच्चनाविति वा २ । किंचिदित्यखंडमव्ययं वा ३ । अत्र सर्वपार्षदत्वात् व्याकरणस्य परमात्मानमित्यनेनानिर्दिष्टनाम्ना सामान्येन देवताया निर्देशः कृतः । सर्वैरपि हि स्वकीयः २ देवता परमात्मेत्युच्यते । नमस्कार्यश्च स एव भवति यस्य पूजातिशयवचनातिशय-ज्ञानातिशयाऽपायापगमातिशयलक्षणमतिशयचतुष्टयं भवति । तत्र परमात्मानमित्यनेन पूजातिशयः प्रकाशितः । अत एव सन्महत्परमेत्यनेन पूजायां समासः ।

अन्तः—

कडारा । जैमनि कडार इति । जेमंतीति विच् जेमामिनः जेमिनः यद्वा जिमेर्विपिना-जिनादय इतीने जिमिनस्तस्यापत्यं ऋषित्वेऽपि बाह्वादेराकृतिगणत्वादिञ् । जैमिनिः । गड्डुलगालव इति । गड्डुरस्यास्ति सिध्मादि० लगडोरपत्यं ऋष्यण्० ऋफिडादित्वाल्लः ॥ छ ॥ धर्मार्थौ विपूयविनीयजित्या इति । यादृश एव गणे दृष्टस्तादृश एव प्रयोगः न तु विनीयविपूयजित्यादयः । जित्याशब्दस्यैव पूर्वपरभावः ॥ छ ॥ लघ्वक्षरा । अक्षरशब्देन स्वरोऽभिधीयते । शरशीर्षमिति पाठः । शरशीर्षमिति तु पाठे प्राणित्वयेति स्वैरभावात् समाहाराप्राप्तिः । श्रद्धामेधे इति । अर्थग्राहिणी श्रद्धा शब्दग्राहिणी मेधा श्रद्धामूलत्वादभि-प्रेतार्थसिद्धेरर्च्यत्वं । दीक्षा तपसीत्यादिषु दीक्षाश्रद्धामेधानां बहूपकारकत्वान्मूलभूतत्वाच्चार्चित-त्वात् परत्वात् पूर्वनिपातः । मातापितराविति । अनुभूतगर्भादिक्लेशत्वात् पितृतो माताऽभ्यर्हिता । एवं स्त्रीप्रधानत्वाद्विवाहस्य वराद्वधूरिति । एकस्यैव यथाप्राप्तमिति । दुंदुभिशब्दादिदंतात् परत्वादल्पस्वरत्वात् शंखवीणाशब्दयोर्युगपत् पूर्वनिपातप्राप्तावेकग्रहणादेकस्यैव क्रमेण पूर्वनिपातः । शेषाणां त्विति । शंखवीणाशब्दयोः अश्वइंद्रशब्दयोरेव युगपत् पूर्वनिपातप्राप्तौ

एकस्यैव पूर्वनिपातः । दुंदुभिरथादीनां तु कामचार इत्यर्थः । एकस्यैवेत्युक्तेऽपि दुंदुभिरथादीनां न पूर्वनिपातः शब्दस्य स्पर्द्धे परत्वात्तथाहि दुंदुभिशब्दोऽसखीदुत् शंखवीणाशब्दौ तु अल्पस्वराविति । एवमश्वरथेंद्रा इत्यत्रापि रथशब्दो लघ्वक्षरः । अश्वेंद्रशब्दौ च परौ इति तयोरेव पूर्वनिपातो न तु रथस्य । शंखदुंदुभिवीणा इति । प्राण
गणो वः मांगल्यवाचकत्वेन शंखशब्दस्य विवक्षितत्वात् स्वैरित्वभावाद्वा । यतः तूर्यांगस्य तूर्यांगे न हि स्वयं भवति इति । एवं मृदंगशंखपणवा इति । अथवा शंखदुंदुभिवीणामृदंगशंखपणवा इति शंखादीनां तूर्यांगत्वादेकवद्भावः कुतो न भवतीति । उच्यते । अत्र शंखादिशब्देन शंखादिसमुदायस्याभिधानात्तस्य चातूर्यांगत्वादजातित्वाच्च नैकवद्भावः । उत्पलस्त्वाह । तूर्यांगताशंखादिवादकानां न तु शंखादीनामिति तूर्यांगत्वादत्रैकवद्भावो नाशंकनीयः । अत एव प्राणितूर्यांगाणामित्यत्र पूर्वैर्मार्दंगिकपाणविकवीणावादकपरिवादकमित्येवोदाह्रियते न तु भेरीमृदंगमित्यादि । तदा तु प्राणिरूपं तूर्यांगं प्राणितूर्यांगमिति विग्रहः ॥ छ ॥ मासव । ब्राह्मणक्षत्रियाविति । अत्रानियमः प्राप्तः । क्षत्रियवैश्यावित्यत्र त्वल्पस्वरत्वाद्वैश्यशब्दस्य पूर्वनिपातः प्राप्तो वैश्यशूद्रावित्यत्राप्यनियमः । ब्राह्मणक्षत्रियविट्शूद्रा इत्यत्र त्वल्पस्वरत्वाद्विशः पूर्वनिपाते प्राप्तेऽनेन ब्राह्मणादीनामनुपूर्वं पूर्वनिपातः । आनुपूर्व्यं च जन्मकृतम् । यदाह । मुखतो ब्राह्मणा जाता बाहुभ्यां क्षत्रियाः स्मृताः । ऊरुभ्यां तु विशः प्रोक्ताः पद्भ्यां शूद्रो अजायत ॥ न चात्रार्च्यत्वात् पूर्वनिपातः सिध्यतीति वाच्यम् । निंदितस्यापि ब्राह्मणादेः संभवादिति ॥ छ ॥ भर्त्तुतुल्य । अत्रापि नक्षत्राणामृतूनां चानुपूर्व्यं लोकप्रसिद्धचैव वेदितव्यम् । छ ॥ संख्यास । द्विदशा इति । ननु द्विदशा इत्यादौ सुज्वार्थे इत्यनेन सुजर्थे समासः । ततः प्रथमोक्तं प्रागित्यनेनापि सिध्यति । किमेषामुपादानम् । सत्यं यदा दशन्शब्दः सुजर्थः समस्यते तदाप्यनेनानुपूर्व्या संख्यायाः पूर्वनिपातो भवतीति फलम् ॥ छ ॥ इत्याचार्यश्रीहेमचंद्रानुस्मृते **सिद्धहेमचंद्रनाम्नि शब्दानुशासने** अवचूर्णिकाया तृतीयस्याध्यायस्य प्रथमः पादः संपूर्णः ॥ छ ॥ संवत् १२६४ वर्षे श्रावण शुदि ३ रवौ श्रीजयानंदसूरिशिष्य अमरचंद्रेण आ[त्मकृते] अवचूर्णिकायाः प्रथमपुस्तिका लिखिता ॥ शुभं भवतु लेखकपाठकयोः ॥ छ ॥

*

No. 254 : Siddhahemaśabdānuśāsana with Bṛhadvṛtti : Adhyāya VIII : Prākṛtādivyākaraṇa

सिद्धहेमशब्दानुशासन स्वोपज्ञबृहद्वृत्तिसह : अष्टमाध्याय–प्राकृतादिव्याकरण

Folios – 223 Size – 14.7 × 1.7 inches

Language – Sanskrit
Author & Commentator – Hemacandrācārya
Condition – Good
Age of MS. – 1224 V. S.

आदिः—

॥ ॐ नमो वीतरागाय ॥

अथ प्राकृतं। अथ शब्दआनंतर्यार्थोऽधिकारार्थश्च प्रकृतिः संस्कृतम्। तत्र भवं तत आगतं वा प्राकृतं संस्कृतानंतरं प्राकृतमधिक्रियते। संस्कृतानंतरं च प्राकृतस्याऽनुशासनम्। सिद्धसाध्यमानभेदसंस्कृतयोनेरेव तस्य लक्षणम्। न देश्यस्येति ज्ञापनार्थं संस्कृतसमं तु संस्कृतलक्षणेनैव गतार्थम्। प्राकृते च प्रकृतिप्रत्ययलिंगकारकसमाससंज्ञादयः संस्कृतवद्वेदितव्याः। लोकादिति च वर्त्तते। तेन ऋऋृलॡऐऔङञशष विसर्जनीयप्लुतवर्जो वर्णसमाम्नायो लोकादवगंतव्यः। ङञौ स्ववर्ग्यसंयुक्तौ भवत एव। ऐदौतौ च केषांचित्। कैतवं कैअवं सौदर्यं सौअरियं। कौरवाः कौरवा। तथाऽस्वरं व्यंजनं द्विवचनं चतुर्थीवहुवचनं च न भवति ॥ छ ॥

अन्तः—

शेषं संस्कृतवत् सिद्धम्। शेषं यदत्र प्राकृतादिभाषास्वष्टमे नोक्तं तत्सप्ताध्यायीनिवद्धसंस्कृतवदेव सिद्धम्। हेट्ठट्ठिअसूरनिवारणाय। अत्र चतुर्थ्या आदेशो नोक्तः। स च संस्कृतवदेव सिद्धः। उक्तमपि क्वचित् संस्कृतवदेव भवति। यथा प्राकृते उरस् शब्दस्य सप्तम्येकवचनान्तस्य उरे उरम्मि इति प्रयोगौ भवतः तथा क्वचिदुरसीत्यपि भवति। एवं सिरे सिरम्मि सिरसि सरे सरम्मि सरसि। सिद्धग्रहणं मंगलार्थम्। ततो ह्यायुष्मच्छ्रोतृकताभ्युदयश्चेति ॥ छ ॥ इत्याचार्यश्रीहेमचंद्रविरचितायां सिद्धहेमचंद्राभिधानस्वोपज्ञशब्दानुशासनवृत्तौ अष्टमस्याऽध्यायस्य चतुर्थः पादः समाप्तः ॥ अष्टमोध्यायः समाप्तः ॥ छ ॥ समाप्ता चेयं सिद्धहेमचंद्रशब्दानुशासनवृत्तिः प्रकाशिकानामेति समाप्तमिति ॥ छ ॥

आसीद्विशांपतिरमुद्रचतुस्समुद्रमुद्रांकितक्षितिभरक्षमबाहुदंडः।
श्रीमूलराज इति दुर्द्धरवैरिकुंभिकंठीरवः शुचिचुलक्यकुलावतंसः ॥ ३२ ॥

तस्याऽन्वये समजनि प्रवलप्रतापतिग्मद्युतिः क्षितिपतिर्जयसिंहदेवः।
येन स्ववंशसवितर्य्यपरं सुधांशौ श्रीसिद्धराज इति नाम निजं व्यलेखि ॥३३॥

सम्यग् निषेव्य चतुरश्चतुरोऽप्युपायान् जित्वोपभुज्य च भुवं चतुरब्धिकांचिम्।
विद्याचतुष्टयविनीतमतिर्जितात्मा काष्ठामवाप पुरुषार्थचतुष्टये यः ॥ ३४ ॥

तेनाऽतिविस्तृतदुरागमविप्रकीर्णशब्दानुशासनसमूहकदर्थितेन ।
अभ्यर्थितो निरवमं विधिवद् व्यधत्त शब्दानुशासनमिदं मुनिहेमचंद्रः ॥छ॥

संवत् १२२४ वर्षे भाद्रपद शुदि २ बुधे महं० चंडप्रसादेन सुत यशोधवलस्यार्थे लेखिता ॥

*

No. 255 : Haimaliṅgānuśāsana with Vivarṇa

हैमलिङ्गानुशासन–स्वोपज्ञविवरणसह

Folios – 222 | Size – 12.2 × 2 inches
Language – Sanskrit | Condition – Good
Author & Commentator – Hemacandrācārya
Age of MS. – c. Latter half of 13th cent. V. S.
General Remarks – Somewhat incomplete.

आदिः—

॥ ॐ नमो जिनाय ॥ अर्हम् ॥

श्रीसिद्धहेमचंद्रव्याकरणनिवेशितानि लिंगानि ।
आचार्यहेमचंद्रो विवृणोत्यर्हं नमस्कृत्य ॥

लिंगानुशासनमंतरेण शब्दानुशासनं नाविकलमिति सामान्यविशेषलक्षणाभ्यां लिंगमनुशिष्यते । पुल्लिंगं कटणथपभमयरषसन्तु ।

*

No. 256 : (1) Kātantra (?) Pañjikopayogī Parasūtrakadambaka (?)

(१) कातन्त्रपञ्जिकोपयोगी परसूत्रकदम्बक (?)

Folios – 52 | Size – 14.5 × 1.2 inches
Language – Sanskrit | Condition – Good
Age of MS. – 1287 V.S.
General Remarks – Folio 52 contains picture-decoration.

आदिः—

उपकारीदमत्यंतं पंजिकायामतो बुधैः ।
शास्त्रांतरात् समादत्तं परसूत्रकदंबकम् ॥ १ ॥

ह्रस्वं लघु । संयोगे गुरु । दीर्घं च । वर्गो वर्गेण सवर्णः । मनोरनूष्मण्यनुस्वारः । सुप्तिङंतं पदं । चादयोऽसत्त्वे निपाताः । स्वरादिनिपातमव्ययम् । प्रादयः क्रियायोगे

उपसर्गास्ते च प्राग्धातोः । अपादानादिकारकं । तुब्यादिलक्षणः कालः । एकादिव्यवहारहेतुः संख्या । अदर्शनं लोपः । प्राग्दीव्यतोऽण् । तदस्मिन्नस्तीति देशे तन्नाम्नि । तेन निर्वृत्तः । तस्य निवासः । अदूरभवश्चावरणादिभ्यश्च जनपदे लुक् । लुपि युक्तवद्व्यक्तिवचने । तद्-शिष्यं संज्ञाप्रमाणत्वात् । लुप्योगाप्रख्यानात् । प्लक्षादिभ्योऽण् । हरीतक्यादिभ्यश्च एकादाकिनिच्चासंहाये । मृदस्तिकन् । सस्नौ प्रशंसायां । वने लुक् ॥ छ ॥ **इति प्रथमः संधिः** ॥ छ ॥

अन्तः—

नां चेः प्रकाशने । पूजायां मिट् न लोपो न सिनोतेः कर्मकर्त्तरिग्रासे । त्राधातोर्वा । न संज्ञायां त्रायतेर्नित्यं । संफुल्लोत्फुल्लपरिकृशाः ॥ छ ॥ **कृत्परसूत्राणि समाप्तानि** ॥ छ ॥

(2) Kātantra(?)pañjikopāyogī Unādiparasūtra-kadambaka (?)

(२) कातन्त्र(?)पञ्जिकोपयोगी उणादिपरसूत्रकदम्बक (?)

Folios – 53–62
Size – 14.5 × 1.2 inches
Language – Sanskrit
Condition – Good
Age of MS. – 1287 V. S.

आदि :—

आद्यरयोखनिस्वभ्यां द्रुः । मद्यं किर्वासिमथिवत्तिभ्य उरः । मकुरदर्दुरविधुराः । शाव-सेराप्तौ । अविमत्सौ पूयः । रुहेर्वृद्धिश्च । किल्बियाव्यथियौ । तिमिरुचिमदिवंमंदिवं-दिविधेरुचिशुचिभ्यः किरः । अजिरादयः ।

अन्त :—

सिचेः संज्ञायां । व्याजिघ्रश्च जातौ । हंतेर्धुरगृहेरणि । प्रथेरमच्चमंगेरलच् । **इत्युणादौ षष्ठः पादः समाप्तः** ॥ छ ॥ **उणादिः समाप्ता इति** ॥ छ ॥

(3) Vāmanīya Liṅgānuśāsana (३) वामनीय लिङ्गानुशासन

Folios – 63-66
Extent – Granthas 25
Language – Sanskrit
Size – 14.5 × 1.2 inches
Aüthor – Vāmanācārya
Condition – Good
Age of MS. – 1287 V. S.

आदिः—

सिद्धं विबुधजनेष्टं विदिताऽखिलवाङ्मयं प्रणम्याप्तम् ।
लिंगानुशासनमहं वच्म्यार्याभिः समासेन ॥ १ ॥

नाम नपुंसकलिंगं तत्तनलस्तुत्वशब्दपर्यंतम् ।
मन्नंतो द्विजदितमपि संतं हल्यूर्व्वररुजातम् ॥ २ ॥

अंतः—

अद्यापि संशयगतार्थमनिष्टसंगलिंगानुशासनमिहाज्ञतया मया यत् ।
प्रोक्तं हि किंचिदविचार्य तदार्यवर्यैः संस्कार्यमस्ति यदि कार्यमुतावधीर्यम् ॥ १० ॥

लिंगानुशासनमिदं कृतमुन्नतेन शुभ्रैर्गुणैः कविहितं भुवि वामनेन ।
बुध्वाऽखिलं विमलशब्दगतप्रमेयं नातः परं स्फुटतरं शुभमस्ति लोकाः ॥ ११ ॥

इति श्रीवामनाचार्यकृतं लिंगानुशासनं समाप्तमिति ॥ छ ॥ * ॥ छ ॥ संवत् १२८७ वर्षे वैशाख सुदि गुरावद्येह वीजापुरीयश्रावकपोषधशालायां पूज्यश्रीदेवेंद्रसूरि विजयचंद्रसूरि उपाध्यायश्रीदेवभद्रगणेः सद्गुरूणां धर्मोपदेशतः सा० रत्नपाल सा० लाहड श्रे० वील्हण ठ० आसपाल परसूत्रपुस्तिका लिखापिता ।

*

No. 257 : Siddhahemaśabdānuśāsana-Uṇādigaṇa with Svopajña Vivaraṇa

सिद्धहेमशब्दानुशासन-उणादिगण-स्वोपज्ञविवरणसहित

Folios – 197
Size – 17.5 × 2 inches
Language – Sanskrit
Condition – Good
Author & Commentator – Hemacandrācārya
Age of MS. – c. First half of 15th cent. V. S.
General Remarks – The ms. is corrected in 1460 V.S.

आदिः—

॥ अर्हम् ॥

श्रीसिद्धहेमचंद्रव्याकरणनिवेशिनामुणादीनाम् ।
आचार्यहेमचंद्रः करोति विवृतिं प्रणम्यार्हम् ॥ छ ॥

कृवापाजिस्वादिसाध्यशैादृस्नासनिजनिरहीण्भ्य उण् । करोत्यादिभ्यो धातुभ्यः सत्यर्थे वर्त्तमानेभ्यः संप्रदानापादानाभ्यामन्यत्र कारके भावे च संज्ञायां विषये बहुलमुण्-प्रत्ययो भवति ।

अन्तः—

अनसो वहेः क्विप्सश्च डः । अनसशब्दपूर्वात् वहीं प्रापणे इत्यस्मात् क्विप्प्रत्ययो सकारस्य च डो भवति । अनो वहति । अनड्वान् वृषभः ॥ छ ॥ इत्याचार्यश्रीहेम-

चंद्रानुकृतं स्वोपज्ञोणादिगणसूत्रविवरणं समाप्तम् ॥ छ ॥ मंगलं महाश्रीः ॥ शुभं भवतु ॥ छ ॥ संवत् १४६० वर्षे चैत्र वदि ९ गुरावशोधि शुद्धपुस्तिकयेयं पुस्तिका । भद्रम् ॥

*

No. 258 : Abhidhānacintamaṇināmamālā

अभिधानचिन्तामणिनाममाला

Folios – 190
Language – Sanskrit
Author – Hemacandrācārya
Size – 12.5 × 1.7 inches
Condition – Good
Age of MS. – c. Latter half of 13th cent. V. S.

आदिः—

॥ अर्हम् ॥

प्रणिपत्यार्हतः सिद्धसांगशब्दानुशासनः ।
रूढयौगिकमिश्राणां नाम्नां मालां तनोम्यहम् ॥ १ ॥

अन्तः—

ननु च स्याद्विरोधोक्तौ पक्षांतरे तु चेद्यदि ।
शनैर्मंदे वरे त्ववांक् रोषोक्तावुन्नतौ नमः ॥ १७८ ॥

इत्याचार्यश्रीहेमचंद्रविरचितायामभिधानचिंतामणौ नाममालायां सामान्य-काण्डः षष्ठः समाप्तः ॥

*

No. 259 : Abhidhānacintamaṇināmamālā with Vṛtti

अभिधानचिन्तामणिनाममाला—स्वोपज्ञवृत्तियुता

Folios – 250
Language – Sanskrit
Author & Commentator – Hemacandrācārya
Age of MS. – 1376 V. S.
Extent – Granthas 10000
Size – 37.7 × 2.5 inches
Condition – Good

आदिः—

॥ अर्हम् ॥

धर्मतीर्थकृतां वाचं नत्वा तत्त्वाभिधायिनीम् ।
स्वोपज्ञनाममालाया विवृतिं विदधाम्यहम् ॥ १ ॥
श्रेयोर्थमयमारंभः किं तत्रात्मविकत्थनैः ।
परात्मनिन्दास्तोत्रे हि नाद्रियन्ते मनीषिणः ॥ २ ॥

प्रामाण्यं वासुकेर्व्याडेर्व्युत्पत्तिर्धनपालतः ।
प्रपञ्चश्च वाचस्पतिप्रभृतेरिह लक्ष्यताम् ॥ ३ ॥

तत्रायमादिश्लोकः—

प्रणिपत्यार्हतः सिद्धसाङ्गशब्दानुशासनः ।
रूढयौगिकमिश्राणां नाम्नां मालां तनोम्यहम् ॥

अन्तः—

इत्याचार्यश्रीहेमचन्द्रविरचितायां स्वोपज्ञाभिधानचिन्तामणिनाममालाटीकायां सामान्यकाण्डः षष्ठः ॥ छ ॥ ग्रन्थाग्रं श्लोक ११२० । एतस्यामभिधानचिन्तामणौ नाममालाया विवरणे षट्सु काण्डेषु ग्रन्थाग्रं १०००० ॥ समाप्ता चेयमभिधानचिन्तामणिनाममालाटीका ॥ छ ॥ शुभं भवतु श्रीश्रमणसंघस्य। शान्तिर्भवतु लेखकपाठकयोः ॥

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ छ ॥

संवत् १३७६ वर्षे भाद्रवा [....] दि १ सोमदिने लिखितं लेखकेन ॥ छ ॥ छ ॥ छ ॥ छ ॥

*

No. 260 : Abhidhānacintāmaṇināmamālā with Commentary

अभिधानचिन्तामणिनाममाला—स्वोपज्ञटीकासह

Folios – 324 स्ता थ ण्क
Size – 32.5 × 2.5 inches
Language – Sanskrit
Condition – Good
Author & Commentator – Hemacandrācārya
Age of MS. – c. Latter half of 15th cent. V.S.
General Remarks – The reverse of the last folio having been rubbed off the closing portion has been effaced.

*

No. 261 : Kaviśikṣā कविशिक्षा

Folios – 13
Size – 14 × 2 inches
Language – Sanskrit
Condition – Good
Author – Jayamaṅgalācārya
Age of MS. – c. 14th cent. V.S.

आदिः—

॥ ॐ नमो विघ्नराजाय ॥

प्रबोधमानंदपरंपराणां हेतुं समुल्लासिततत्त्वसेतुम् ।
युष्माकमत्युज्ज्वलमानसांतर्ब्राह्मी सुधासुंदरमातनोतु ॥ १ ॥

नानार्थकविशिक्षाणां संग्रहादसमादिह ।
मया प्रकाश्यते तत्त्वं श्रीमत्पार्श्वप्रसादतः ॥ २ ॥

औचित्यं श्लाघ्यते तत्र कविना जीवितोपमम् ।
कवयस्तदजानंतः कथं स्युः कीर्त्तिभाजनम् । ३ ॥

अन्तः—

अनुल्लसंत्यां नव्यार्थयुक्तावपि नवत्वतः ।
अर्थसंकलनातत्त्वमभ्यसेत् संकथास्वपि ॥ ६ ॥

इति श्रीजयमंगलाचार्यविरचितकविशिक्षेयं समाप्ता ।

शिवमस्तु सर्वजगतः परहितनिरता भवंतु भूतगणाः ।
दोषाः प्रयांतु नाशं सर्वत्र सुखी भवतु लोकः ॥ १ ॥

*

No. 262 : Raghuvaṃśamahākāvya—Upto Sarg XIV Śloka 168
रघुवंशमहाकाव्य—सर्ग १४ श्लो. १६८ पर्यन्त

Folios – 258 | Size – 12 × 2 inches
Language – Sanskrit | Condition – Good
Author – Mahākavi Kālidāsa | Age of MS. – c. end of 13th cent. V.S.

आदिः—

॥ ॐ नमो नेमिनाथाय ॥

वागर्थाविव संपृक्तौ................

*

No. 263 : Gauḍavaho Mahākāvya गउडवहो महाकाव्य

Folios – 232 | Size – 12.2 × 1.7 inches
Language – Prakrit | Condition – Good
Author – Vākpatirāja | Age of MS. – 1289 V. S.

आदिः—

॥ नमो कामराजाय ॥

पढमं चिय धवलकओवत्रीअमंवुरुहंगोअरं नमह ।
हरिजढरनि— —सुखित्तनालसुत्तं पिव सयंभुं ॥ १ ॥
तं पणमह तिंगिच्छिच्छलेण निवसइ निवेसकमलम्मि ।
जस्स परमाणुनिवहो व्व भुवणनिम्माणपडिवन्नो ॥ २ ॥

अन्तः—

जस्स विजयाहिसेए विवक्खदेवीहिं कयणिओयाहिं ।
पीयाइं तक्खणुप्पियचमरंतरिआइं अंसूइं ॥ ४४ ॥
तस्स इमं पावणमहिणवं विचित्तं च विम्हयकरं च ।
सीसइ चरियमचरमं णराहिवइणो णिसामेह ॥ ४५ ॥

कइरायलंछणस्स **वप्पइरायस्स गउडवहेण** गाहावीढं सम्मत्तं ॥ इति महाकाव्यं समाप्तमिति ॥ कथानिका चात्र दिव्या ॥ छ ॥ मंगलं महाश्रीः ॥ संवत् १२८९ वर्षे पौष सुदि ८ भौमे अद्येह **वटपद्रके गौडवहमहा**...............

*

No. 264 : (1) Sūktāvalī (१) सूक्तावली

Folios – 13
Language – Sanskrit
Age of MS. – c. First half of 15th cent. V. S.
Extent – Kāvyas 147
Size – 13 × 1.7 inches
Condition – Good

धर्माधिकार आदिः—

॥ ॐ नमो वीतरागाय ॥

मानुष्यार्यक्षेत्रदेशान्वयायुर्नीरोगं वाऽऽचार्यबुद्ध्यादिसंपत् ।
संसारेऽस्मिन् मानवानां दुरापा सामग्रीयं धर्ममार्गे समग्रा ॥ १ ॥
इह हि भूतलवह्निनभस्वतामसुमतो वत कायमसुंचतः ।
व्रजति काल उपार्जितकर्मणां स्थितिवशादपसंख्यमसौख्यतः ॥ २ ॥
अथ कथमपि प्रैति प्राणी वनस्पतिकायके-
ष्वतिगुरुतराज्ञानच्छन्नस्त्वनंततनुत्वगः ।
गमयति ततोऽनंतं कालं मलीमसकर्मणां
किमिव हि न वा योगो दद्यादशर्म शरीरिणाम् ॥ ३ ॥
द्वित्रिचतुःपरिणामपरीतैः स्यात्करणैर्यदि जंतुरुपेतः ।
कर्मबलाद् विकलेंद्रियनामा सो पि मनोविकलो न खलु ज्ञः ॥ ४ ॥

यत्राऽऽर्यलोका निवसंति देशे स्वदेशधर्मान्वयमार्गशीलाः ।
नृपाश्च सन्न्यायजनानुकूलास्तत्रोचितः श्राद्धजनस्य वासः ॥ ७२ ॥

अन्तः पत्र ९ —

पंचकल्याणकादीनामंगीकृत्य दिनादि सा ।
अन्यद्वा शासनोन्नामहेतुभूतं विधीयते ॥ १०४ ॥ छ ॥

कामाधिकार आदिः पत्र १० —

यथा धीरं धीरं रससि रससिक्तेन मरुता
रुतासक्तं केकिव्रजमपि यथाऽऽशु प्रथयसि ।
तथा शंके धाराधर धरणिमुद्धर्तुमभवद्
भवत्प्रारंभोऽयं भृशमकृशलोकम्पृणगुणः ॥ १ ॥

अन्तः पत्र १३ —

कांतिस्तनोति तुलनामलिनस्तवेयं धूमाच्च भूतिरपरश्च गुणो न कश्चित् ।
किं तत्तपः कथय कज्जल येन कांतानेत्रोत्पलैरविचलैः परिपीयसे त्वम् ॥ ३८ ॥ छ ॥
[कामाधिकारः]

(2) <u>Bodhapradīpa</u> (२) बोधप्रदीप

Folios – 14–19
Language – Sanskrit
Age of MS. – c. First half of 15th cent. V. S.
Extent – Kāvyas 51
Size – 13 × 1.7 inches
Condition – Good

आदि :—

चूडोत्तंसितचारुचंद्रकलिकाचंचच्छिखाभासुरो
लीलादग्धविलोलकामशलभः श्रेयो दशाग्रे स्फुरन् ।
अंतःस्फूर्जदपारमोहतिमिरप्राग्भारमुच्छेदयं-
श्चेतःसद्मनि योगिनां विजयते बोधप्रदीपो हरः ॥ १ ॥

अन्त :—

किं करिष्यत्यहो तेषां मायारात्रिस्तमस्विनी ।
येषां बोधप्रदीपेन मुक्तिमार्गः प्रदर्शितः ॥ ५१ ॥ छ ॥

बोधप्रदीपोऽयम् ॥ छ ॥

(3) Subhāṣitaratnakośa　　(३) सुभाषितरत्नकोश

Folios – 20-39/1　　Extent – Kāvyas 194
Language – Sanskrit　　Size – 13 × 1.7 inches
Author – Mummuṇideva　　Condition – Good
Age of MS. – c. First half of 15th cent. V.S.

आदि:—

॥ ॐ ॥

क्षिप्तो हस्तावलग्नः प्रसभमभिहतो व्याददानोंशुकांतं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण ।
आलिंगन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शांभवो वः शराग्निः ॥ १ ॥

पत्र २४—

आः कष्टं किल तावदेतदपि यद्दौस्थ्यं जने श्रूयते
तत्रापि स्वगृहागतं निजदृशोर्द्वंद्वेन यद् दृश्यते ।
अन्यत्तत्पुनरत्र दुःसहतरं यद्दैन्यमालंब्यते
तस्मात् किं न कठोर हा हृदय ! रे द्वेधा त्वया भिद्यते ? ॥ ५९ ॥

व्रजत व्रजत प्राणा अर्थिनि व्यर्थतां गते ।
पश्चादपि हि गंतव्यं क सार्थः पुनरीदृशः ॥ ६० ॥

इति परमशैवभट्टारकमहापंडिताचार्यराजगुरुश्रीमन्मुम्मुणिदेवविरचिते सरस्वती-सर्वस्वकोशाभिधाने सुभाषितरत्नकोशे धर्माधिकारकः प्रथमबोधकः ॥ छ ॥ अथार्थाधिकारे सामान्यसमासोक्तिः ॥

पत्र २५ —

माधुर्यादतिशैत्यतः शुचितया संतापशांत्या तृपः
स्थाने मैत्रमिदं पयः पय इति क्षीरस्य नीरस्य च ।
तेऽत्राप्यर्णसि वर्णना स्फुरति मे यत्संगतौ वर्द्धते
दुग्धं येन शुचेव चास्य सुहृदः काध्येः स्वयं क्षीयते ॥ १ ॥ कस्यापि ॥

को हि तुलामधिरोहति शुचिना दुग्धेन सहजमधुरेण ।
तप्तं विकृतिं क्षुब्धं केवलमुद्गिरति यत्स्नेहम् ॥ २ ॥

वामन फलमत्युच्चं तरुतो मरुतोपनीतमासाद्य ।
युक्तं तद्यत् तृप्यसि दृप्यसि चेत्तत्र हास्यकरम् ॥ ३ ॥

निरानंदः कौंदे मधुनि विधुरो बालबकुले
न शाले सालंबो लवमपि लवंगे न रमते ।
प्रियंगौ नासंगं रचयति न चूते विचरति
स्मरन् लक्ष्मीलीलाकमलमधुपानं मधुकरः ॥ ४ ॥

सुवर्णकार श्रवणोचितानि वस्तूनि विक्रेतुमिहागतस्त्वम् ।
कुतोऽपि नाश्रावि यदत्र पल्ल्यां पल्लीपतिर्याविदविद्धकर्ण्णः ॥ ६ ॥ कयोरपि ॥

इति सामान्यसमासोक्तिपद्धतिः ॥

अन्तः पत्र ३९ :—

ग्रीष्मे तुल्यगुडां सुसैंधवयुतां मेघावनद्धांबरे
तुल्यां शर्करया शरद्यभिनवे शुंठ्या तुषारागमे ।
पिप्पल्या शिशिरे वसंतसमये क्षौद्रेण तां संयुतां
राजन् प्राप्य हरीतकीमिव गदा नश्यंतु ते शत्रवः ॥ १३४ ॥

मुम्मणरचितसुभाषितावली समाप्ता ॥ छ ॥

(4) Sūktasaṅgraha (४) सूक्तसङ्ग्रह

Folios – 39/2–58
Extent – Kāvyas 268
Language – Sanskrit
Size – 13 × 1.7 inches
Age of MS. – c. First half of 15th cent. V.S.
Condition – Good
General Remarks – Incomplete.

आदिः—

तानींद्रियाण्यविकलानि तदेव नाम सा बुद्धिरप्रतिहता वचनं तदेव ।
अर्थोष्मणा विरहितः पुरुषः स एव चान्यः क्षणेन भवतीत्यतिचित्रमेतत् ॥१॥

यत्सेवंते नरपतिमहो मानवाः मानशौण्डाः
यत्संग्रामे गृह इव निजे निर्विशंका विशंति ।
यद्धापंते परुषवचसां स्वामिनां दीनमग्रे
हेतुस्तस्मिंस्तरलनयना कामिनी काममेका ॥ २ ॥

किमिह कपालकमंडलुवल्कलसितरक्तपटजटापटलैः ।
व्रतमिदमुज्ज्वलमनसां पुंसां प्रतिपत्तिनिर्वहणम् ॥ ३ ॥

यद्गायंति च वादयंति च नृणां नृत्यंति चाग्रे सदा
नीचानामपि चित्रचाटुरचनास्तोत्राणि कुर्वंति वा ।
आरोहंति च रोहणाद्रिशिखरं क्रामंति चांभोनिधिं
मर्त्यास्तत्र निमित्तमुत्तमतमं मत्तेभकुंभस्तनी ॥ ४ ॥

*

No. 265 : (1) Sūktiratnakośa—Sūktasaṅgraha

(१) सूक्तिरत्नकोश—सूक्तसङ्ग्रह

Folios – 1-37
Extent – Granthas 613
Language – Sanskrit
Size – 13 x 1.7 inches
Author – Lakṣmaṇa
Condition – Good
Age of MS. – c. First half of 15th cent. V. S.

आदिः—

॥ ॐ नमः सर्वज्ञाय ॥

सूक्तिरत्नसुधासिंधुं ध्यात्वा श्रीश्रुतदेवताम् ।
सूक्तानां संग्रहं चक्रे लक्ष्मणो लक्षसूक्तिकः ॥ १ ॥

अथ जिनस्तुतिः—

चित्रं यत्रापरागेऽपि केवलज्ञानभास्करः ।
अजस्रमुदयं धत्ते जिनेंद्रः सोऽस्तु नः श्रिये ॥ २ ॥

जिनः स पातु नाभेयो येन चामीकरच्छविः ।
क्षिप्तो विशुद्धये कायस्तपस्तीव्रहुताशने ॥ ३ ॥

जिनः स जयतां देवः संसारलवणार्णवे ।
